### विष्णुधर्मोत्तरे—खण्ड २ अध्याय १७९ ( अग्निपुराणे अ० २४९ )

**कार्मुकं भृगुवामेन[१] वामं[२] दक्षिणकेन वा। वैशाखेप्यथ वा जाते स्थितो[३] वाप्यथवायते[४] ॥ १२ ॥**
**गुणाग्रं[५] तु ततः कृत्वा कार्मुके प्रियकार्मुकः। अधः कोटिं[६] तु धनुषः फलदेशे[७] च पत्रिणः ॥ १३ ॥**
**धरण्यां स्थापयित्वा तु लालयित्वा तथैव च। भुजाभ्यामत्र कुब्जाभ्यां प्रकोष्ठाभ्यामरिंदम ॥ १४ ॥**
**न्यस्य बाणं धनुः श्रेष्ठं पुङ्खदेशे च पत्रिणः। विन्यासो धनुषश्चैव द्वादशाङ्गुलमन्तरः ॥ १५ ॥**
**तयोर्भार्गव[८] कर्त्तव्यो नातो हीनो न चाधिकः। निवेश्य कार्मुकं कण्ठे[९] नितम्बे शरसङ्गरम् ॥ १६ ॥**
**उत्क्षिपेदस्थिरं[१०] हस्तमन्तरेणाक्षिकर्णयोः। पूर्वेण मुष्टिना ग्राह्यः स्तनाग्रं[११] दक्षिणः शरः ॥ १७ ॥**

---

**विष्णुधर्मोत्तर में**—हे ब्रह्मन्! योद्धा को चाहिये कि बायें हाथ में धनुष और दाहिने में बाण लेकर वैशाख या जात अथवा आयत स्थान में स्थिर होकर ॥ १२ ॥ धनुष पर प्रत्यञ्चा चढ़ाकर धनुष का नीचेवाला सिरा और बाण का फल भी भूमि पर टिकाकर उसे मुड़ी हुई भुजाओं और प्रकोष्ठ (पहुँचे) से ऊपर उठाकर बाण को धनुष पर चढ़ावे। धनुष एवं प्रत्यञ्चा का (चढ़ाने पर) अन्तर १२ अङ्गुल होना चाहिये। न इससे कम और न ही अधिक ॥ १३-१४-१५½ ॥

तथा उस अवस्था में बाण फेंके। धनुष को कण्ठ के समीप लाकर एवं पीठ पर तरकस

---

**अग्निपुराणे पाठभेदाः—**

१. गृह्य २. बाण ३. आयतौ ४. स्थितौ ५. गुणातन्तुं ६. कटिन्तु ७. फलदेशन्तु ८. ज्यया विशिष्टं ९. नाभ्यां १०. उत्थित ११. स्तनाग्रे दक्षिणे।

**हरणं तु ततः कृत्वा शीघ्रं पूर्वां[१] प्रसारयेत्। नात्यन्तरा नैव बाह्या नोर्ध्वगा नाऽधरास्तथा॥ १८॥**
**न च कुब्जा न चोत्ताना न चला नातिवेष्टिता। समा स्थैर्यगुणोपेता पूर्वे दण्डमिव स्थिता॥ १९॥**
**छादयित्वा ततो लक्ष्यं पूर्वेणानेन मुष्टिना। [२]तरसा तूत्थितो यत्नात्त्रिकोणविनतिस्थितः॥ २०॥**
**स्त्रस्तांशो निश्चलग्रीवो मयूरांचितमस्तकः। ललाटनासावक्त्रांसः [३]कूर्परश्च समं भवेत्॥ २१॥**
**अन्तरं [४]त्वङ्गुलं ज्ञेयं चिबुकस्यांसकस्य च। प्रथमे त्र्यङ्गुले विन्द्याद् द्वितीये द्व्याङ्गुलं स्मृतम्॥ २२॥**
**तृतीयेऽङ्गुलमुदिष्टं चायतं चिबुकांसयोः। गृहीत्वा सायकं तत्र[५] तर्जन्यङ्गुष्ठमेव च॥ २३॥**
**अनामया ततो गृह्य पुनर्मध्यमयापि च। तावदाकर्षयेद् योगाद् यावद् बाणः सुपूरितः॥ २४॥**
**एवं विधमुपक्रम्य मोक्तव्यो विधिवत् खगः। दृष्टि मुष्टिहतं लक्ष्यं भिन्द्याद् बाणेन भार्गव॥ २५॥**
**मुक्त्वा चापं[६] वाम हस्तं क्षिपेत् वेगेन पृच्छतः[७]। एतदुच्छेदमिच्छन्ति ज्ञातव्यं हि त्वया द्विज॥ २६॥**

---

बाँधकर दाहिने ऊपर उठे हुए हाथ को आँख एवं कान के मध्य में स्थिर करे। पहले बाण मुट्ठी में पकड़े और उसे दाहिने स्तन की सीध में कर ले। उसके पश्चात् बाण को प्रत्यञ्चा पर चढ़ाकर उसे खेंचे॥ १६–१७½॥

धनुष की डोरी न धनुष से बाहर गई हुई हो, न भीतर, न ऊपर, न नीचे, न तिरछी, न उत्तान, न हिलती हुई और न ही बहुत अधिक बटी हुई हो अपितु सभी स्थानों में सम, सुदृढ़, दण्ड के समान सीधी होनी चाहिये॥ १८–१९॥

प्रत्यञ्चा चढ़ाने के पश्चात् पूर्व कही हुई मुष्टि के अनुसार लक्ष्य को मुष्टि से ढककर यत्नपूर्वक अपनी छाती ऊपर की ओर उठाकर शरीर को तिरछी अवस्था में रखना चाहिये॥ २०॥

इस स्थिति में कन्धा ढीला, ग्रीवा निश्चल और मस्तक मोर के सदृश (सामने) रहेगा। ललाट, नाक, मुख, कन्धा और कोहनी सभी सम स्थिति में रहेंगे॥ २१॥ ठोड़ी और कन्धे का अन्तर तीन अङ्गुल रहेगा। पहली बार यह अन्तर ३ अङ्गुल दूसरी बार २ अङ्गुल और तीसरी बार ठुड्डी और कन्धे का अन्तर १ अङ्गुल रहता है॥ २२½॥

बाण को पंख की ओर से तर्जनी और अङ्गूठे से पकड़ें। उसके पश्चात् अनामिका और पश्चात् मध्यमा अङ्गुली से भी पकड़ें। बाण को तब तक खींचे जबतक पूरा धनुष पर न आ–जाये॥ २३–२४॥

इस विधि से धनुष पर बाण चढ़ाकर छोड़ना चाहिये॥ ½॥ हे भार्गव! जब लक्ष्य (निशाना) दृष्टि और मुष्टि से ढक लिया जाये तब लक्ष्य का भेदन करे॥ २५॥

बाण छोड़ने के पश्चात् तुरन्त ही बायें हाथ को धनुषसहित पीछे की ओर को बलपूर्वक फेंके, क्योंकि शत्रु इसी हाथ को काटना चाहते हैं। हे द्विज! यह बात तुम्हें अवश्य जान लेनी चाहिये॥ २६॥

---

१. पूर्वं।
२. उरसा तूत्थितो यन्ता त्रिकोणविनतस्थितः।
३. ललाटनासावक्त्रांशाः कर्पुरश्चसमं भवेत्।
४. त्र्यङ्गुलं ५. पुङ्खात्। ६. मुक्त्वा तु पश्चिमं हस्तं। ७. पृष्ठतः।

कर्पूरं[1] त्रिविधं कार्यमाकृष्टन्तु धनुष्मता। [2]तत्रापि मुक्तके कार्यमक्षश्लिष्टस्तु मध्यमम्॥ २७॥
[3]ज्येष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविशारदः। ज्येष्ठस्तु पावको[4] ज्ञेयो भवेद् द्वादशमुष्टयः॥ २८॥
एकादश तथा साध्यः कनीयान् दशमुष्टयः।

## विष्णुधर्मोत्तरे—खण्ड २ अध्याय १८०

[5]पूर्णायुधो भृतिं कृत्वा ततो मांसैर्गतायुषाम्। [6]वराहमृगमेषाणां महिषाद्यैस्तथा द्विज॥ १॥
[7]मुनिधौतं ततः कुर्याद् युग्यं भूपैर्विधानवित्। मृदुसंस्तरणोपेतं मृदु वल्गु च योजयेत्॥ २॥
ततो वाहं[8] समारुह्य दंशितः सुसमाहितः। [9]तूर्णमारुह्य बध्नीयाद् द्रढां कक्षां च दक्षिणाम्॥ ३॥
[10]वैकक्ष्यमपि तच्चापं धारयेद् यन्त्रसंस्थितम्। ततो समुद्धरेत बाणं[11] ऋणाद् दक्षिणपाणिना॥ ४॥
[12]तज्जवः सहितं सर्वं मध्ये संगृह्य धारयेत्। वामहस्तेन वैकक्ष्याद् धनुस्तस्मात् समुद्धरेत्॥ ५॥
[13]सुनिषण्णमणिर्भूत्वा गुणे पुङ्खं निवेशयेत्। संपीड्य सिंहकर्णेन पुंखेनापि समे दृढम्॥ ६॥
वामकर्णोपरिस्थं च फलं वामस्य धारणात्[14]। बलामध्यमया[15] तत्र वामाङ्गुल्या च धारयेत्॥ ७॥

---

धनुष खेंचते समय कोहनी को नीचे करले। बाण छोड़कर कोहनी को आँख से सटा लें। यह मध्यम श्रेणी का बचाव है और शत्रु के लक्ष्य से दूर रखना यह उत्तम है॥ २७½॥ उत्तम श्रेणी का बाण बारह मुष्टि (६० अङ्गुल) मध्यम बाण ग्यारह मुष्टि, (५५ अङ्गुल) और कनिष्ठ बाण दश मुष्टि (५० अङ्गुल) का होता है॥ २८½॥

**विष्णुधर्मोत्तर में**—पूर्ण आयुधों से युक्त होकर पूर्ण श्रम करके वराह, मृग, मेष, महिष आदि पशुओं के मांस से तर्पणादि क्रिया अन्य नृपों के साथ करें। (अग्निपुराण) ब्रह्मन्! द्विज को चाहिये पूरी लम्बाईवाले धनुष का निर्माण कराकर उसे अच्छी प्रकार धो-पोंछकर यज्ञभूमि में स्थापित करें तथा गदा आदि आयुधों को भली-भाँति साफ करे। तत्पश्चात् सुकोमल तीरों से भरा तरकस बाँधे। इसमें विलक्ष्य बाण भी सुरक्षित रहता है। तूणीर को पीठ की ओर दाहिनी काँख के पास दृढ़ता से बाँधे॥ १-२-३॥

उसके पश्चात् दाहिने हाथ से तूणीर से तीर निकाले और शीघ्रता से बायें हाथ से धनुष को मध्य में से पकड़कर उठाये। चित्त में विषाद न आने दे। उत्साहयुक्त होकर प्रत्यञ्चा पर बाण को चढ़ाकर सिंहकर्ण मुष्टि से पंखसहित डोरी को दबाकर समभाव से सन्धान करें॥ ६॥

यदि बायें हाथ से बाण को चलाना हो तो बायें हाथ में बाण ले और दाहिने हाथ से धनुष की मुट्ठी पकड़े। फिर प्रत्यञ्चा पर बाण को इस तरह रखे कि खींचने पर उसका फल या पुङ्ख बायें कान के समीप आ जाये उस समय बाण को बायें हाथ की (तर्जनी और अङ्गुष्ठ के अतिरिक्त) मध्यमा अङ्गुली से भी धारण किये रहे। बाण चलाने की विधि को जाननेवाला पुरुष उपर्युक्त मुष्टि के द्वारा धनुष को दृढ़तापूर्वक पकड़कर मन को दृष्टि के साथ ही लक्ष्यगत करके बाण को शरीर के दाहिने भाग की ओर रखते हुए लक्ष्य की ओर छोड़े।

---

१. कूर्परं तदधः कार्यमाकृष्टं तु धनुष्मता। २. ऊर्ध्वं विमुक्तके कार्यं लक्ष्य। ३. श्रेष्ठं। ४. सायको मध्य। ५. पूर्णायुधं द्विजः कृत्वा ततो मांसैर्गदायुधान्। ६-९. वराह.....इति विष्णुधर्मोतरेऽधिकम् सुनिर्धौतं धनुः कृत्वा यज्ञभूमौ विधापयेत्। मृदुसं स्तरोपेतमिति विष्णुधर्मोतरेऽधिकम् ततो बाणं समागृह्यं तूणमासाद्य। १०. विलक्ष्यमपि तत् बाणं तत्र चैव सुस्थितम्। ११. तूर्णाद्। १२. तेनैव। सर्वस्थाने शरीरमिति मध्यादनन्तरं पठितम्। १३. अविषण्ण। १४. धारयेत्। १५. वर्णान्।

मनोलक्ष्यगतं कृत्वा दृष्टिं[१] च सुविधानवित्। [२]दक्षिणे गात्रभागे तु बलामाशु विमोक्षयेत्॥ ८॥
ललाटपुटसंस्थानं दार्णी[३] लक्ष्ये निवेशयेत्॥ ९॥
आकृष्य ताड्येत्तत्र दण्डकं[४] षोडशाङ्गुलम्। मुक्त्वा बाणं ततः [५]पश्चाद्बलां शिक्षेत्तदा तदा॥ १०॥
विगृह्णीयात् मध्यमया ततोऽङ्गुल्या पुनः पुनः। अभिलक्ष्याक्षिपेत् [६]तूणांश्चतुरस्त्रं च दक्षिणम्॥ ११॥
चतुरस्त्रगतं [७]वैध्यमभ्यसेदादितः स्थितः। तस्मादनन्तरं तीक्ष्णं परावृत्तगतं[८] च यत्॥ १२॥
[९]निश्रमुन्नतवेद्यन्तमभ्यसेत् तुष्यकं ततः। वेध्यस्थानैष्वथैतेषु सन्यस्तपुटकं धनुः॥ १३॥
[१०]हस्तावापगतैः स्त्रस्तैर्जयेद् हस्तकैरपि। तस्मिन् वेध्यगते राम द्वे वेध्ये दृढसंज्ञिते॥ १४॥
द्वे वेध्ये पुष्करे[११] विद्धि द्वे तथा चित्रपुष्करे। [१२]चतुरस्त्रं स्थूलतीक्ष्णं च दृढवेध्ये प्रकीर्तिते॥ १५॥
[१३]चतुरस्त्रस्थूलतीक्ष्णं......( त्रुटितपाठः )......। निम्नं पुष्करमुद्दिष्टिं वेध्यमूर्ध्वगतं च यत्॥ १६॥
पुष्करेऽधमवेध्ये तु चित्रपुष्करसंज्ञके। एवं वेध्यगणं कृत्वा दक्षिणेनेतरेण च॥ १७॥
आरोहेत् प्रथमं धीरो जितलक्ष्यस्ततो नरः। एष एव विधिप्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः॥ १८॥

---

धनुष का दण्ड इतना बड़ा हो कि भूमि पर खड़ा करने पर उसकी ऊँचाई ललाट तक आ जाये उसपर लक्ष्य वेध के लिये १६ अङ्गुल लम्बे चन्द्रक (चाँदमारी) पर सन्धान करे और उसे भली-भाँति खींचकर लक्ष्य पर प्रहार करे। इस तरह एक बाण का प्रहार करके फिर तत्काल ही तूणीर से अङ्गुष्ठ एवं तर्जनी अङ्गुली द्वारा बार-बार बाण निकाले। उसे मध्यमा अङ्गुली से भी दबाकर काबू में करे और शीघ्र ही दृष्टिगत लक्ष्य की ओर चलावे। चारों ओर तथा दक्षिण की ओर लक्ष्यवेध का क्रम जारी रखे। योद्धा पहले से ही चारों ओर बाण मारकर सब ओर के लक्ष्य को वेधने का प्रयास करे॥ ८-१०॥

तदनन्तर वह तीक्ष्ण, परावृत्त (घूमते हुए), निम्न, उन्नत तथा क्षिप्र वेध का अभ्यास बढ़ावे। वेध्य लक्ष्य के ये जो उपर्युक्त स्थान हैं, इनमें सत्त्व (बल एवं धैर्य) का पुट होते हुए विचित्र एवं दुस्तर रीति से सैकड़ों बार हाथों से बाणों के निकालने एवं छोड़ने की क्रिया द्वारा धनुष का तर्जन करे, उसपर टङ्कार दे॥ ११-१२॥

विप्रवर! उक्त वेध्य के अनेक भेद हैं। पहले जो दृढ़, दुष्कर तथा चित्रदुष्कर ये वेध्य के तीन भेद हैं। ये तीनों ही भेद दो-दो प्रकार के होते हैं। दुष्करवेध्य के भी निम्न और ऊर्ध्वगत ये दो भेद कहे गये हैं तथा चित्रदुष्कर वेध्य के मस्तक और मध्य ये दो भेद माने गये हैं॥ १३-१४॥

इस प्रकार इन वेध्यगणों को सिद्ध करके वीर पुरुष पहले दायें अथवा बायें पार्श्व से शत्रु-सेना पर चढ़ाई करे। इससे मनुष्य को अपने लक्ष्य पर विजय प्राप्त होती है। प्रयोक्ता पुरुषों ने वेध्य के विषय में यही विधी देखी और बताई है।

योद्धा के लिये उस वेध्य की अपेक्षा भ्रमण को अधिक उत्तम बताया गया है। वह लक्ष्य

---

१. मुष्टिना च विधानवित्। २. दक्षिणे गात्रभागे तु कृत्वा वर्णं विमोक्षयेत्। ३. दण्डं। ४. चन्द्रकं। ५. उलूका शिक्षस्तदा तथा। ६. क्षिपेत् तूणात्। ७. वेध्यं परावृत्तं गतं च यद्। ८. निम्नमुन्नतवेधञ्च अभ्यसेत् क्षिप्रकन्ततः। ९. वेध्यस्थानेष्वेतेषु सत्वस्य पुटकाद् धनुः। १०. हस्तावापशतैश्चित्रैस्तर्जयेद् दुस्तरैरपि। ११. दुष्करे। १२. न तु निम्नञ्च तीक्ष्णं च दृढवेध्यः प्रकीर्तितः। १३. चतुरस्त्रभिरित्यधिकं विष्णुधर्मोत्तरे। १४. दुष्करं। १५. मस्तका न मध्ये तु चित्रदुष्करं संज्ञके।

[1]आदिकं भ्रमणं तस्य तस्माद् विद्वन्प्रकीर्तितम्। [2]लक्ष्यं संयोजयेत्तत्र प्रति यन्त्रगतं दृढम्॥ १९॥
[3]भ्रान्तं प्रचलितं चैव स्थितं यच्च भवेदिति। समन्ताच्छादयेत् पश्चात् छेदयेच्छूलथयेदपि॥ २०॥
कर्मयोगविधानज्ञो ज्ञात्वेवं विधिमाचरेत्। मनसा चक्षुषा दृष्ट्या [4]योगे शिक्षन्यसंजयेत्॥ २१॥

दत्वा प्रयुक्तं सुकृतं प्रमाणान्न्यसेत् समन्तात् पुटकान्विचित्रान्।
अप्यङ्गुलीयप्रतिमां जपेच्च बालङ्गताः काष्ठगतं प्रलम्बम्॥ २२॥
सिद्धार्थकान्गुञ्जयवांश्च तस्मिन् न्यसेद् विधिज्ञो भ्रमरीरिकाञ्च।
मृत्पिण्डसंस्थान्फलं कांक्षितांश्च कबन्धनिष्पावकपेलवांश्च॥ २३॥
हंसान्मयूरान्कुररांस्तथा च कारण्डवांश्चैव शिलीमुखांश्च।
गृध्रानुलूकानथा वापि चाषान् कपोतगोधाशुकसारिकाश्च॥ २४॥
पलाशमूलोर्णवपूर्णदेहांश्चर्मावबद्धां मृदुचित्रगात्राम्।
वरत्रयन्त्रैर्विविधैः सुयुक्तां काष्ठावसक्तैर्बहुभिः प्रकारैः॥ २५॥
चलान् स्थिरांश्चाप्रगतांश्च विद्वान्न्यसेद् यथा व्यायामायोर्ध्वसंस्थान्।
व्याघ्रान्मृगेन्द्रान्पृषतान्रूरुंश्च मृगान् सगोकर्णवराहवक्रान्॥ २६॥
गोमायुमार्जारशशांस्तथान्यानृक्षान्मृगाश्चन्द्रमयेन्दुपूर्णान्।
अन्यान्समीपोपगतान्मृगांश्च विधानवित्तान्प्रतियन्त्रसंस्थान्॥ २७॥
जातांस्तथान्यांश्च बहुप्रकारानेकसंस्थानबिवद्धदेहान्।
नानाविधैस्तैर्विशिखभ्रमस्थः सन्धानयोगैस्त्रिविधैश्च हन्यात्॥ २८॥

—*वि० ध० पृष्ठ ३०४*

---

को अपने बाण के पुङ्ख भाग से आच्छादित करके उसकी ओर दृढ़तापूर्वक शर-सन्धान करे। जो लक्ष्य भ्रमणशील, अत्यन्त चञ्चल और सुस्थिर हो उसपर सब ओर से प्रहार करे। उसका भेदन और छेदन करें तथा उसे पीड़ा पहुँचायें॥ १७-१८॥

कर्मयोगविधान का ज्ञाता पुरुष इस प्रकार समझ-बूझकर उचित विधि का आचरण (अनुष्ठान) करे। जिसने मन, नेत्र और दृष्टि के द्वारा लक्ष्य के साथ एकता स्थापित करने की कला सीख ली है, वह योद्धा यमराज को भी जीत सकता है॥ १९॥

पत्ते, तृण और ऊन से बनाये हुए, चारों ओर चर्म लिपटे हुए चिकने और सुन्दर शरीरवाले मृगादि पशुओं के पुतले बनाकर उन्हें चमड़े की रस्सी से काष्ठ एवं यन्त्रों में अनेक प्रकार से बाँधे॥ २५॥ चलते हुए, स्थिर, दौड़ते हुए और ऊपर स्थित लक्ष्यों को यथास्थान यन्त्रों से संयुक्त करके रखे। इसमें व्याघ्र, सिंह, चितकबरा हरिण, रुरु (बड़ा काला हरिण) गोकर्ण (हरिण-विशेष) वक्र दाँतोंवाले, सूअर, गीदड़, बिल्ले, खरगोश, रीछ एवं अन्य भी बहुत प्रकार के चन्द्रमा के सदृश देदीप्यमान पशुओं की प्रतिकृति बनाकर उन्हें यन्त्रों पर व्यवस्थित हुए लक्ष्यों पर धनुर्धर घूमता हुआ तीनों सन्धानों से बाण चलाकर उनका वेधन करे॥ २६-२७-२८॥

---

१. अधिकं भ्रमणं तस्य तस्माद् वेध्यात् प्रकीर्तितम्।
२. लक्ष्यं संयोज्येत् तत्र पत्रि यत्र गतं दृढम्।
३. समन्तात्ताडयेद् भिन्द्याच्छेदयेत् व्यथयेदिति।
४. योगशिक्षुर्यमं जयेत्।

**चलेषु यन्त्र लक्ष्येषु बाणसिद्धिश्च जायते॥ २८॥**

*—(कामन्दकीय नीतिसार स० १५ प्र० २३) पृ० ३३३*

**वाशिष्ठधनुर्वेदसंहितायाम्—**

**कृतोपवासः शिष्यस्तु धृताजिनः परिग्रहः। बद्धाञ्जलिपुटस्तत्र याचयेद् गुरुतो धनुः॥ १८॥**
**शिष्याय मानुषं चापं धनुर्मन्त्राभिमन्त्रितम्। काण्डात्काण्डाभिमन्त्रेण दद्यात्वेदविधानतः॥ १९॥**
**प्रथमं पुष्पवेधं च फलहीनेन पत्रिणा। ततः फलयुतेनैव मत्स्यवेधं च कारयेत्॥ २०॥**
**मांसवेधं ततः कुर्यादेवं वेधो भवेत् त्रिधा। एतैर्विधैः कृतैः पुंसां शराः स्युः सर्वसाधकाः॥ २१॥**
**एवं वेधत्रयं कुर्याच्छंखदुंदुभिनिःस्वनैः। ततः प्रणम्य गुरवे धनुर्बाणान् निवेदयेत्॥ २२॥**

**वाशिष्ठधनुर्वेदसंहितायां लक्ष्यभेदाः—**

**लक्ष्यं चतुर्विधं ज्ञेयं स्थिरं चैव चलं तथा। चलाचलं द्वयचलं वेधनीयं क्रमेण तु॥ ९४॥**
**आत्मानं सुस्थिरं कृत्वा लक्ष्यं चैव स्थिरं बुधः। वेधयेत् त्रिप्रकारं तु स्थिरवेधी स उच्यते॥ ९५॥**
**चलं तु वेधयेद् यस्तु आत्मस्थानेषु संस्थितः। चलं लक्ष्यं तु तत्प्रोक्तमाचार्येण शिवेन वै॥ ९६॥**
**धन्वी तु चलते यत्र स्थिरलक्ष्ये समाहितः। चलाचलं भवेत् तच्च ह्यप्रमेयमचिन्तितम्॥ ९७॥**

---

**कामन्दकीय नीतिसार में**—यन्त्रों पर स्थित चलते हुए लक्ष्यों पर निशाना मारने से बाणों की सिद्धि हो जाती है॥ २८॥

**वाशिष्ठधनुर्वेदसंहिता में**—धनुर्वेद की शिक्षा ग्रहण करने का इच्छुक शिष्य उपवास करके मृगचर्म को धारण करे और दोनों हाथ जोड़कर गुरु से धनुष माँगे॥ १८॥ गुरु योग्य शिष्य को मानुष चाप धनुष के मन्त्र (काण्डात्....) को बोल वेद की विधि के अनुसार देवे॥ १९॥

अभ्यास करते समय सबसे पहले फलरहित तीर से पुष्प को सामने रखकर उसका वेध करना चाहिये। इसमें सफलता मिल जाने पर फलसहित बाण से मछली पर निशाना मारने का अभ्यास करवावे॥ २०॥

इसके पश्चात् मांस पर निशाना मारे। इस प्रकार यह तीन प्रकार का वेध होता है। इस विधि से अभ्यास करने पर धनुर्धारी के बाण सब कार्यों के साधक हो जाते हैं॥ २१॥

यह तीन प्रकार का वेध शङ्ख, दुन्दुभि (ढोल-नगाड़े) आदि के शब्दसहित करे (ये वाद्य वेध करते समय प्रोत्साहित करने के लिये बजते रहें)। वेध का अभ्यास करने के पश्चात् गुरु को नमस्कार करे और धनुष-बाण उन्हें दे देवे॥ २२॥

**वाशिष्ठधनुर्वेद में लक्ष्य के भेद**—चार प्रकार का लक्ष्य होता है। स्थिर, चल, चलाचल और द्वयचल। इनका क्रम से वेध करना चाहिये॥ ९४॥

अपने-आपको स्थिर करके जो तीन प्रकार (ऊर्ध्व; अध, सम लक्ष्य) के स्थिर लक्ष्यों का वेधन करें, उसे स्थिरवेधी कहते हैं॥ ९५॥

स्वयं स्थित होकर जब चलते हुए लक्ष्य को बींधा जाये तो उसे धनुर्वेद के प्रवक्ता महादेवजी ने चल लक्ष्य कहा है॥ ९६॥

जहाँ धनुषधारी स्थिर लक्ष्य पर ध्यान देते हुए चले तो उसे चलाचल लक्ष्य कहते हैं। यह अप्रमेय (बिनाप्रमाण विशेष) और अचिन्तित (ध्यान में न आनेवाला) लक्ष्य है, अर्थात्

**उभावेव चलौ यत्र लक्ष्यं चापि धनुर्धरः। तद् विज्ञेयं द्वयचलं श्रमेण बहु साध्यते॥ ९८॥**

**श्रममहिमा—**

**श्रमेण चित्रयोधित्वं श्रमेण प्राप्यते जयः। तस्माद्गुरु समक्षं हि श्रमःकार्यो विजानतः॥ १००॥**
**प्रथमं वामहस्तेन यः श्रमं कुरुते नरः। तस्य चापक्रिया सिद्धिरचिरादेव जायते॥ १०१॥**
**वामहस्ते सुसंसिद्धे पश्चाद् दक्षिणमारभेत्। उभाभ्यां च श्रमं कुर्यान्नाराचैश्च शरैस्तथा॥ १०२॥**
**वामेनैव श्रमं कुर्यात् सुसिद्धे दक्षिणकरे। विशाखेनासमेनैव रथी व्याये च कैशिके॥ १०३॥**
**उदिते भास्करे लक्ष्यं पश्चिमायां निवेशयेत्। अपराह्ने च कर्त्तव्यं लक्ष्यं पूर्वदिगाश्रितम्॥ १०४॥**
**उत्तरेण सदा कार्यमवश्यमवरोधिकम्। संग्रामेण विना कार्यं न लक्ष्यं दक्षिणामुखम्॥ १०५॥**

*—वा० ध०*

**आकाशभैरवे—श्रमस्य परिभाषा—**

**पुरतो वर्त्तमानस्य लक्ष्यस्य बहुधा शितैः। शरैराकर्णमाकृष्टैर्भेदनं यत् तदद्रिजे॥ ४॥**
**श्रम इत्युच्यते पुम्भिर्धनुर्वेदविशारदैः। श्रम एव परं ज्ञेयः श्रम एव परं बलम्॥ ५॥**
**श्रम एव पराकीर्तिर्धानुष्कस्य विशेषतः। तस्मादवश्यं धानुष्को भवेच्छ्रमपरिश्रमः॥ ६॥**
**प्रत्यहं प्रयतः प्रातः सायञ्च वरवर्णिनि। य एकस्मिन्नपि दिने धन्वी न कुरुते श्रमम्॥ ७॥**

---

इसकी सिद्धि परिश्रम साध्य है॥ ९७॥

जब लक्ष्य और धनुर्धर दोनों ही चल रहे हों तो इसे द्वयचल जानना चाहिये। इसकी सिद्धि बहुत श्रम से होती है॥ ९८॥

**श्रममहिमा**—श्रम से ही चित्रयोधा बनता है। श्रम से ही विजयश्री मिलती है, अतः बुद्धिमान् व्यक्ति को गुरु के समक्ष ही धनुष-बाण का अभ्यास करना चाहिये॥ १००॥

जो योधा पहिले बायें हाथ से लक्ष्यवेध का अभ्यास करता है, उसे शीघ्र ही सफलता मिलती है॥ १०१॥

बायें हाथ से लक्ष्यवेधन में सफलता मिलने पर पुनः दाहिने हाथ से निशाना साधे और पश्चात् दोनों ही हाथों से नाराच (लोहे के बाण) और शरों का अभ्यास करे॥ १०२॥

दाहिने हाथ के सिद्ध हो जानें पर रथी विशाख अथवा असमपाद, पवित्रे और कैशिक व्याय से बायें हाथ से ही लक्ष्य साधन करे॥ १०३॥

सूर्योदय काल में पश्चिम दिशा में एवं दोपहर के पश्चात् पूर्व दिशा में अभ्यास करना उचित है॥ १०४॥

उत्तर दिशा में सदा ही लक्ष्यवेधन का अभ्यास कर सकते हैं, किन्तु संग्राम के बिना दक्षिण दिशा में मुख करना उचित नहीं, क्योंकि दक्षिण में सूर्य मुख के सम्मुख पड़ता है॥ १०५॥

**श्रम की परिभाषा**—हे पार्वती! सामने स्थित लक्ष्य को बहुत-से तीक्ष्ण तीरों से कान तक धनुष खेंचकर जो वेधन किया जाता है उसे धनुर्वेद के ज्ञाताओं ने "श्रम" कहा है॥ ४॥

श्रम ही उत्कृष्ट ज्ञान-बल और कीर्तिकारक है, इसलिये धनुर्धर को श्रम में अवश्य ही परिश्रम करना चाहिये॥ ५-६॥

हे सुरूपे! प्रतिदिन प्रातः और सायंकाल धनुष चालन का अभ्यास करना उचित है। जो योद्धा एक दिन भी श्रम को छोड़ देता है तो हे उमे! उसकी मुष्टि और दृष्टि विचलित हो जाती है,

**तस्य दृष्टिश्च मुष्टिश्च नानाकारा चलत्युमे। तस्मात् कृतश्रमेणैव सङ्ग्रामे प्राप्यते जयः ॥ ८ ॥**
**चन्द्रहीना यथा रात्रिः पुष्पहीना यथा लता। तथैव श्रमहीनाऽपि धनुर्विद्या वरानने ॥ ११ ॥**

*—आकाशभैरवः १३६*

## वाशिष्ठधनुर्वेदे—

**शतैश्च काण्डानां यो हि लक्ष्यं विसर्जयेत्। सूर्योदये चास्तमाने स ज्येष्ठो धन्विनां भवेत् ॥ १०८ ॥**
**त्रिशतैर्मध्यमश्चैव द्विशताभ्यां कनिष्ठकः।**

## अथ श्रमक्रिया—

**क्रियाकलापान्वक्ष्यामि श्रमसाध्यान्शुचिस्मताम्। येषां विज्ञानमात्रेण सिद्धिर्भवति नान्यथा ॥ ११७ ॥**
**प्रथमं चापमारोप्य चूलिकां बन्धयेत् ततः। स्थानकं तु ततः कृत्वा बाणोपरि करं न्यसेत् ॥ ११८ ॥**
**तोलनं धनुषश्चैव कर्त्तव्यं वामपाणिना। आदानं च ततः कृत्वा सन्धानं च ततः परम् ॥ ११९ ॥**
**सकृदाकृष्टचापेन भूमिवेधं न[1] कारयेत्। नमस्कुर्याच्च मां विघ्नराजं गुरुंधनुः शरान् ॥ १२० ॥**
**याचितव्या गुरोराज्ञा बाणस्याकर्षणं प्रति। प्राणवायुं प्रयत्नेन प्राणेन सह पूरयेत् ॥ १२१ ॥**

*—वा० धनु०*

**कुम्भकेन स्थिरं कृत्वा हुङ्कारेण विसर्जयेत्। इत्यभ्यास क्रिया कार्या धन्विना सिद्धिमिच्छताम् ॥ १२२ ॥**
**षण्माषात्सिध्यते मुष्टिः शराः संवत्सरेण तु। नाराचास्तस्य सिध्यन्ति यस्य तुष्टो महेश्वरः ॥ १२३ ॥**

---

अतः श्रम का निरन्तर अभ्यास करने से ही संग्राम में विजय मिलती है, अन्यथा नहीं ॥ ७-८ ॥

हे सुमुखी ! जैसे चन्द्रमा के बिना रात्रि सुशोभित नहीं होती, जैसे पुष्प के बिना बेल अच्छी प्रतीत नहीं होती, वैसे ही श्रम के बिना धनुर्विद्या भी शोभा नहीं देती ॥ ११ ॥

**वाशिष्ठधनुर्वेद में**—सूर्योदय एवं अस्त के समय जो चार सौ बाणों को निशाने पर छोड़े, वह धनुषधारियों में श्रेष्ठ होता है। तीन सौ बाण छोड़नेवाला मध्यम और दो सौ बाण छोड़नेवाला कनिष्ठ योद्धा कहलाता है ॥ १०८½ ॥

**श्रम-क्रिया**—शुद्ध हृदयवालों के लिये धनुष की क्रिया इत्यादि का कथन करता हूँ, जिनके सम्यग्ज्ञान से ही सिद्धि मिलती है, अन्यथा नहीं ॥ ११७ ॥

प्रथम धनुष पर प्रत्यञ्चा चढ़ाकर चूलिका (दस्ताना) को बाँधे, पुनः स्थान (आलीढ़ादि) में स्थित होकर बाण के ऊपर हाथ रखे ॥ ११८ ॥

धनुष का उत्तोलन बायें हाथ से करना चाहिये। इस प्रकार पहली बार खींचे हुए धनुष से भूमि-वेध न करे। हे विश्वामित्र! महादेव, गणेश, गुरु और धनुष बाण को नमस्कार करे ॥ १२० ॥

पुनः गुरु से शरसन्धान की आज्ञा माँगनी चाहिये। प्राणवायु को प्रयत्नपूर्वक भीतर लेकर (पूरक क्रिया) कुम्भक से उसे स्थिर करे और पुनः हुङ्कारसहित रेचक करे। सिद्धि के इच्छुक धनुर्धरों को यह अभ्यास अवश्य करना चाहिये ॥ १२१-१२२ ॥

मुष्टि (पताका वज्रमुष्ट्यादि) छह मास में सिद्ध होती है। शर (बाण) एक वर्ष में सिद्ध

---

१. च कारयेदिति वीरमित्रोदये लक्षणप्रकाशे (पृष्ठ २८७)

**पुष्पवद् धारयेद्बाणं सर्पवत् पीड्येत् धनुः। धनवच्चिन्तयेल्लक्ष्यं यदीच्छेत्सिद्धिमात्मनः॥ १२४॥**
**क्रियामिच्छन्ति चाचार्या दूरमिच्छन्ति चेतरे॥ १२५॥**
**हीनेनापीषुणा तस्मात् प्रशस्तं लक्ष्यवेधनम्॥ १२६॥ —वा० ध०**

## लक्ष्यस्य दूरत्वम्

**[1]षष्ठी धन्वन्तरे लक्ष्यं ज्येष्ठं लक्ष्यं प्रकीर्तितम्। चत्वारिशन्मध्यमं च विंशतिश्च कनिष्ठकम्॥ १०६॥**
*—वा० ध०*

## मानसोल्लासे—

**उत्तमं द्विशतं प्रोक्तं शतं सार्धं तु मध्यमम्। विंशं शतं कनिष्ठं स्याद् दूरे धन्वन्तरे क्षितौ॥ १५३॥**
*—मानसो० पृष्ठ १६७*

## वीरमित्रोदये—

**षष्ठी धन्वन्तरे लक्ष्यं ज्येष्ठं लक्ष्यं प्रकीर्तितम्। चत्वारिंशन्मध्यमं च विंशतिश्च कनिष्ठकम्॥**
**शराणां कथितं ह्येतत् नाराचानामथोच्यते। [1]चत्वारिंशच्च त्रिंशच्च षोडशैव भवेत् ततः॥**
*—वीरमित्रोदये लक्षणप्रकरणे, पृष्ठ २८७*

---

होते हैं। (एक वर्ष में निशाना लगाना आता है) और नाराच बाण उसके ही सिद्ध होते हैं, जिसपर महादेवजी की कृपा हो। यह बहुत परिश्रम साध्य है॥ १२३॥

सफलता चाहनेवाला धनुर्धर पुष्प के समान (हल्का) बाण ले। सर्प के समान (लचकनेवाला) धनुष को झुकाये, खींचे और धन के समान (एकाग्रचित्त) लक्ष्य का चिन्तन करे॥ १२४॥

आचार्य (धनुर्विद्या के मर्मज्ञ) क्रिया (सन्धानादि क्रिया) को ठीक करना, भार्गव बाण दूर जाकर पड़े ऐसी, राजा दृढ़ वस्तु कट जाये ऐसी और अन्य लोग निशाना अच्छा लगे, इसकी इच्छा करते हैं॥ १२५॥

लोगों का चित्त निशाना लगाने में ही प्रसन्न होता है, अतः हीन बाण (नपुसंक) से भी लक्ष्य को बींधना अच्छा है॥ १२६॥

**लक्ष्यस्य दूरत्वम्**—साठ धनुष (२४० हाथ=१२० गज) की दूरी पर स्थित लक्ष्य को बींधना उत्तम, चालीस धनुष (८० गज) का मध्यम और बीस धनुष (४० गज) का निकृष्ट लक्ष्य कहा गया है॥ १०६॥

**मानसोल्लास में**—उत्तम लक्ष्य दो सौ धनुष (४०० गज), मध्यम डेढ़ सौ धनुष (३०० गज) और अधम एक सौ बीस धनुष (२४० गज) गज की दूरी पर लक्ष्यभेदन कनिष्ठ कहलाता है॥

**वीरमित्रोदय में**—साठ धनुष अन्तरवाला लक्ष्य ज्येष्ठ, चालीस का मध्यम और बीस का कनिष्ठ कहा जाता है।

यह लक्षण शरों का कहा है। अब नाराचों (लोहे के बाण) की दूरी कही जाती है। इनकी दूरी चालीस धनुष (८० गज) की उत्तम, तीस धनुष (६० गज) की मध्यम और सोलह धनुष (३२ गज) की अधम होती है।

---

१. अस्यार्थो वाशिष्ठ धनुर्वेद भाषाकारेण श्री हरदयालु स्वामिनान्यथैव कृतः।

**आकाशभैरवतन्त्रे—**

षष्ठी हस्तान्तरं लक्ष्यमुत्तमं परिकीर्तितम्॥ २९॥
चत्वारिंशत् करैर्मध्यमधमं स्यात्तदर्धतः॥ ३०॥ —*पटल १३६*

**चन्द्रकस्य मानम्—**

लक्ष्यं च पुरुषोन्मानं कुर्याच्चन्द्रकसंयुतम्॥ १०९॥
ऊर्ध्वभेदी भवेज्ज्येष्ठो नाभिभेदी च मध्यमः। पादभेदी तु लक्ष्यस्य स कनिष्ठो मतो भृगो॥ १११॥
—*वा० ध०*

**मानसोल्लासे—**

षोडशाङ्गुलवृत्तं तु स्थूलं लक्ष्यमुदाहृतम्। अङ्गुलद्वितयं सूक्ष्मं पञ्चगुंजाशिरोरुहम्॥ १५०॥
आकृष्य ताडयेत् तत्र चन्द्रकं षोडशाङ्गुलम्॥ ८॥ —*अग्नि पुराण अ० २५०*
उरःसमं समं लक्ष्यं मनुष्योत्सेधमानतः। तदूर्ध्वमुच्चं लक्ष्यं स्यात् तदधो नीचमुच्यते॥ १२९॥
—*मानसोल्लासे*

**अथ लक्ष्यास्खलनविधि—वाशिष्ठधनुर्वेदे—**

विशाखस्थानकं हित्वा[१] समसंधानमाचरेत्। गोपुच्छमुखबाणेन सिंहकर्णेन मुष्टिना॥ १२७॥
आकर्षेत्कौशिकव्यायेन न शिखाश्चालयेत्ततः। पूर्वापरौ समं कार्यौ समांसौ[२] निश्चलौ करौ॥ १२८॥
चक्षुषी स्पन्दयेन्नैव दृष्टिं लक्ष्ये वियोजयेत्। मुष्टिनाऽऽछादितं लक्ष्यं शरस्याग्रे वियोजयेत्॥ १२९॥
मनोदृष्टिगतं कृत्वा ततः काण्डं विसर्जयेत्। स्खलत्येव कदाचिन्न लक्ष्ये योधो जितश्रमः॥ १३०॥

---

**आकाशभैरवतन्त्र में**—साठ हाथ का लक्ष्य उत्तम, चालीस हाथ का मध्यम और बीस का अधम होता है॥ ३०॥

**चन्द्रकस्य मानम्**—पुरुष की लम्बाई जितना लक्ष्य चन्द्रक (चाँदमारी) से युक्त रखना चाहिये इस लक्ष्य के ऊर्ध्व भाग को वेधन करनेवाला ज्येष्ठ, नाभि भाग को वेधनेवाला मध्यम और पैरों को वेधनेवाला कनिष्ठ माना जाता है। यह भृगुजी का मत है॥ १०९-१११॥

**मानसोल्लास में**—सोलह अङ्गुल का लक्ष्य (चन्द्रविन्दु) स्थूल लक्ष्य माना जाता है और दो अङ्गुल का लक्ष्य सूक्ष्म लक्ष्य कहा जाता है।

**अग्निपुराण में**—धनुष पर बाण चढ़ाकर सोलह अङ्गुल परिमाणवाले चन्द्रक (चाँदमारी) का वेध करे॥ ८॥

**मानसोल्लास में**—मनुष्य की छाती के समान ऊँचे लक्ष्य का वेधन सम, उससे ऊँचे पर ऊर्ध्व और नीचे पर अधम लक्ष्य कहलाता है॥ १२९॥

**अचूक लक्ष्य साधन की विधि**—विशाखस्थान में स्थित होकर समसन्धान करे। गोपुच्छ बाण को सिंहकर्ण मुष्टि से पकड़कर कैशिक व्याय से खींचे और शिखा भी न चलावे। बायें और दाहिने दोनों कन्धे समान और स्थिर रहें। आँखें भी न झपककर दृष्टि को लक्ष्य पर स्थित करे। लक्ष्य को मुष्टि से आच्छादित (ढक) कर बाण को लक्ष्य की सीध में करे। मन और

---

१. स्थानके स्थित्वा इति वीरमित्रोदये लक्षणप्रकाशे, पृष्ठ २८८
२. समासौ—वीरमित्रोदये ल० २८८
३. अस्यार्थो हरदयालुस्वामिना हित्वा=त्यक्वा (छोड़कर) इति कृतः। तच्चाशुद्धः।

**अथ शीघ्रसंधानम्—**

**आदानं चैव तूणीरात् संधानं कर्षणं तथा। क्षेपणं च त्वरायुक्तो बाणस्य कुरुते तु यः॥ १३१॥**
**नित्याभ्यासवशात् तस्य शीघ्रसंधानता भवेत्। मुष्ट्यापताकया बाणं स्त्रीचिह्नं दूरपातनम्॥ १३२॥**

**वीरमित्रोदये—**

**प्रत्यालीढकृते स्थाने ह्यधः संघानमाचरेत्। मुष्ट्या पताकया बाणं स्त्रीचिह्नं दूरपातनम्॥**

**अथ दृढभेदिताः—**

**प्रत्यालीढे कृते स्थाने ह्यधः संधानमाचरेत्। दर्दुरस्थानमास्थाय ह्यूर्ध्वं धारणमाचरेत्॥ १३३॥**
**स्कन्धव्यायेन वज्रस्य मुष्ट्या पुंमार्गणेन च। अत्यन्तसौष्ठवाद् बाह्वोर्जायते दृढभेदिता॥ १३४॥**

**शराणां दशगतयः—भारतभावदीपे—**

**उन्मुख्यभिमुखीतिर्यङ्मन्दा गोमूत्रिका ध्रुवा। स्खलिता यमकाक्रान्ता क्रुष्टेतीषुगतीर्विदुः॥**

*—शिरो हृदयपार्श्वदेशस्पृशस्तिस्त्रः*

**मन्दा—ईषद् भिन्नत्वक्। गोमूत्रिका—कवचनिकृन्तनी, सव्यापसव्यगामिनी। ध्रुवा—नियमेन लक्ष्यभेदिनी। स्खलिता लक्ष्यच्युता। यमकाक्रान्ता—लक्ष्यं भित्वाऽसकृन्निर्गता।**

---

दृष्टि को भी लक्ष्य पर स्थित करके बाण को छोड़े। विधि से अभ्यास करनेवाले योद्धा का निशाना कभी नहीं चूकता, क्योंकि उसने श्रम को जीत लिया है॥ १२७-१३०॥

**शीघ्रसंधानम्**—तूणीर (तरकस) से बाण निकालना, धनुष पर चढ़ाना, कान तक खेंचना और फेंकना—इन सब कार्यों का जो शीघ्रतासहित नित्य अभ्यास करता है, उसकी शीघ्रसन्धान-सिद्धि हो जाती है॥ १३१½॥

**दूरपात**—पताका नामक मुष्टि से स्त्रीचिह्नयुक्त बाण दूर जाकर गिरता है॥ १३२॥

**वीरमित्रोदय में**—प्रत्यालीढ़ स्थान में स्थित होकर अधःसन्धान करे और पताकामुष्टि तथा स्त्रीचिह्न बाण का सन्धान करे तो यह दूर जाकर लक्ष्य को मारता है।

**दृढ़भेदिता**—प्रत्यालीढ स्थान में स्थित होकर अधः सन्धान करे। दर्दुरस्थान में स्थित होकर ऊर्ध्व सन्धान करे। स्कन्ध व्याय से धनुष खेंचकर वज्रमुष्टि से पुरुष बाण को फेंके। समुचित रूप से भुजाओं द्वारा फेंकने पर पूर्वोक्त प्रकार से दृढ़ लक्ष्य के भेदन की सिद्धि (सफलता) प्राप्त हो जाती है॥ १३३-१३४॥

## शरों की दश गतियाँ

**१. उन्मुखी०**—शिर का स्पर्श करनेवाली।

**२. अभिमुखी**—हृदय का वेधन करनेवाली।

**३. तिर्यक्**—शर को तिरछा छोड़ने पर पार्श्वभागों में प्रहार करनेवाली।

**४. मन्दा**—जिससे त्वचामात्र ही आहत हो।

**५. गोमूत्रिका**—जिस प्रकार बैल चलता हुआ मूत्र करे, उसकी आकृति भूमि पर जैसी बनती है, उस सदृश बाण की गति गोमूत्रिका कहलाती है। इससे कवच काटा जाता है। इसमें बाण दायें या बायें जाते हैं।

**क्रुष्टा**—लक्ष्यैकदेशस्य बाह्वादेर्हन्त्रीति नवगतयः। दशमी गतिस्तु शिरसा सह दूरपातिनी अतिक्रुष्टा नाम। —*महाव्कर्णपर्व २०।२२ (भारतभावदीप, पृष्ठ ३३)*

**अथ हीनगतयः—वाशिष्ठधनुर्वेदे—**

**सूचीमुखा मीनपुच्छा भ्रमरी च तृतीयका। शराणां गतयस्तिस्त्रोऽप्रशस्ताः कथिता बुधैः॥ १३५॥**
**सूचीमुखा गतिस्तस्य सायकस्य प्रजायते। पत्रं विलोपितं यस्य ह्यथवा हीनपत्रकम्॥ १३६॥**
**कर्करीतन्तु चापेन यैः कृष्टो हीनमुष्टिना। मत्स्यपुच्छा गतिस्तस्य सायकस्य प्रकीर्तिता॥ १३७॥**
**भ्रमरी कथिता ह्येषा शिवेन श्रमकर्मणि। ऋजुत्वेन विना याति क्षेप्यमाणस्तु सायकः॥ १३८॥**
—*वा ध०*

**अथ बाणानां लक्ष्यस्खलनगतयः—**

**वामगा दक्षिणा चैव ऊर्ध्वगाऽधोगमा तथा। चतस्त्रो गतयः प्रोक्ता बाणस्खलनहेतवः॥ १३९॥**
**कम्पते गुणमुष्टिस्तु मार्गणस्य तु पृष्ठतः। संमुखी स्याद् धनुर्मुष्टिस्तदा वामे गतिर्भवेत्॥ १४०॥**
**ग्रहणं शिथिलं यस्य ऋजुत्वेन विवर्जितम्। पार्श्वं तु दक्षिणं याति सायकस्य न संशयः॥ १४१॥**
**ऊर्ध्वं भवेच्चापमुष्टिर्गुणमुष्टिरधो भवेत्। स मुक्तो मार्गणो लक्ष्यादूर्ध्वं याति न शंसयः॥ १४२॥**

---

६. **ध्रुवा**—निश्चित रूप से लक्ष्य का भेदन करनेवाली।

७. **स्खलिता**—लक्ष्य से रहित गति।

८. **यमकाक्रान्ता**—जिसमें लक्ष्य को वेधन करके बाण आर-पार निकल जाये।

९. **क्रुष्टा**—लक्ष्य के एक देश बाहु आदि को काटनेवाली।

१०. **अतिक्रुष्टा**—जिसमें लक्ष्य के शिर को काटकर बाण शिरसहित दूर जाकर गिरे।

**हीनगति**—सूचीमुख, मीनपुच्छ और भ्रमरी ये धनुर्वेदविशारदों ने अप्रशस्त गतियाँ कही हैं॥ १३५॥

सूचीमुख (ऊपर-नीचे जाना) गति उस शर की हो जाती है, जिसके पंख ठीक न बँधे हुए हों, अथवा कम या छोटे हों॥ १३६॥

गाँठ की डोरीवाला धनुष हीन (हल्की) मुष्टि से खेंचने पर बाण की मत्स्यपुच्छ (मछली की पूँछ के सदृश पीछे का भाग दायें या बायें हो जाना) गति हो जाती हैं॥ १३७॥

भ्रमरीगति श्री महादेवजी ने उस शर की कही है, जो फेंकने पर सीधा न जाये अपितु भ्रमरों की भाँति चक्कर लगाता हुआ जाये॥ १३८॥

**बाणों का लक्ष्य पर न लगना**—वामगा (बाँयी ओर) दक्षिणा (दाहिनी ओर) ऊर्ध्वगा (ऊपर) एवं अधः (नीचे) ये चार गति निशाना चूकने की हेतु है॥ १३९॥

जब पीछे की गुणमुष्टि काँपती हो। (ढीली पकड़ी हुई हो) और धनुष की मुष्टि सामने रहे तो बाण की बायीं ओर गति हो जाती है, अर्थात् लक्ष्य के बायें ओर बाण जाकर लगता है॥ १४०॥

जिस शर को ढीला पकड़ा गया हो एवं जो सीधा भी न हो वह निश्चितरूप से लक्ष्य के दाहिने ओर जाता है॥ १४१॥

चापमुष्टि ऊँची एवं गुणमुष्टि नीचे रहने पर छोड़ा हुआ बाण लक्ष्य से ऊँचा जाता है॥ १४२॥

**मोक्षणे चैव बाणस्य चापे मुष्टिरधो भवेत्। गुणमुष्टिर्भवेदूर्ध्वं तदाधोगामिनी गतिः॥ १४३॥**

**अथ शुद्धगतयः—**

**लक्ष्यबाणाग्र दृष्टिनां संगतिस्तु यदा भवेत्। तदानीं मुञ्चितो बाणो लक्ष्यान्न स्खलति ध्रुवम्॥ १४४॥**
**निर्दोषः शब्दहीनश्च सममुष्टि द्वयोज्झितः। भिनत्ति दृढवेध्यानि सायको नास्ति शंसयः॥ १४५॥**
**स्वाकृष्टस्तेजितो यश्च सुशुद्धो गाढमुष्टितः। नरनागाश्वकायेषु न तिष्ठति स मार्गणः॥ १४६॥**
**यस्य तृणसमा बाणा यस्येन्धनसमं धनुः। यस्य प्राणसमा मौर्वी स धन्वी धन्विनां वरः॥ १४७॥**

**अथ दृढचतुष्कम्—**

**अयश्चर्म घटश्चैव मृत्पिण्डश्च चतुष्टयम्। यो भिनत्ति न तस्येषुर्वज्रेणापि विदार्यते॥ १४८॥**
**सार्द्धाङ्गुलप्रमाणेन लोहपत्राणि कारयेत्। तानिभित्वैकबाणेन दृढघाती भवेन्नरः॥ १४९॥**
**चतुर्विंशति चर्माणि योभिनत्तीषुणा नरः। तस्य बाणो गजेन्द्रस्य कायं निर्भिद्य गच्छति॥ १५०॥**
**भ्राम्य जले घटो वेध्यश्चक्रे मृत्पिण्डकं तथा। भ्रमन्तं वेधयेद् यो हि दृढभेदी स उच्यते॥ १५१॥**
**अयस्तु काकतुण्डेन चर्म चारामुखेन हि। मृत्पिण्डं च घटं चैव विध्येत्सूचीमुखेन वै॥ १५२॥**

—*वा० ध०*

---

इसी प्रकार बाण छोड़ते समय चापमुष्टि नीचे और गुणमुष्टि ऊपर होने पर बाण की अधोगामी गति हो जाती है॥ १४३॥

लक्ष्य, बाण की नोक और दृष्टि—ये तीनों जब एक सीध में सङ्गत हो जाते हैं, उस समय छोड़ा हुआ बाण निश्चितरूप से लक्ष्य पर जाकर लगता है॥ १४४॥

निर्दोष, शब्दहीन, दोनों मुष्टियों को सम—एक सीध में करके छोड़ा हुआ सायक बाण दृढ़ वेध्यों को बींध देता है, इसमें संशय नहीं है॥ १४५॥

भली प्रकार खेंचा हुआ, तीक्ष्ण, सीधा और उत्तम पंखयुक्त बाण (दृढ़मुष्टि से छोड़ा हुआ बाण) पुरुष, घोड़ा, हाथी के शरीर में भी नहीं ठहरता अर्थात् इनका भी छेदन करके पार हो जाता है॥ १४६॥

जिसके बाण तिनके के समान (हल्के) हों, धनुष ईंधन के सदृश (सूखे और उत्तम काष्ठयुक्त) एवं प्रत्यञ्चा प्राण के तुल्य सूक्ष्म हो, वह धनुर्धर धनुषधारियों में सर्वश्रेष्ठ होता है॥ १४७॥

**दृढ़ लक्ष्य**—लोहा, चर्म, घड़ा और मिट्टी का पिण्ड—इनका जो छेदन करे, उसका बाण वज्र से भी नहीं कटता॥ १४८॥

डेढ़ अङ्गुल मोटे लोहे के पत्रे बनवाकर, उन्हें जो एक बाण से छेदे, उसे दृढ़घाती कहते हैं॥ १४९॥

चौबीस चर्म एक साथ इकट्ठे करने पर जो उन्हें एक बाण से ही वेधता है, उसका बाण बड़े भारी हाथी को भी भेदकर पार निकल जाता है॥ १५०॥

इस प्रकार जल में घड़ा घुमाकर या एक कुम्हार के घूमते हुए चाक पर मिट्टी के पिण्ड का जो भेदन कर देता है, उसे दृढ़भेदी कहते हैं॥ १५१॥

लोहे का काकतुण्ड से, चर्म का आरामुख से, मिट्टी के पिण्ड एवं घड़े का सूचीमुख बाण से भेदन करे॥ १५२॥

**मानसोल्लासे—दृढलक्ष्यानां प्रमाणम्—**

**शुष्कचर्मशतं गव्यमहोरात्रं जले स्थितम्। षोडशाङ्गुलविस्तीर्णं दृढबद्धं च रज्जुभिः॥ १३०॥**
**इदं चर्म दृढं प्रोक्तं गजचर्मसमं बुधैः। एवं विंशतिरश्वश्च चर्माण्यष्टौ नरस्य तु॥ १३१॥**
**एवं सर्वदृढानां हि गजवाजिनृणां क्रमः। कथितः सोमभूपेन जामदग्न्यमतानुगः॥ १३२॥**
**षड्विंशदङ्गुलां भस्त्रां छागमांसेन पूरयेत्। एतन्मांसं दृढं विध्येद् गजकायप्रमाणकम्॥ १३३॥**
**गजराजाश्वखुरो धोतेः समन्तात् परिशोषितम्। दृढमश्वखुरं नाम मध्ये मातङ्गमानकम्॥ १३४॥**
**विषाणं सप्तवर्षस्य महिषस्य प्रगृह्य च। मूलाग्रवर्जितं मध्ये द्विपकायसमं दृढम्॥ १३५॥**
**सूत्रं पञ्चाङ्गुलोत्सेधं तिर्यगायामकल्पितम्। निबिडं चर्मणा बद्धं विध्येत् कारिसमं दृढम्॥ १३६॥**
**कूर्मपृष्ठकपालं तु हस्तविस्तारवर्तुलम्। विध्येदस्थि दृढनाम कुञ्जराङ्गप्रमाणकम्॥ १३७॥**
**षड्विंशदङ्गुलं स्थौल्याद्वाल्कजङ्गनपिण्डितम्। रज्जुभिर्वेष्टितं विध्येद् दन्तिदेहसमं नृपः॥ १३८॥**

---

**मानसोल्लास में दृढ़ लक्ष्यों का परिमाण**—गाय के सौ चमड़े एक दिन-रात जल में रखे हुए सोलह अङ्गुल मोटाईवाले रस्सियों से परस्पर सुदृढ़ बँधे होने पर, यह दृढ़ चर्म का प्रमाण हाथी के चर्म के सदृश माना गया है, अर्थात् पूर्वोक्त सौ चर्मों का एक बाण से भेदन करने पर धनुर्धर का तीर हाथी के शरीर से आर-पार निकल जाता है॥ १३०½॥

इसी प्रकार अश्व के शरीर का प्रमाण बीस चमड़ों के बराबर और मनुष्य का आठ चर्म के समान होता है॥ १३१॥

यह गज, अश्व और मनुष्यों के शरीर-सदृश दृढ़ लक्ष्यों का प्रमाण सोमेश्वर महाराज ने जमदग्नि के मतानुसार कहा है॥ १३२॥

छब्बीस (कुछ के मत में छत्तीस) अङ्गुल मोटी चमड़े की थैली में बकरे का मांस भर दे। इसको एक तीर से वेधना हाथी के शरीर के भेदन के सदृश होता है॥ १३३॥

संग्राम में हाथी एवं अश्वों द्वारा निःशेष किया हुआ घोड़े का खुर (सुम) हाथी के शरीर का मध्यमान है, अर्थात् उस खुर को जो भेदे उसका तीर हाथी के शरीर के मध्य भाग तक चला जायेगा॥ १३४॥

सात वर्ष के भैंसे का सींग मूल एवं सिरे को छोड़कर मध्यभाग हाथी के शरीर के सदृश दृढ़ प्रमाणवाला होता है॥ १३५॥

पाँच अङ्गुल मोटा रस्सा चारों ओर से चर्म से आवेष्टित तिरछा बँधा हुआ बींधने पर हाथी के शरीर सदृश ही दृढ़ लक्ष्य का वेधन माना गया है॥ १३६॥

कछुवे की खोपड़ी एक हाथ चौड़ी गोलाकार को भेदन करना हाथी के किसी अङ्ग के भेदन के सदृश ही होता है॥ १३७॥

छब्बीस अङ्गुल मोटे वल्कल (छाल) का पिण्ड बनाकर उसे रस्सी से लपेटे इसका प्रमाण हाथी के समान होता है॥ १३८॥

**भ्रमत्कुलालचक्रस्थं मृदः पिण्डं नवाङ्गुलम्। दृढं प्रवाहितं विध्येत्समं नागेन चर्मणा॥ १३९॥**
**विध्येत् सुदृढकाष्टं तु षोडशाङ्गुलमायतम्। अङ्गुलोत्सेधमानं यद् गजराजसमं भवेत्॥ १४०॥**
**कार्पासनिर्मितं पुञ्जमुत्सेधेन षडङ्गुलम्। चर्मनद्धं दृढं विध्येत् सिन्धुराङ्गसमं नृपः॥ १४१॥**
**करीषधान्यपांसूनां पृथक् पर्णं तु कर्कशम्। अष्टाङ्गुलं दृढं विध्येद् वारणाङ्गसमं नृपः॥ १४२॥**
**द्वयङ्गुलां मांसवर्णां च षोडशाङ्गुलविस्तृताम्। शिलां विध्येद् दृढं सम्यक्स्तम्बेरमसमं नृपः॥ १४३॥**
सोडशाङ्गुलविस्तीर्णमुत्सेधे सर्षपास्त्रयः। आयसं दृढमेतत् तु विध्येत् सगजसन्निभम्॥ १४४॥
दृढान्येतानि बध्नीयात् स्तम्भशाखा द्वयान्तरे। त्रिवारं प्रमितेनैव नरवक्षः समुन्नतौ॥ १४५॥
भित्वा तानि विर्निगत्य विभिद्याग्रेण भूतलम्। यथावत्तिष्ठते बाणस्तथा विध्येत् क्रियायुतः॥ १४६॥

*—मानसोल्लासः १० भाग २ अ० १ विं० ४*

**मानसोल्लासे चित्रवेधविधयः—**

**चित्रं कुतूहलकरं प्रेक्षकाणां मनोहरम्। दर्शयेत् तदपि प्रौढ्या विनोदाय महीपतिः॥ १५७॥**
**स्तम्भस्योपरि विन्यस्तचक्रयन्त्रे सुकीलितम्। वायुप्रेरितपत्रैस्तु भ्राम्यमाणं द्रुतं झषम्॥ १५८॥**
**पात्रमध्ये स्थिते तोये वीक्ष्य विध्यन् विलोचने। प्रत्यालीढस्थितो राजा राधावेधं प्रदर्शयेत्॥ १५९॥**

---

कुम्हार के चक्र पर घूमते हुए ९ अङ्गुल मिट्टी के पिण्ड को भेदना हस्ति के चर्म जितना होता है॥ १३९॥

सुदृढ़ काष्ठ सोलह अङ्गुल चौड़ा और एक अङ्गुल मोटा बींधने पर हाथी के शरीर जितना वेध होता है॥ १४०॥

कपास (रूई) से बनाया हुआ ६ अङ्गुल मोटा पिण्ड चमड़े से मंढा हुआ राजा बींधे। यह हाथी के अङ्ग-समान लक्ष्य होता है॥ १४१॥

सूखे गोबर, अन्न, मिट्टी एवं पत्ते आदि से बने हुए आठ अङ्गुल मोटे पिण्ड को राजा बींधे। यह हाथी के अङ्ग-सदृश होता है॥ १४२॥

दो अङ्गुल मोटी, मांस के समान वर्णवाली (लाल पत्थर) और सोलह अङ्गुल विस्तारवाली दृढ़ शिला को राजा हाथी-तुल्य लक्ष्य मानकर उसका भेदन करे॥ १४३॥

सोलह अङ्गुल विस्तृत और तीन सरसों के जितना मोटा लोहे का पत्र जोकि हाथी के समान ही दृढ़ होता है, इसका वेध करे॥ १४४॥

यह सब दृढ़ लक्ष्य दो खम्भों को गाड़कर उनकी शाखाओं (अन्तिम सिरों) में बाँधे अथवा मनुष्य की छाती जितनी ऊँचाई पर तीन पैरोंवाली (टिकटी या तिपाई) जिसपर अध्यापक काष्ठ फलक (ब्लैकबोर्ड) रखते हैं, पर रखे॥ १४५॥

इन लक्ष्यों को भेदकर आगे जाकर भूमि में बाण सीधा गड़ जावे, उस प्रकार से क्रिया-युक्त होकर राजा वेधन का अभ्यास करे॥ १४६॥

**मानसोल्लास में चित्रवेधविधियाँ**—दर्शकों में आश्चर्य पैदा करनेवाले चित्रलक्ष्यादि का प्रदर्शन भी राजा अपने हस्तलाघव (हाथ की सफाई) से विनोदार्थ करे॥ १५७॥

**१. राधावेधः**—स्तम्भ के ऊपर लगा हुआ यन्त्र जिसके पंखे वायु द्वारा घूम रहे हों, उसमें लगी हुई मछली की दोनों आँखों का प्रतिबिम्ब नीचे स्थित पानी के बड़े पात्र में देखकर प्रत्यालीढ़

खर्जूरी सदृशाकारं कृत्वा दारुमयं तरुम्। नाराचैः शतशो विध्येत् स्थाने कण्टकपत्रयोः ॥ १६० ॥
पत्राणि कण्टकाश्चैव सायकैरेव कल्पयेत्। खर्जूरीवेधनं चित्रं प्रेयसीनां प्रदर्शयेत् ॥ १६१ ॥
वृषलं सम्मुखं कृत्वा पत्रं वक्षसि विन्यसेत्। तदेव तिर्यग् मोक्षेण बाणपुङ्खेन धारयेत् ॥ १६२ ॥
पत्रच्छेदमिदं चित्रं चित्तभ्रान्तिकरं नृणाम्। रसं विस्मयमातन्वन् दर्शयेद् वेधमुत्तमम् ॥ १६३ ॥
एकसन्धानयुक्ताभ्यां बाणाभ्यां लक्ष्ययुग्मकम्। विध्यन् प्रदर्शयेच्चित्रं यमलार्जुनसंज्ञकम् ॥ १६४ ॥
अत ऊर्ध्वं स्थितं लक्ष्यमेकमोक्षेण बाणयोः। विकटार्जुनकं चित्रं नृपो विध्यन् विनोदयेत् ॥ १६५ ॥
अर्धचन्द्राकृती कृत्वा तर्जन्यङ्गुष्ठकौ ततः। तृणकाण्डं तयोरग्रे धारितं चतुरङ्गुलम् ॥ १६६ ॥
अङ्गुल्यनुपपातेन तद् विध्यन् पृथिवीपतिः। अर्धचन्द्राह्वयं चित्रं दर्शयेच्च सभासदाम् ॥ १६७ ॥
सन्धतः सायकस्त्वेको द्वितीयः सम्मुखः स्थितः। द्वावेतावेक मोक्षेण पुरः पश्चाच्च गच्छतः ॥ १६८ ॥
पूर्वापरस्थितं लक्ष्यं प्रविध्यन्नवनीपतिः। मालाविद्याधरं चित्रं दर्शयेच्चित्रवेष्टितम् ॥ १६९ ॥
चतुर्भिरधिकाशीतिश्चित्राणामवनीभुजा। इत्थं प्रदर्शनीयाः स्याद् द्वापञ्चाशत् तु दुष्कराः ॥ १७० ॥

---

विधि से स्थित होकर राजा उस मछली का वेध करे। इसे राधावेध कहते हैं ॥ १५८-५९ ॥

**२. खर्जूरी वेधः**—खजूर के समान काष्ठ का वृक्ष बनवाकर राजा सैकड़ों नाराच बाणों को इस प्रकार से मारे कि वे उस वृक्ष में जाकर खजूर के पत्ते एवं काँटों की भाँति गड़ जायें। इस प्रकार बाणों से ही खजूर के पत्रे एवं काँटो का बनाना खर्जूरी वेध होता है। इस चित्रवेध का प्रदर्शन राजा अपनी प्रियतमाओं के समक्ष करे ॥ १६०-१६१ ॥

**३. पत्रच्छेद**—किसी वृषल (शूद्र) को सामने खड़ा करके उसकी छाती पर एक पत्ता या काग़ज़ रखे। उसको तिरछा बाण छोड़के छेदन कर बाण के पंखों में धारण करे। यह पत्रच्छेद नामक वेध लोगों को चकित करनेवाला है। रस और विस्मय से युक्त इस उत्तम लक्ष्य का प्रदर्शन राजा करे ॥ १६२-१६३ ॥

**४. यमलार्जुन**—एक ही बार प्रत्यञ्चा पर चढ़ाये गये दो बाणों से एक साथ ही दो लक्ष्यों का वेधन राजा करे, इसे यमलार्जुन कहते हैं ॥ १६४ ॥

**५. विकटार्जुन**—इसी प्रकार एक बार में ही दो बाणों से नीचे और ऊपर स्थित दो लक्ष्यों को एक साथ वेधना विकटार्जुन कहा गया है। राजा इस वेध को प्रदर्शित करके दर्शकों का मनोरञ्जन करे ॥ १६५ ॥

**६. अर्धचन्द्राह्वय वेध**—तर्जनी और अङ्गुठे की अर्धचन्द्र जैसी आकृति करके उसमें चार अङ्गुल लम्बे तिनके को अग्रभाग से पकड़े। अङ्गुली को चोट नहीं लगे इस प्रकार ध्यान रखता हुआ राजा उसका वेधन सभासदों के समक्ष करे ॥ १६६-१६७ ॥

**७. मालाविद्याधर**—एक बाण धनुष पर चढ़ाकर दूसरा उसके सामने (आगे) लगाये। इन दोनों को एक ही बार छोड़े। इस प्रकार आगे-पीछे एक साथ जाते हुए दोनों निकट एवं दूर लक्ष्यों को वेधता हुआ राजा आश्चर्यजनक मालाविद्याधर लक्ष्यवेध का प्रदर्शन करे ॥ १६८-१६९ ॥

राजा को इसी प्रकार चौरासी चित्रवेध दिखाने चाहियें। इनमें बावन लक्ष्यवेध तो अतीव कठिन (परिश्रम साध्य) हैं ॥ १७० ॥

**वाशिष्ठधनुर्वेदे चित्रलक्ष्यवेधः—**

बाणभङ्गकरावर्तं काष्ठच्छेदनमेव च। बिन्दुकं गोलकं युगं यो वेत्ति स जयी भवेत्॥ १५२॥
लक्ष्यस्थाने धृतं काण्डंसम्मुखं छेदयेत्ततः। किञ्चिन्मुष्टिं विधाय स्वां तिर्यग्द्विफलकेषुणा॥ १५३॥
सम्मुखं बाणमायान्तं तिर्यग्बाणं न सञ्चरेत्[1]। प्राप्तं शरेण यच्छिंद्याद्बाणच्छेदी स उच्यते॥ १५४॥
काष्ठेऽश्वकेशं संयम्य तत्र बद्धां वराटिकाम्। हस्तेन भ्राम्यमाणञ्च यो हन्ति स धनुर्धरः॥ १५५॥

**अथ काष्ठच्छेदनम्—**

लक्ष्यस्थाने न्यसेत्काष्ठं सार्द्रं गोपुच्छसन्निभम्। यश्छिन्द्यात्क्षुरप्रेण काष्ठच्छेदी स जायते॥ १५६॥

**३. बिन्दुवेधः—**

लक्ष्ये बिन्दुं न्यसेच्छुभ्रं शुभ्रबन्धूकपुष्पवत्। हन्ति तं बिन्दुकं यस्तु चित्रयोधा स उच्यते॥ १५७॥

**४. गोलकवेधः—**

काष्ठगोलयुगं क्षिप्रं दूरमूर्ध्वं पुरा स्थितैः। असम्प्राप्तं शरं पृष्ठे[2] तद् गोपुच्छमुखेन हि॥ १५८॥
यो हन्ति शरयुग्मेन शीघ्रसन्धानयोगतः। स स्याद् धनुर्भृतां श्रेष्ठः पूजितः सर्वपार्थिवैः॥ १५९॥

---

**वाशिष्ठधनुर्वेद में चित्रलक्ष्यवेध**—हाथ को तिरछा करके बाण को काटना, काष्ठ का छेदन, बिन्दु का भेदन और दो गोलों को वेधना इन सबको जो जानता है, वह विजयी होता है॥ १५२॥

लक्ष्य के स्थान पर गड़े हुए शर को सामने से ही गुणमुष्टि को कुछ तिरछा करके दो फलकवाले बाण (द्विभल्ल या अर्धचन्द्र) से छेद दे॥ १५३॥

सामने से आते हुए बाण के छेदनार्थ अपने बाण को तिरछा न चलावे, किन्तु आप तिरछा होकर बाण को काट दे। बाण को बाण से काटने पर बाणच्छेदी कहलाता है॥ १५४॥

काष्ठ की डण्डी में घोड़े का एक बाल बाँधकर, उसमें एक कोड़ी को बाँधकर हाथ से घुमावे। इस घूमती हुई कोड़ी अथवा बाण को जो छेद दे, वह धनुर्धर कहलाता है॥ १५५॥

**काष्ठच्छेदन**—लक्ष्य के स्थान पर गीला, गोपुच्छ के सदृश काष्ठ लगाये। इसको क्षुरप्र बाण से जो काट दे वह काष्ठछेदी कहलाता है॥ १५६॥

**बिन्दुवेध**—लक्ष्य स्थान पर विजयसार के पुष्प के सदृश एक श्वेत बिन्दु स्थापित करे जो उस बिन्दु को निशाना बनावे, उसे चित्रयोद्धा कहा जाता है॥ १५७॥

**गोलकवेध**—सामने स्थित व्यक्ति के द्वारा आकाश में बहुत ऊँचे फेंके हुए दो काष्ठ के गोलों को जो भूमि पर गिरने से पहले ही सन्धानपूर्वक गोपुच्छ बाण से शीघ्र दो शरों से बींध दे, वह धनुर्धारियों में सर्वश्रेष्ठ है और सभी राजाओं द्वारा पूजित होता है॥ १५८-१५९॥

---

१. वीरमित्रोदयेऽयं पाठः।
सम्मुखं च समायान्तं तिर्यग्वायान्तमम्बरे। शरं शरेण यश्छिन्द्याद् बाणभेदी स उच्यते॥
२. असम्प्रातं धरापृष्ठे इति वीरमित्रोदये।

**अथ धावल्लक्ष्यम्—मानसोल्लासे—**

**चलं पञ्चविधं लक्ष्यं दर्शयेत् तस्य वेधनम्॥ १५१॥**

**तिर्यग्धावंस्तथा गच्छन् भ्राम्यंश्चैव तथोत्पतन्। आकाशे भूतले तोये तेषां स्थानमुदाहृतम्॥ १५२॥**

*—भाग २ पृष्ठ १६७*

**वाशिष्ठधनुर्वेदे—**

**वामादायाति यल्लक्ष्यं दक्षिणं हि प्रधावति। तच्छिंद्याच्चापमाकृष्य सव्येनैव पाणिना॥ १६१॥**

**तथैव दक्षिणायान्तु विध्येद् बाणाद् धनुर्धरः। आलीढक्रममारोप्य त्वरा हन्याच्च तं नरः॥ १६२॥**

**वायोरपि बलं दृष्ट्वा वामदक्षिणवाहतः। लक्ष्यं सः साधयेदेवं गाधिपुत्र नृपात्मज॥ १६३॥**

**वायुपृष्ठे दक्षिणे च वहन् सूचयते बलम्। सम्मुखीनश्च वामश्च भटानां भङ्गसूचकः॥ १६४॥**

**अथ शब्दवेधित्वम्—**

**लक्ष्यस्थाने न्यसेत् कांस्यपात्रं हस्तद्वयान्तरे। ताडयेच्छर्कराभिस्तच्छब्दः सञ्जायते तदा॥ १६५॥**

**यत्र चैवोद्यते शब्दस्तं सम्यक्तत्र चिन्तयेत्। कर्णेन्द्रियमनो योगाल्लक्ष्यं निश्चयतां नयेत्॥ १६६॥**

**पुनः शर्करया तच्च ताडयेच्छब्दहेतवे। पुनर्निश्चयतां नेयं शब्दस्थानानुसारतः॥ १६७॥**

---

**मानसोल्लास में दौड़ते हुए लक्ष्य का वेधन**—चल लक्ष्य पाँच प्रकार का होता है। राजा उनका वेधन करके दिखाये। ये पाँच लक्ष्य निम्न हैं—तिरछा चलता हुआ, दौड़ता हुआ, चलता हुआ, घूमता हुआ और उड़ता हुआ। इनका स्थान आकाश, भूमि और जल में कहा है॥ १५१-१५२॥

**वाशिष्ठधनुर्वेद में दौड़ते हुए लक्ष्य को मारना**—जो लक्ष्य बाईं ओर से दाहिनी ओर को दौड़ रहा हो, उसे बायें हाथ से ही धनुष खेंचकर मारे॥ १६१॥

इसी प्रकार दाहिनी ओर से आते हुए लक्ष्य को आलीढ़ स्थान में स्थिर हो, शीघ्र ही मार गिरावे॥ १६२॥

बायीं या दाहिनी ओर से चलते हुए वायु के वेग को देखकर ही हे विश्वामित्र! धनुर्धर लक्ष्य का साधन करे॥ १६३॥

(यदि वायु बायीं ओर से चलता हो तो धनुष को दाहिनी ओर तथा दाहिनी ओर से वायु चलने पर बायीं ओर झुका दे)।

पीठ पीछे का या दाहिनी ओर का वायु संग्राम में विजयकारक होता है, एवं सामने का तथा बाईं ओर का वायु पराजय देनेवाला होता है, क्योंकि इस स्थिति में लक्ष्य पर निशाना ठीक नहीं लगता॥ १६४॥

**शब्दवेध**—रात्रि के अन्धकार में लक्ष्य के स्थान पर दो हाथ के अन्तर पर कांसी का पात्र स्थापित करके उसपर मिट्टी का ढेला या कंकरी मारे, जिससे कि शब्द निकले॥ १६५॥

जहाँ शब्द उत्पन्न हो उस स्थान का भली प्रकार चिन्तन करे और मन के योग से स्थान और लक्ष्य का निर्धारण करे॥ १६६॥

फिर शब्द करने के लिये शर्करा से पात्र पर ताड़ना करे और शब्द के अनुसार स्थान एवं लक्ष्य का निर्धारण करे॥ १६७॥

**ततः किञ्चित्कृतं दूरं नित्यं नित्यं विधानतः। लक्ष्यं समभ्यसेद् ध्वान्ते शब्दवेधनहेतवे॥ १६८॥**
**ततो बाणेन हन्यात् तदवधानेन तीक्ष्णधीः। [1]एतच्चदुष्करं कर्म भाग्ये कस्यापि सिद्ध्यति॥ १६९॥**

### अथ प्रत्यागमनम्—

**खगं बाणं तु राजेन्द्र प्रक्षिपेद् वायुसम्मुखे। रञ्जकस्य च नालाभिरतो ह्यागमनं भवेत्॥ १७०॥**

### शरक्षेपण क्षमता—

चतुः शतैश्च काण्डानां यो हि लक्ष्यं विसर्जयेत्। सूर्योदये चास्तमाने स ज्येष्ठो धन्विनां भवेत्॥ १०८॥
त्रिंशतैर्मध्यमश्चैव द्विशताभ्यां कनिष्ठकः। —वा० ध०

### श्रमकालः—

**एवं श्रमविधिं कुर्याद् यावत् सिद्धिः प्रजायते। श्रमे सिद्धे च वर्षासु नैव ग्राह्यं धनुष्करे॥ १६३॥**
**पूर्वाभ्यासस्य शस्त्राणामविस्मरणहेतवे। मासद्वयं श्रमं कुर्यात् प्रतिवर्षे शरदृतौ॥ १६४॥**
—वा० ध०

---

उसके पश्चात् इसका अभ्यास हो जाने पर लक्ष्य को कुछ दूर करता हुआ प्रतिदिन अभ्यास को बढ़ावे। यह अभ्यास अन्धकार में करे॥ १६८॥

लक्ष्य के निश्चय में सफलता मिलने पर तीक्ष्ण बुद्धिवाला योद्धा सावधान होकर उसे बाण से निशाना बनावे। यह अत्यन्त दुष्कर कार्य किसी-किसी के ही भाग्य में सम्भव होता है॥ १६९॥

**बाण का वापस आना**—हे विश्वामित्र! खग नामक बाण जोकि रञ्जक (बारूद) की नलियों से युक्त होता है, वायु के सामने फेंकने से वह पुनः स्वस्थान पर आ जाता है॥ १७०॥

**शरक्षेपण क्षमता**—जितने समय में सूर्य उदय और अस्त होता है उतने काल में जो चार सौ बाणों को लक्ष्य पर छोड़े, वह धनुर्धरों में श्रेष्ठ होता है॥ १०८॥

इसी प्रकार तीन सौ बाण छोड़नेवाला मध्यम और दो सौ छोड़नेवाला अधम होता है।

**श्रमकाल**—इस प्रकार पूर्वोक्त चित्रादि लक्ष्यों में जब तक सिद्धि न हो तब तक धनुष बाण का सतत अभ्यास करे। सफलता मिलने पर वर्षा ऋतु में धनुष का ग्रहण न करे। पूर्व अभ्यास को बनाये रखने के लिये प्रतिवर्ष शरद् ऋतु में दो मास अभ्यास करते रहना चाहिये॥ १६३-१६४॥

---

१. शब्देनानुमिदं लक्ष्यं परापरमुदाहृतम् (मानसो० भाग २ पृ० १६७)
शब्दवेधित्वे दृढप्रहारित्वे.......बोधिसत्व एव विशिष्यते स्म।
(ललितविस्तर, शिल्पसंदर्शन, परिवर्त १२ पृष्ठ १०८)।

# षष्ठ अध्याय

## चक्र

वाशिष्ठ धनुर्वेद में परिगणित सात युद्धों में चक्र का स्थान दूसरा है। सर्वप्रथम ऋग्वेद में चक्र का प्रयोग मिलता है।[१] रामायण में भी अनेक बार चक्र की चर्चा हुई है।[२] महाभारत में श्रीकृष्णजी का सुदर्शनचक्र तो सुप्रसिद्ध है ही। जब शाल्वराज ने सौभविमान में बैठकर द्वारिका पर बमगोले बरसाने प्रारम्भ कर दिये तो श्रीकृष्णजी ने सुदर्शनचक्र को सौभविमान के संहारार्थ फेंका। इसने सौभविमान के दो टुकड़े कर दिये और अपना कार्य पूरा करके पुनः श्रीकृष्णजी के पास लौट आया।[३] इस चक्र की प्राप्ति खाण्डववन-दाह के समय हुई थी। पुराणों में भी इसकी महिमा गाई है।[४] इसी चक्र को पहले विष्णु ने धारण किया था।

विष्णुपुराण में सुदर्शनचक्र की उत्पत्ति में एक आख्यायिका दी है[५] जिसके अनुसार महर्षि विश्वकर्मा ने अपनी पुत्री सूर्या का विवाह सूर्य के साथ किया, परन्तु वह सूर्य के तेज को सहन न करके अपने स्थान पर दासी को नियुक्त करके जङ्गल में चली गई। जब यह वृत्तान्त महर्षि विश्वकर्मा को ज्ञात हुआ तो उसने सूर्य को अपना तेज कम करने के लिये प्रार्थना की। तदनुसार सूर्य को शाण पर चढ़ाकर उसके तेज का आठवाँ भाग पृथक् किया। इस पृथक् किये तेज से महर्षि विश्वकर्मा ने सुदर्शनचक्र की रचना की तथा अवशिष्ट तेज से रुद्र का त्रिशूल, कुबेर का पुष्पक विमान, कार्त्तिकेय की शक्ति और अन्य देवताओं के आयुधों का निर्माण किया। यही कथा मत्स्यपुराण में भी आई है। पद्मपुराण में यह कथा दूसरे ढङ्ग से दी है।[६] इसके अनुसार महादेवजी ने देवों (पृथिवी, जल, अग्नि, वायु) का तेज संगृहीत करके सुदर्शनचक्र को बनाया और उसे विष्णु को दे दिया। यह चक्र अग्नि की ज्वालाओं से युक्त, मन के समान तीव्रगामी और सब आयुधों का संहारक था।

हरिवंशपुराण[७] में भी इस चक्र को आग्नेयास्त्र के रूप में स्वीकार किया है। इसकी अग्नि ज्वाला से पैदल सैनिक तथा घुड़सवार भस्मीभूत होकर भूमि पर गिर पड़े।

यद्यपि ये आख्यायिकाएँ अतिशयोक्तिपूर्ण हैं। पृथिवी से लाखों गुना बड़ा सूर्य शाण पर चढ़ाया नहीं जा सकता। उसका आठवाँ भाग तेज भी पृथक् करना असम्भव है। यह सब

---

१. अनायुधासो असुरा अदेवांश्चक्रेण ता अप वप ऋजीषिन्। —ऋ० ८।९६।९

२. खड्गैश्चक्रैर्गदाभिश्च। —रामा० युद्ध० ५३।९ और भी (युद्ध०—१०९।१७, ८६।२१, ९६।२६)

३. (महा० वन० २१।२)

४. पद्मपुराण उत्तरखण्ड अ० १४५

५. विष्णुपुराण अंश ३ अ० २ श्लोक ८-१२, मत्स्यपुराण ११।२७-३०

६. अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तथा। तेनाकरोन्महादेवः....
चक्रसुदर्शनं नाम ज्वालामालातिभीषणम्॥ —पद्म० पु० उत्तरखण्ड अ० १४५

७. ततः सुधारं ज्वलितं सूर्यमण्डलसंनिभम्। ....
सध्वजः सायुधः साश्वो दग्धोऽर्ककिरणप्रभः। —हरि० भवि० ५५।२१-२२

आलङ्कारिक वर्णन है। सम्भवतः सूर्यकिरणों से ऊर्जा प्राप्त करने की अनुसन्धानशाला के अभियन्ता=इञ्जीनियर को ही सूर्य नाम से पुकारा गया हो। इतना तो निश्चितरूप से कहा जा सकता है कि सुदर्शनचक्र सौर किरणों से सञ्चालित था और जैसे आजकल लेजर बीम या गाइडेड मिसाइल से शत्रु के विमान, राकेट या उपग्रहों को नष्ट करते हैं वैसे ही यह भी सम्भवतः इसी सिद्धान्त पर कार्य करता था।

'नीतिप्रकाशिका' में चक्र की गणना मुक्तायुधों में की गई है।[1] इसके अतिरिक्त दण्डचक्र, धर्मचक्रादि को मुक्तामुक्त आयुधों में गिनाया गया है। इसका भी यही अभिप्राय है कि इसे दिव्यशक्ति के योग से युक्त करके फेंकने से यह लक्ष्य को गिराकर पुनः प्रयोक्ता के पास आ जाता था।

विष्णु की प्रतिमा में सर्वत्र चक्र देखने को मिलता है। जिसके मध्य में नाभि और नाभि में अरे लगे हुये हैं। नाभि के मध्य में छिद्र है और उसमें रस्सी ओतप्रोत है। यहाँ रस्सी से क्या अभिप्राय है यह विचारणीय है। हमारे विचार में रस्सी का प्रयोग चक्र को फेंकने के लिये किया जाता है। जैसे बच्चे घुमानेवाले लट्टू के चारों ओर रस्सी लपेटकर उसे छोड़ देते हैं इसी प्रकार चक्र की नाभि के चारों ओर रस्सी लपेटकर झटके से छोड़ने पर चक्र घूमता हुआ दूर तक जा सकता है।

'मानसोल्लास' में चक्रप्रक्षेपण करने के लिये तर्जनी अङ्गुली से सिंहकर्णमुष्टि की भाँति पकड़कर दाहिने-बायें घुमाकर छोड़ने का निर्देश किया है।[2]

औशनस धनुर्वेद में चक्र का विस्तार से वर्णन किया है इसके अनुसार चार, छह या आठ अरोंवाला चक्र उपयुक्त होता है। विष्णु का चक्र बारह अरों से युक्त था।

यहाँ पर 'अर' शब्द से क्या अभिप्राय है यह विचारणीय है। औशनस धनुर्वेद के सङ्कलनकर्त्ता श्री राजाराम शास्त्री ने इसका अर्थकोण किया है। छह कोणोंवाले चक्र को षडर, आठवाले को अष्टार कहते हैं। ऐसा अर्थ भी गृहीत हो सकता है। ऐसे चक्र पुरातत्त्व-संग्रहालयों में देखने को कहीं-कहीं मिलते भी हैं, परन्तु इसका अर्थ अर (अरा) करना भी समुचित प्रतीत होता है। जैसे गाड़ी के चक्र के मध्य में नाभि होती है और उसमें अरे लगे हुए होते हैं इसी भाँति चक्र की रचना होती है। शुक्रनीति में भी चक्र को कुण्डल की आकृति जैसा बतलाया है। सिखमत के अनुयायी (अकाली) अपनी पगड़ी में चक्र जैसा गोलाकार लोहे का चक्र धारण करते हैं। इसके बाह्य किनारे तीक्ष्ण होते हैं, परन्तु इसमें नाभि नहीं रहती।

यहाँ औशनस धनुर्वेद के प्रमाणानुसार चक्र का स्वरूप, भार, सञ्चालन विधियों का वर्णन किया जाएगा। यद्यपि वर्त्तमान समय में इसका उपयोग देखने को नहीं मिलता, परन्तु यह प्राचीन समय का सशक्त आयुध रहा है, इसमें सन्देह नहीं है।

---

१. नीतिप्रकाशिका, पृष्ठ २१

२. ततोऽष्टारं समादाय चक्रं षडरमेव वा। मुष्टिभिः सिंहकर्णाद्यैर्लक्ष्यं हन्याद् पृथिवीपतिः॥
ईषत् कुञ्चित् तर्जन्यां भ्रामयेद् वामदक्षिणम्। उत्क्षिप्योत्क्षिप्य वेगेन पञ्चसप्तप्रधारयेत्॥
—मानसो० २।१।४।१७२-७४

**औशनसधनुर्वेदे—**

**जमदग्निं प्रति शुक्र उवाच। वत्स! यथाप्रश्नमुपदिश्यमानं निबोध—**

**तत्रोत्तममध्यमाधमभेदेन चक्रं त्रिविधं भवति। संयुक्तमष्टभिरारैरुत्तमं, षडारं मध्यमं, चतुर्भिरारैः सम्पन्नमधमं भवति। तत्र श्लोकः—**

**अष्टारमुत्तमं चक्रं षडारं मध्यमं भवेत्। जघन्यं चतुरारं स्यादिति चक्रं भवेत् त्रिधा॥**

**द्वादशपलमुत्तममेकादशपलं मध्यमं, दशपलमधमञ्चेति बालानां चक्रम्। अबालानान्तु पञ्चाशत् पलमुत्तमं, चत्वारिंशत् पलं मध्यमं, त्रिंशत्पलं कनिष्ठमिति। तथाष्टाङ्गुलमुत्तमं, सप्ताङ्गुलमध्यममधमन्तु षडङ्गुलं भवति बालानाम्। अबालानां तु षोडषाङ्गुलमुत्तमं चतुर्दशाङ्गुलं मध्यममधमं द्वादशाङ्गुलं भवति। तत्र श्लोकौ—**

**द्वादशैकादशदशपलानि क्रमशः शिशोः। त्रिंशच्च चत्वारिंशच्च पञ्चाशत् प्रतिलोमतः॥**

**बालानां त्रिविधं चक्रमष्टसप्तषडङ्गुलम्। अबालस्य द्विरष्टौ स्युर्द्विः सप्त द्वादशापि च॥**

*—वीर० मि० ल० पृष्ठ ३१०*

**त्रिविधं च नेमिप्रमाणं श्रेष्ठं मध्यं कनिष्ठं चेति। तत्र त्र्यङ्गुला प्रथमा नेमिः। सार्द्धद्व्यङ्गुला**

---

जमदग्नि से शुक्र बोले—वत्स! जैसा तुमने प्रश्न किया है तदनुसार उत्तर देते हैं, सुनो—

उत्तम, मध्यम और अधम—ये तीन भेद चक्र के होते हैं। आठ अरोंवाला चक्र उत्तम, छह का मध्यम और चार अरों का चक्र अधम होता है। इसपर श्लोक है—

आठ अरों का चक्र उत्तम, छह का मध्यम और चार का चक्र अधम होता है। इस प्रकार तीन भेद चक्र के होते हैं।

बालकों का चक्र बारह पल का उत्तम, ग्यारह पल का मध्यम और दश पल का अधम होता है। बड़ों द्वारा प्रयुक्त चक्र पचास पल का उत्तम, चालीस का मध्यम और तीस पल का अधम होता है। इस प्रकार बालकों का चक्र आठ अङ्गुल का उत्तम, सात का मध्यम और छह अङ्गुल का अधम होता है। बड़ों का चक्र सोलह अङ्गुल का उत्तम, चौदह का मध्यम और बारह का अधम होता है। इसपर दो श्लोक हैं—

बच्चों के लिये क्रमशः बारह, ग्यारह और दश पल के चक्र उत्तम, मध्यम और अधम हैं। बड़ों के लिये चक्र का भार तीस, चालीस और पचास पल क्रमशः अधम, मध्यम और उत्तम होता है।

इसी प्रकार बच्चों का चक्र आठ, सात, छह और बड़ों का सोलह, चौदह और बारह अङ्गुल प्रमाण का होता है।

—*वी० मि० लक्षणप्रकाशे, पृ० २९६*

**देवीपुराणे—**

**खड्गस्य लक्षणं वक्ष्ये त्रिशिखस्य तु सुन्दरि। नान्यशस्त्रोद्भवं कार्यं मृदुलोहमयं तथा॥**
**स्फुटितं खण्डितं ह्रस्वं सव्रणं सन्धितं तथा। मृदुलोहो अपूज्यस्तु सन्धिते मरणं भवेत्॥**
**सवर्णे चापि हृद्रोगः स्फुटिते पातकी भवेत्। भार्या माता तथा पुत्रो म्रियते खण्डितेन तु॥**
**ह्रस्वेन लाघवं लोके दीर्घं वाऽपि ह्यसिद्धिदम्। अन्यशस्त्रोद्भवेनापि सम्भवेन्मरणं ध्रुवम्॥**

—*वी० मि० ल० पृ० २९९*

**बृहत्संहितायां खड्गलक्षणम्—पञ्चाशत्तमोऽध्यायः**

**अङ्गुलशतार्द्धमुत्तम ऊनः स्यात्पञ्चविंशतिः खड्गः।**
**अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः॥ ११॥**
**स्फुटितो ह्रस्वः कुण्ठो वंशच्छिनोनदृङ् मनोनुगतः।**
**अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः॥ १२॥**

---

कमलिनी के नाल के सदृश छिद्र (रन्ध्र) युक्त और स्वर्ण अङ्गवाले लोहे को खड्गशास्त्र के जाननेवालों ने कङ्कोलवज्र कहा है॥

जिसका अङ्ग भाग बहुत गाँठों–जैसा दिखाई दे उसे ग्रन्थिवज्र कहते हैं। यह बहुत ही दुर्लभ और मूल्यवान् होता है।

**देवीपुराण में**—हे सुन्दरि! त्रिशिख खड्ग के लक्षणों को कहता हूँ। यह खड्ग अन्य शस्त्र जिससे बनते हों, और मृदु लोहे (कच्चे लोहे) से नहीं बनाना चाहिये॥

फूटा हुआ, कटा–फटा, दुर्बल, व्रणयुक्त, जुड़ा हुआ मृदुलोह खड्ग के लिये उपयुक्त नहीं है। सन्धित (जुड़े हुए) लोह से खड्ग बनाने पर मृत्यु होती है॥

व्रणयुक्त से हृदय के रोग, फूटे हुए से पापी और खण्डित लोहे से युक्त खड्गवाले की पत्नी, माता और पुत्र की मृत्यु होती है॥

ह्रस्व लोहे से लोक में अपयश और अधिक [दीर्घ] से कार्य में असफलता तथा दूसरे शस्त्र के लोहे से खड्ग बनवाने पर निश्चितरूप से मृत्यु होती है।

**बृहत् संहिता में खड्ग–लक्षण**—पचास अङ्गुल लम्बा खड्ग उत्तम होता है और पच्चीस अङ्गुल लम्बा खड्ग छोटा होता है। इन दोनों के मध्यमानवाला मध्यम होता है। उस खड्ग की लम्बाई में विषम अङ्गुल अर्थात् पहिला तीसरा पाँचवा आदि पर जो व्रण (खड्ग पर निशान) हो तो अशुभ होता है और सम अङ्गुलमान में शुभकारक होता है॥ ११॥

फूटा हुआ, छोटा, कुण्ठित (जिसकी धार तीखी न हो), वंशप्रदेश (मूल) में टूटा हुआ, दृष्टि और मन को अप्रिय लगनेवाला, अस्वन (ताड़न करने पर जिससे ध्वनि न निकले) ऐसा खड्ग निन्दनीय होता है। इन दुर्गुणों से रहित खड्ग उत्तम होता है॥ १२॥

गोजिह्वा संस्थानो नीलोत्पलवंशपत्रसदृशश्च। करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः॥ ७॥
करवीरोत्पलगजमदघृतकुंकुमकुन्दचम्पकसगन्धः शुभदोऽनिष्टो गोमूत्रपङ्कमेदः सदृशगन्धः॥ २१॥
क्षारोपमश्च भयदुःखदो भवति गन्धः॥ वैदूर्यकनकविद्युत् प्रभो जयारोग्यवृद्धिकरः॥ २२॥

**खड्गपानकरणम्—**

इदमौशनसञ्च[१]—शस्त्रपानं रुधिरेणश्रियमिच्छतः प्रदीप्ताम् ।
हविषा गुणवत् सुताभिलिप्सोः सलिलेनाक्षयमिच्छतश्च वित्तम् ॥ २३॥
वडवौष्ट्रकरेणु दुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिम् ।
झषपित्तमृगाश्ववस्तुदुग्धैः करिहलछिदये स तालगर्भैः ॥ २४॥
आर्कं पयो हुडुविषाणमषीसमेतं पारावताखुशकृता च युक्तं प्रलेपः।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद् हि घातः॥ २५॥
क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत् ।
सम्यक् छितं चाश्मनि नेति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम्॥ २६॥

*—बृहत्संहिता अ० ५०*

---

गौ की जीभ-सदृश आकारवाला, नीले कमल के सदृश, बाँस के पत्ते के समान, कनेर के पत्ते-जैसा जिसका अग्रभाग हो या गोल हो, ऐसे खड्ग उत्तम होते हैं॥ ७॥

कनेर का पुष्प, नीलकमल, हाथी का मद, घृत, केसर, कुन्दपुष्प और चम्पे का पुष्प, इनके गन्ध के समान जिस खड्ग में गन्ध हो वह शुभ होता है। गोमूत्र, कर्दम (कीचड़), वसा, रुधिर और क्षार के सदृश गन्धवाला अशुभ होता है। कछुवा, चर्बी, रुधिर सदृश गन्धवाला खड्ग भय एवं दुःखप्रद होता है। वैदूर्य, सुवर्ण और बिजली के सदृश छविवाला खड्ग जय और आरोग्य की वृद्धि करता है॥ २१-२२॥

**खड्गपानकरण**—शुक्राचार्य ने खड्ग पान करना (पानी चढ़ाना) इस प्रकार कहा है— यश की प्राप्ति के लिये रुधिर का पान दे, अर्थात् शस्त्र को अग्नि में तपाकर रुधिर में बुझावे। गुणवान् पुत्र की इच्छावाला घृत का पान देवे। अक्षय धन को चाहनेवाला जल का पान दे। जो पाप से (दूसरे को मारकर) स्वार्थसाधन करना चाहता हो तो घोड़ी और ऊँटनी के दुग्ध का पान दे। जो खड्ग से हाथी का सूँड काटना चाहता हो वह उस खड्ग को मच्छी का पित्ता, हरिणी, घोड़ी और बकरी का दूध—इन सब में हरताल अथवा तालवृक्ष का गोंद मिलाकर पान देवे॥ २३,२४॥

शस्त्र को तिलों के तेल से चुपड़कर आक का दुग्ध, मेष के सींग को जलाकर उसकी स्याही, कबूतर की बींट, चूहे की मेंगनी इन सबको पीस उसे शस्त्र पर लेप करे। फिर उसको पूर्वोक्त पान देवे और शाण पर उसकी धार लगावे। इस प्रकार तैयार शस्त्र को पत्थर पर मारने से भी उसकी धार नहीं टूटती है॥ २५॥

केले के क्षार में मथन किया हुआ दही मिलाकर एक दिन-रात रख छोड़े। पीछे उसमें

---

१. एवमेवेदं शस्त्रपानमौशनसे धनुर्वेदे खड्गपानप्रकरणे त्रयोदशे पृष्ठे वर्णितम्।

*—वीरमित्रोदये लक्षणप्रकाशे, ३०४ पृष्ठे च*

**मानसोल्लासे खड्गमानादिकम्—**

**ततः खड्ग विनोदेन रञ्जयेत् प्रेक्षकान् भृशम्। क्षुरिकोक्तप्रमाणेन गणयेत् खड्गमुत्तमम्॥ ५४॥**
**पञ्चाशताङ्गुलैः श्रेष्ठः पञ्चत्रिं ( विं ) शतिकोऽवरः। अनयोर्मध्यमानेन मध्यमः परिकीर्त्यते॥ ५५॥**
**अव्रणः पोगलो ( रो ) पेतस्तिर्यग्भेदविवर्जितः। व्रणयुक्तोऽपि निस्त्रिंशो बिल्वकुञ्जरकुण्डलैः॥ ५६॥**
**वर्धमानध्वजछत्रस्वस्तिकैश्च व्रणैः शुभैः। मानहीनो विभिन्नश्च कुण्ठितो ध्वनिवर्जितः॥ ५६॥**
**नेत्रचित्तविरोधी च वर्जनीयो दुरासदः। असिर्मरकतश्यामपोगलैः ( रैः ) परिवर्जितः॥ ५८॥**
**बाणबाहुवनच्छेदी बाणाय शार्ङ्गिणा धृतः। कृपाणः शाद्वलश्यामस्तनुवद्दीर्घपोगरः॥ ५९॥**
**अच्छेद्यो रोहिणीवाहः पौलस्त्येन धृतः पुरा। कुटिलैः पोगरैर्युक्तो वरस्क ( रः के ) सरसन्निभैः॥ ६०॥**
**मत्कुणः करवालोऽयं लोहवर्णो न वर्ण्यते। गोजिह्वा पल्लवप्रख्यः पोगरो यत्र दृश्यते॥ ६१॥**
**असिर्निरवहो नाम द्विषच्छेदकरः शुभः। तरुणीकेशसङ्काशः सूक्ष्मपाण्डुरपोगरः॥ ६२॥**
**भद्राङ्गः करवालोऽयं भद्रकालीकरः स्थितः। राजजम्बूफलश्यामो वक्रपाण्डुरपोगरः॥ ६३॥**

---

जिस लोहे को पान दे शाण पर उसकी भली-भाँति धार चढ़ा ले। ऐसा शस्त्र पत्थर पर मारने से भी नहीं टूटता और दूसरे लोहे पर मारने से भी उसकी धार कुण्ठित नहीं होती॥ २६॥

**मानसोल्लास में खड्ग के मानादि**—छुरिका-विनोद के पश्चात् राजा खड्ग-सञ्चालन के विनोद से दर्शकों का मनोरञ्जन करे। छुरिका के प्रमाण के सदृश ही खड्ग की अङ्गुलमान से गणना करे॥ ५४॥

श्रेष्ठ खड्ग पचास अङ्गुल का, अधम पच्चीस और इनके मध्य का मध्यम होता है॥ ५५॥

व्रणरहित, पोगर (आकृति) से युक्त, तिर्यक् (तिरछापन) आदि के दोष से वर्जित अथवा व्रणवाला होने पर भी बिल्व, हाथी, कुण्डल, ध्वज, छत्र और स्वस्तिक आदि शुभ व्रण-(चिह्न)-वाला खड्ग शुभकारक होता है॥ ५६॥

मान (पूर्वोक्त उत्तम, मध्यम, अधम) से रहित, टूटा हुआ कुण्ठित, ध्वनि से रहित (जिसे बजाने पर स्वर न निकले), नेत्र और चित्त को अरुचिकारक निकृष्ट खड्ग त्याज्य है॥ ५६॥

मरकत मणि के सदृश और श्याम आभायुक्त, पोगर से रहित खड्ग बाणासुर की भुजाओं को काटने के लिये शिवजी महाराज ने धारण किया था॥ ५८॥

शाद्वल उद्यान की हरित आभा के सदृश श्यामवर्ण और दीर्घ पोगर से युक्त, रोहिणी का वहन करनेवाला एवं अछेद्य खड्ग पहले रावण ने धारण किया है॥ ५९॥

कुटिल केशर के वर्ण-सदृश पोगरोंवाला, मत्कुण (खट्मल के सदृश तीक्ष्ण दाहकारक) खड्ग होता है। इसमें लोहे के वर्ण की गणना नहीं की जाती॥ ६०॥

गाय की जीभ या गोभी के पत्ते सदृश जिसकी आकृति हो उस खड्ग को निरवह नामवाला कहते हैं। यह शत्रुओं का संहारक और शुभकारक है॥ ६१॥

तरुणी के केश-सदृश कृष्णवर्णवाला, सूक्ष्म और पाण्डुर (कुछ पीला) पोगर से युक्त, सुन्दर अङ्गवाला, भद्राङ्ग करवाल कहलाता है जो भद्रकाली के हाथ में स्थित रहता है॥ ६२॥

जामुन के फल-सदृश श्यामवर्णवाला, तिरछा, पाण्डुर पोगरयुक्त, चिकना, जिसमें प्रतिबिम्ब

स्निग्धच्छायवपुः खड्गः करवालोऽभिधीयते। असिः प्रत्यग्रजीमूतशकलश्यामलच्छविः॥ ६४॥
पाठीनत्वक्समाकारः पोगरोऽयं सुबाणकः। केलिचन्द्रकसंकाशैः पोगरैर्निबिडैः स्थितः॥ ६५॥
कच्छेलक इति ख्यातः खड्गः खड्गभृतां वरः। तमालव्यालरोलम्बनिकुरम्बसमच्छवि॥ ६६॥
कौक्षेयकः समाख्यातः पुरुषाकारपोगरः। एरण्डबीजसङ्काशः पोगरस्तारपट्टकः॥ ६७॥
रामारोमावलिश्यामो न नमेन्नामितोप्यसिः। नववारिधरश्यामः पिङ्गाकुञ्चितपोगरः॥ ६८॥
खड्गः षढालको नाम विषवज्र भयावहः। स्वर्णचूर्णनिभैः सूक्ष्मैः पोगरैः स्वर्णपञ्जरः॥ ६९॥
मुक्ताचूर्णसमाकारैः ख्यातस्तित्तिरिवज्रकः। पोगरैः कज्जलप्रख्यैः खड्गः स्यात्कालवज्रकः॥ ७०॥
वियत् श्यामवपुः सारः स्वल्पपाण्डुर पोगरः। सरोजिनीच्छदच्छायः कोड्गि खड्गोऽभिधीयते॥ ७१॥
कदलीशृङ्खला वापि यस्मिन् दृश्यान्तरान्तरा। वर्णपोगरभेदेन खड्गजातिर्निरूपिता॥ ७२॥
सोमेश्वरनरेन्द्रेण शस्त्रशास्त्र कला विदा। *—मानसो० भाग २, अ० १, विं० ४*

**युक्तिकल्पतरौ—अथ खड्गपरीक्षा—**

**अङ्गं रूपं तथा जातिर्नेत्रारिष्टेति भूमिका। ध्वनिर्मानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम्॥ ३८॥**

---

दीखे, ऐसा खड्ग करवाल नाम से पुकारा जाता है॥ ६२-६३½॥

नवीन (वृष्टिकारक) मेघ के समान वर्णवाली असि कहलाती है॥ ६४॥

पाठीन (पाठा) के सदृश स्वरूपवाला सुबाणक खड्ग होता है॥

केला और चन्द्रमा के समान आकृतिवाला खड्गों में श्रेष्ठ खड्ग कच्छेलक कहा जाता है॥ ६५½॥

तमाल, कृष्णसर्प और भ्रमरसमूह के समान छवि एवं पुरुषाकार पोगर से युक्त खड्ग कौक्षेयक कहलाता है॥ ६६½॥

अरण्ड के बीज सदृश पोगर एवं जिसपर तत् सदृश ही रेखायें हों, सुन्दर केशों के समान कालेवर्ण का, जो झुकानेपर भी नहीं झुके, तारपट्टक खड्ग होता है॥ ६७॥

नवीन मेघ के समान श्यामवर्ण, कुछ पीली एवं झुकी हुई आकृतिवाला खड्ग षढालक कहलाता है। यह विषवज्र के सदृश भयङ्कर होता है॥ ६८॥

सोने के चूर्ण-समान आकृतिवाला, जिसका स्वरूप मोतियों के चूर्ण-जैसा दीखे उसे तित्तिरि वज्र कहते हैं॥ ६९॥

काजल के समान पोगरों से युक्त खड्ग कालवज्र कहलाता है॥ ७०॥

आकाश के जैसे वर्णवाला, कुछ भूरे पोगरयुक्त, कमलिनी की पङ्खुड़ियों-सी आभायुक्त कोड्गि खड्ग कहलाता है। इसमें कदली दल-सदृश शृङ्खला कुछ अन्तर से होती है॥ ७१॥

शस्त्र एवं शास्त्र में निपुण सोमेश्वर महाराज ने वर्ण एवं पोगरसहित खड्ग की जातियों का कथन कर दिया है॥ ७२॥

**युक्तिकल्पतरु में खड्ग परीक्षा**—अब खड्ग परीक्षा (जिन-जिन लक्षणों से खड्ग का परीक्षण किया जाता है) को कहते हैं।

**अभिन्ने दृश्यते यादृक् विभिद्य घटिते तथा। यदेव दृश्यते चिह्नं तदङ्गं संप्रचक्षते॥ ३९॥**
**नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते। तेनैव यत्प्रतीतं स्यात्तज्जातिरिति गद्यते॥ ४०॥**
**अङ्गातिरिक्तं यज्जातिस्तन् माहात्म्योपसूचकम्। तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदाः॥ ४१॥**
**अङ्गातिरिक्तं खड्गादियच्छुद्धत्वापसूचकम्। तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम्॥ ४२॥**
**यः खड्गे जायते शब्दो नखदण्डादिना हते। स ध्वनिस्तुलना मानं ज्ञानमष्टविधन्त्विदम्॥ ४३॥**
**पञ्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः। अन्त्यावकृत्रिमौ ज्ञेयौ तावेव सहजाविति॥ ४४॥**
**शतमङ्गानि चत्वारि रूपाणि जातयस्तथा। त्रिंशन्नेत्राणि जानीयात् अरिष्टानि तथैव च॥ ४५॥**
**भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः। मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः॥ ४६॥**

**अस्त्रयुक्तिः—अथ खड्गस्य शताङ्गगणना—लौहार्णवे—**

**रूप्यस्वर्णगजो रुवुकदमनस्थूलाङ्गकृष्णारुकः श्वेताम्भोजगदातिलानलकणा ग्रन्थिस्थिरातैत्तिलाः। मालाजीरकषट्पदोर्ध्वमरिचव्यालाश्वबर्हाञ्जनः क्षेत्र (क्षोद्र) क्षुद्रकमक्षिका तुषयवः व्रीहिक्षुमा सर्षपाः॥ ४७॥**

---

अङ्ग, रूप, जाति, नेत्र, अरिष्ट, भूमि, ध्वनि, मान—ये आठ खड्ग के ज्ञानार्थ उपयोगी हैं॥ ३८॥

पूर्ण खड्ग (तलवार) का जैसा चिह्नस्वरूप (द्रव्यरूप) दिखलाई पड़ता है, खड्ग के तोड़ने पर भी वैसा ही दिखलाई दे, उसे अङ्ग कहते हैं। नीला, कालादि खड्ग का रूप होता है, उससे जैसा खड्ग प्रतीत हो, उसे खड्ग की जाति कहते हैं॥ ३९-४०॥

अङ्ग के अतिरिक्त खड्ग की महत्ता को दिखानेवाले जाति आदि लक्षण हैं, उन्हें खड्ग परीक्षक नेत्र कहते हैं॥ ४१॥

अङ्गादि से अतिरिक्त खड्ग के शुभ या अशुभसूचक लक्षण (चिह्नादि) हैं, उन्हें अरिष्ट कहते हैं। अङ्गादि को धारण करनेवाली खड्ग की भूमि कही है॥ ४२॥

नख (चुटकी आदि) अथवा डण्डे से खड्ग को बजाने से जो शब्द होता है उसे ध्वनि कहते हैं। खड्ग की लम्बाई-चौड़ाई, मुटाई, भार आदि की तुलना करना मान कहलाता है॥ ४३॥ इन आठ परीक्षणों से खड्ग की परीक्षा (गुण-दोषादि) की जाती है।

प्रारम्भ के पाँच गुण (अङ्ग, रूप, जाति, नेत्र, अरिष्ट) आदि खड्ग में कृत्रिम (बनावटी) भी हो सकते हैं। अन्तिम दो गुण (ध्वनि और मान) बनावटी उत्पन्न नहीं होते, अतः परीक्षण में ये दो गुण ही अधिक विश्वस्त हैं॥ ४४॥

खड्ग के सौ अङ्ग, चार प्रकार के रूप, चार जाति, तीस नेत्र, तीस अरिष्ट, दो प्रकार की भूमि, आठ प्रकार की ध्वनि और दो प्रकार के मान होते हैं॥ ४५-४६॥

**लौहार्णव में**—अब खड्ग के सौ अङ्गों की गणना करते हैं। लौहार्णव में जैसा कहा है—१ चाँदी, २ सोना, ३ हाथी, ४ एरण्ड, ५ दमन, ६ स्थूल, ७ अङ्ग, ८ कृष्ण, ९ अरुण, १० श्वेत, ११ कमल, १२ गदा, १३ तिल, १४ अग्नि, १५ पिप्पली, १६ ग्रन्थि, १७ स्थिर, १८ तीतर, १९ माला, २० जीरक, २१ भ्रमर, २२ ऊर्ध्व, २३ मिर्च, २४ सर्प, २५ घोड़ा, २६ मोर, २७ कज्जल, २८ मधु, २९ क्षुद्रक, ३० मक्खी, ३१ तुष, ३२ जौ, ३३ चावल, ३४ अलसी,

सिंहीतण्डुलगोशिरः ( गोशिरा ) शिवनखग्राहाक्षिकेशोपलः द्रोणीकाककपालपत्रतुवरी बिम्बीफली सर्षपाः । नीलीरक्तवचा रसोनसुमना जिङ्गा ( ङ्गी ) स ( श ) मीरोहितः प्रोष्ठी मारिष मार्कवाथुर ( मार्कवा-खुर ) तडिन्मेषाद्रिगुञ्जा शिवाः ॥ ४८ ॥

दूर्वा बिल्वमसूरटुण्टुकशटी मार्जारिका केतकी मूर्वावज्रकलायचम्पकवना ( ला ) न्यग्रोधवंशासनाः । ज्येष्ठीजालपिपीलिकानलरजः कुष्माण्डरोमस्पृही कर्कन्धुर्बकुलारसालमहिष स्वच्छर्त्तु वक्रा इति ॥ ४९ ॥

प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः क्रमात् ॥ ५० ॥

## अथ तस्य चत्वारि रूपाणि—

नीलः कृष्णःपिषङ्गश्च धूम्रश्चेति चतुर्विधः । वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः ॥ ५१ ॥

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः । जातिभेदो विनिर्दिष्टः खड्गानां मुनिपुङ्गवैः ॥ ५२ ॥

## अथ त्रिंशन्नेत्रानि—

चक्रं पद्मं तथा ( गदा ) खड्गो ( शङ्खो ) डमरूर्धनुरङ्कुशः । छत्रं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः ॥ ५३ ॥

कुम्भः शूलश्च शार्दूलः सिंहः सिंहासनं गजः । हंसो मयूरजिह्वा च दशनः खड्ग एव च ॥ ५४ ॥

पुत्रिकाः चामरः शैलः पुष्पमाला भुजङ्गमम् । त्रिंशदेतानि नेत्राणि खड्गानां कथितानि वै ॥ ५५ ॥

## अथ त्रिंशदरिष्टानि—

छिद्रं काकपदं रेखा भेको मूषिक एव च । विडालः शर्करा नीली मशको भृङ्गसूचके ॥ ५६ ॥

---

३५ सरसों, ३६ सिंह, ३७ तण्डुल, ३८ गौ, ३९ शिरा, ४० शिवलिङ्ग ४१ नख, ४२ मगरमच्छ, ४३ आँख, ४४ केश, ४५ उपल (पत्थर), ४६ द्रोणी, ४७ काक, ४८ कपाल, ४९ पङ्ख, ५० तुवरी, ५१ बिम्बी, ५२ फल, ५३ सरसों के फूल, ५४ नील, ५५ रक्त (मंजीठ), ५६ बच, ५७ लहसुन, ५८ सुमना, ५९ जिंगी, ६० शमी, ६१ रोहित (रोहेड़ा वृक्ष), ६२ प्रोष्ठी, ६३ मारिष, ६४ मार्कवा (हंसराज के फूल) ६५ खुर, ६६ बिजली, ६७ मेष, ६८ अद्रि, ६९ गुञ्जा, ७० मार्जारिका, ७७ केतकी, ७८ मूर्वा, ७९ वज्र, ८० कलाय (मटर), ८१ चम्पक, ८२ बला, ८३ वट, ८४ बाँस, ८५ शालवृक्ष, ८६ ज्येष्ठी, ८७ जाल, ८८ पिपीलिका, ८९ बल (नड), ९० रज, ९१ कुष्माण्ड, ९२ रोम, ९३ स्पृही, ९४ कर्कन्धु, ९५ बकुल, ९६ रसाल, ९७ महिष, ९८ स्वच्छांग, ९९ ऋतु, १०० चक्र—ये सौ भेद लौहार्णव के जाननेवाले मुनि ने खड्ग के कहे हैं॥ ४७-४९ ॥

नीला, काला, भूरा और धूम्र के सदृश ये चार वर्ण खड्गों के खड्गशास्त्रविशारदों ने कहे हैं॥ ५१ ॥

ब्राह्मण, क्षत्रिय, वैश्य और शूद्र—ये चार खड्ग की जातियाँ कही हैं॥ ५२ ॥

**अब खड्ग के तीस नेत्र कहते हैं**—चक्र, पद्म, गदा, शङ्ख, डमरू, धनुष, अङ्कुश, छत्र, पताका, वीणा, मछली, लिङ्ग, ध्वज, चन्द्रमा, घड़ा, त्रिशूल, शार्दूल, सिंह, सिंहासन, गज, हंस, मयूर, जिह्वा, दन्त, खड्ग, पुत्रिका, (पुतली)। चामर, शैल (पर्वत) पुष्पमाला और सर्प ये तीस खड्गों के नेत्र कहे हैं॥ ५३-५५ ॥

**तीस अरिष्ट**—छिद्र, काकपद (कव्वे के पैर-सदृश चिह्न) मेंढक, मूषिक (चूहा), बिल्ली, शर्करा, नीली, मशक (मच्छर), भृङ्ग, सूई, तीन बिन्दु, कालिका, दारी, कपोत (कबूतर), कव्वा,

**त्रिविन्दुः कालिका दारी कपोतः काक एव च। खर्परः शकली क्रोडी कुशपुत्रक जालिके॥ ५७॥**
**करालकङ्कखर्जूरशृङ्गपुच्छ-खनित्रकम्। लाङ्गलं शूर्पबडिशो मुनिना तत्त्ववेदिना॥ ५८॥**
**प्रोक्तान्येतान्यरिष्टानि खड्गानां त्रिंशदेव हि। दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत्॥ ५९॥**
**हंसकांस्याभ्रढक्कानां काकतन्त्रीखराश्मनाम्। ध्वनयोऽष्टविधाः प्रोक्ता नागार्जुनमुनेर्मताः॥ ६०॥**
**उत्तमाधमभेदेन मानन्तद् द्विविधं भवेत्। इति प्रोक्तानि सूत्राणि खड्गानां ज्ञानहेतवे॥ ६१॥**
**एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिः पूजितः। तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत॥ ६२॥**
**लौहद्वीपे—**
**रोप्यपत्रसमाभूमिरङ्गं श्वेतं प्रतीयते। ऊर्ध्वं तत्तु महामूल्यं रूप्यवज्रमुशन्ति तम्॥ ६३॥**
**एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम्। स्वर्गरेखावली तन्वी यद् भूमी निकषोपमा॥ ६४॥**
**स्वर्गवज्रमिति प्राहुरायुर्लक्ष्मीर्जयप्रदम्। गजशुण्डाकृतिर्भूमौ कृष्णायामङ्गसम्भवः॥ ६५॥**
**गजवज्रमिति प्राहुः रक्तस्पर्शे तु तद् विशेत्। ज्वरादिव्याधिगमनं प्रक्षालितेनाम्भसा॥ ६६॥**

---

खर्पर (ठीकरा), शकली, क्रोडी—कुश (डाभ), पुत्रक, जालिक, कराल, कङ्क (दन्तों से युक्त कंघी) खजूर, सींग, पुच्छ, कुदालादि, हल, शूर्प (छाज) और बडिश (मछली) पकड़ने का काँटा—ये तीस अरिष्ट (अशुभसूचकचिह्न) मुनियों ने कहे हैं॥ ५६-५८॥

**भूमि**—दिव्य और भौम ये दो भेद खड्ग-भूमि के होते हैं॥ ५९॥

**ध्वनि**—हंस, कांस्य, विद्युत्, ढक्का (झाँझ), काक के सदृश, वीणासदृश, गर्दभस्वर और पत्थर के सदृश ये आठ प्रकारकी ध्वनियाँ नागार्जुनमुनि के मतानुसार कही हैं॥ ६०॥

**मान**—उत्तम और अधम ये दो मान खड्ग के होते हैं॥ ६१॥

खड्ग के ज्ञान के लिए पूर्वोक्त आठ सूत्र कहे हैं। इनका पूर्णरूपेण ज्ञान करके राजा सम्मानित होता है॥ ६२॥

**लौहद्वीप में**—खड्ग के ज्ञानार्थ अष्टलक्षणों में सर्वप्रथम अङ्ग के लक्षण कहते हैं।

चाँदी के पत्र-सदृश भूमि, श्वेत अङ्ग (आकृति) हो, ऊँचा और बहुत कीमतवाला खड्ग रूप्य (१) खड्ग कहलाता है॥ ६३॥

यह श्रेष्ठ खड्ग लक्ष्मी (धन), आयु, यश और बलदायक है। जिस खड्ग में सोने की हल्की रेखायें चित्रित हों, भूमि कसौटी के पत्थर-सदृश हो उसे स्वर्णवज्र (२) कहते हैं। यह आयु, लक्ष्मी, और जय प्रदान करानेवाला होता है॥ ६४॥

गज के सूँड की आकृति युक्त और कृष्णभूमि-(कालावर्ण)-युक्त खड्ग को गजवज्र (३) कहते हैं॥ ६५॥

रक्त के स्पर्शमात्र (हल्के आघात) से ही यह अन्दर प्रविष्ठ हो जाता है। इसको धोकर उस पानी के पिलाने से ज्वरादि दूर होते हैं॥ ६६॥

---

१. अत्र वज्रेणाभिप्रायो यत्तेन निर्मितः खड्गः। वज्रशब्दस्यार्थश्च तीक्ष्णलोहं (इस्पादिति भाषायां) वर्तते। तस्यैवेमे भेदाः।

अपि क्षीणोऽपि भूपालस्तद् वीर्यात् साधयेन्महीम्। एरण्डबीजप्रतिममङ्गं भूमिः सितेतरा॥ ६७॥
रुवुवज्रमिदं नाम्ना शत्रुदर्पक्षयङ्करः। एतस्य स्पर्शमात्रेण नरः सम्यग्विमुच्यते॥ ६८॥
महिषाख्यमिदं वज्रं केचिदाहुर्मनीषिणः। अङ्गं दमद (न) पत्राभं खड्गे यस्मिन् प्रतीयते॥ ६९॥
विद्याद्दमनवज्रञ्च तज्ज्ञेयं द्विविधं बुधैः। नीलाशुभ्रा भवेद् भूमिस्तत्र नीला गरीयसी॥ ७०॥
तस्मिन् पर्युषितं तोयं गन्धे दमनकोपमम्। तत्प्रभावान्महीपालः कृत्स्नां पृथ्वीं हि साधयेत्॥ ७१॥

**शार्ङ्गधरस्य—**

एकास्थूलासितारेखा भूमिर्नीला दृढा यदि। स्थूलाङ्गमङ्गवज्रं तद् विद्याल्लक्ष्मी यशःप्रदम्॥ ७२॥
एतत्क्षते भवेच्छोथः स्थूलश्चिरतरस्थितिः। एतं महान्तमपरे वदन्ति खड्गकोविदाः॥ ७३॥
घृष्टायां दृश्यते भूमौ अङ्गञ्च प्रतिबिम्बितम्। अङ्गवज्रं भवेत् तस्य द्विधा भूमिः सितासिता॥ ७४॥

**लौहप्रदीपेऽपि—**

निरङ्गंरूप्यपत्राभमीषन्मणीनिभञ्चयत्। दुर्लभं तन्महामूल्यं कान्तलौहं प्रचक्षते॥ ७५॥
कृष्णाभूमिर्भवेत् स्वच्छा पीता वज्राङ्गसङ्गता। कृष्णवज्रमिति प्राहुस्तत् क्षते मोह उच्यते॥ ७६॥

---

इसको धारण करनेवाला दुर्बल राजा भी इसके प्रताप से पृथ्वी का राज्य करता है।

एरण्ड बीज के सदृश अङ्ग, कृष्णभूमियुक्त खड्ग को रुवुवज्र (४) कहते हैं। यह शत्रु के अभिमान का नाश करनेवाला है। इसके स्पर्शमात्र (हल्के आघात) से ही प्राणान्त हो जाता है। (या अङ्गच्छेद हो जाता है)॥ ६७-६८॥

इसको कुछ तत्त्वज्ञ महिषवज्र भी कहते हैं। दमन के पत्ते के सदृश आकृति जिस खड्ग में हो उसे दमनवज्र (५) कहते हैं। यह दो प्रकार का होता है, नीली भूमि और श्वेत भूमिवाला, इनमें नीली भूमि-(रङ्ग)-वाला श्रेष्ठ माना गया है॥ ७०॥

इस खड्ग को पानी में एक दिन रखने पर पानी की गन्ध दमन (केतकी) के सदृश हो जाती है। इसके प्रभाव से राजा समस्त पृथ्वी को वश में कर सकता है॥ ७१॥

**शार्ङ्गधर के अनुसार**—एक स्थूल श्वेताकार रेखा और शेष भूमि नीली एवं दृढ़ हो तो उसे स्थूलाङ्गवज्र (६) कहते हैं। यह धन और यशप्रद होता है॥ ७२॥

इसके प्रहार से घाव होने पर शोथ (सूजन) होता है। यह विस्तृत और अधिक समय तक रहता है। इस खड्ग को दूसरे खड्गविद् महान्त नाम से भी कहते हैं॥ ७३॥

घिसने से जिस खड्ग की भूमि में अपना अङ्ग प्रतिबिम्बित (परछाई) हो, उसे अङ्गवज्र (७) कहते हैं। इसकी भूमि श्वेत और काली दो प्रकार की होती है॥ ७४॥

**लौहप्रदीप के अनुसार**—अङ्गरहित, चाँदी के पत्रे के सदृश, कुछ मणि के स्वरूपवाला दुर्लभ, बहुमूल्य युक्त कान्तलौह वज्र होता है॥ ७५॥

जिसकी भूमि काली, स्वच्छ और वज्र (विद्युत्) के सदृश कुछ पीली हो, उसे कृष्णवज्र (८) कहते हैं। इसके घाव से मूर्च्छा होती है॥ ७६॥

**प्रदीपेऽपि—**

**कृष्णाभूमिः सुवर्णाभमीषच्छुक्लाङ्गसङ्गतम्। डाहुलीवज्रकं विद्यात् कालसंज्ञमथापरे॥ ७७॥**
**अरुणं सूक्ष्ममूर्धञ्चेदङ्गं भूमिः सितेतरा। अरुणाख्यमिदं वज्रं शत्रुदर्पनिषूदनम्॥ ७८॥**
**सूर्यांशुस्पर्शमात्रेण वह्निरूपां वमेच्छिखाम्। तस्य स्पर्शमात्रेण पद्मकोषः स्फुटेन्निशि॥ ७९॥**
**दुर्लभं तन्मनुष्याणां भाग्यैः कुत्रापि लभ्यते। तद् योजनसहस्रस्य रिष्टं नाशयति ध्रुवम्॥ ८०॥**
**श्वेतास्तिस्त्रो यदा रेखा आमूलादुपलक्ष्यते। श्वेताङ्गमिति तद् विद्याद्यशोलक्ष्मीबलप्रदम्॥ ८१॥**
**अम्भोजदलसङ्काशं अङ्गं भूमिः सितेतरा। अम्भोजवज्रं तज्ज्ञेयं कथितं मुनिपुङ्गवैः॥ ८२॥**
**अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा। गदावज्रमिदं ब्रूयात् तत् क्षतेशूलसम्भवः॥ ८३॥**
**अङ्गं कृष्णतिलाकारं भूमिश्चैव सिताऽसिता। तिलवज्रमिदं ज्ञेयं लक्ष्मीबलयशः प्रदम्॥ ८४॥**
**तत् क्षते तिलतैलाभा वसा प्रच्यवतेऽ धिकम्॥ ८५॥**
**धूम्रवर्णा भवेद् भूमिरङ्गं वह्निशिखोपमम्। अग्निवज्रमिदं ज्ञेयं शत्रूणां दाहकारकम्॥ ८६॥**
**अत्र शीतोदकं न्यस्तं तप्तं भवति च क्षणात्। शाणे वह्निं वमेद् यस्तु तथासूर्यांशुसङ्गमात्॥ ८७॥**
**तत् क्षते बलवान् दाहो दग्धवच्च व्रणो भवेत्। एतत् परमभाग्येन लभ्यते धरणीतले॥ ८८॥**

---

**प्रदीप में भी कहा है**—कृष्णभूमि, स्वर्ण-जैसी झलक, कुछ सफेदीयुक्त खड्ग को डाहुली वज्र कहते हैं। कुछ इसे काल नाम से पुकारते हैं॥ ७७॥

अरुण (लाल सूर्य का) वर्ण, पतली, ऊँची आकृतिवाले कृष्णभूमियुक्त वज्र को अरुणवज्र (९) कहते हैं। यह शत्रुओं का संहारक है। यह खड्ग सूर्य की किरणों के स्पर्श करते ही अग्नि के सदृश लपट छोड़ता है (चमकता है)। रात्रि में इसके छू देनेमात्र से ही कमल का फूल खिल जाता है॥ ७९॥

यह दुर्लभ है और सौभाग्य से ही प्राप्त होता है, यह सहस्रों योजन के (बड़े-बड़े) सङ्कटों को भी दूर करता है॥ ८०॥

मूल (मूठ) से ही तीन सफेद रेखायें जिसमें हों, उसे श्वेतवज्र (१०) कहते हैं, यह यश, बल और धन का देनेवाला है॥ ८१॥

कमल के सदृश अङ्ग और कृष्णभूमिवाला अम्भोजवज्र (११) होता है। ऐसा मुनिपुङ्गवों (श्रेष्ठों) ने कहा है॥ ८२॥

जिसका स्वरूप गदा जैसा और भूमि कृष्ण हो उसे गदावज्र (१२) कहते हैं, इसके घाव में शूल (पीड़ा) होती है॥ ८३॥

काले तिल के सदृश आकृतिवाला, श्वेत और काली भूमि से युक्त तिलवज्र (१३) जानना चाहिये। यह धन, बल और यश प्रदान करनेवाला है॥ ८४॥ इसके द्वारा होनेवाले घाव से तिल के तेल जैसी वसा (चर्बी) अधिक मात्रा में निकलती है॥ ८५॥

अग्नि की शिखा के सदृश अङ्ग और धूम्रवर्ण भूमिवाला अग्निवज्र (१४) जानना चाहिये। जोकि शत्रुओं के सदृश दाहकारक (पीड़ा देनेवाला) होता है॥ ८६॥

इसके ऊपर रखा हुआ ठण्डा जल (सूर्य की किरणों के संसर्ग से) उष्ण हो जाता है। इसे शाण पर चढ़ाने से अग्नि निकलती है। इसका घाव जलने के सदृश होता है, जिसमें बहुत जलन होती है। यह सौभाग्य से ही प्राप्त होता है॥ ८८॥

**भूमिः सिता तिला वापि अङ्गञ्चेत्पिप्पली-प्रदम्। कणावज्रमिदं ज्ञेयमन्तर्दाहस्तु तत् क्षते॥ ८९॥**
**कृष्णाभूमियदैवाङ्गे दृश्यते ग्रन्थिसञ्चयः। ग्रन्थिवज्रमिदं ज्ञेयं वैरिपक्षविनाशनम्॥ ९०॥**
**तत् क्षते बलवान् दाहस्तृषा च ज्वर एव च। शालपर्णीदलाकारमङ्गं कृष्णासिपुत्रिका॥ ९१॥**
**स्थिरावज्रमिदं प्राहुस्तत् क्षते वेपथुर्भवेत्। यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा॥ ९२॥**
**एतत् तित्तिरिवज्रं स्यात् तत् क्षते बहुधेनवः। वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते॥ ९३॥**
**मालाङ्गमिति तद्विद्यात्तत्तोयं गन्धवद्भवेत्। अत्र तप्तोदकं न्यस्तं शीतं भवति तत्क्षणात्॥ ९४॥**
**एष दाहपरीतानामृते पित्तहतात्मनाम्। भवेत् परमभैषज्यं भाग्येनैतद् हि लभ्यते॥ ९५॥**
**यदाजीरकसंकाशमङ्गं भूमिः सितासिता। एतज्जीरकवज्रं स्यात् तत् क्षते तत् क्षणाज्ज्वरः॥ ९६॥**
**भूमिः सितासितक्षेत्रा अङ्गं भृङ्गाभमिष्यते। तत्र चेन्मध्यमं न्यस्तं शेषमाप्नोति केवलम्॥ ९७॥**
**एतद् भ्रमरवज्रं स्यात्तत्क्षते स्यात्विशूचिका। ऊर्ध्वगं कपिलाभासमङ्गं यस्मिन्प्रतीयते।**
**ऊर्ध्ववज्रमिदं प्राहुर्विषवेगनिषूदनम्॥ ९८॥**

**लौहप्रदीपेऽपि—**

**ऊर्ध्वगं कपिलाभासमङ्गं यस्मिन्प्रतीयते। लाङ्गलाङ्गन्तु तद्विद्यात्स्पर्शे तस्याहिनाशनम्॥ ९९॥**

---

भूमि श्वेत या तिलवर्ण-जैसा और पिप्पली (पीपल) जैसे अङ्गवाला कणावज्र (१५) होता है, इसके घाव में दाह होता है॥ ८९॥

कृष्णभूमि और ग्रन्थि-(गाँठ)-युक्त अङ्गवाला ग्रन्थिवज्र (१६) जानना चाहिये। यह शत्रुओं का नाश करनेवाला है॥ ९०॥ इसके घाव में अत्यन्त दाह, तृषा (प्यास) और ज्वर होता है।

शालपर्णी के पत्र सदृश अङ्ग और कृष्ण भूमिवाली छुरिका को स्थिरावज्र (१७) कहते हैं। इसके द्वारा आहत होने पर कम्पन होता है॥ ९१॥

जब तीतर के पङ्ख जैसा वर्ण और कृष्णभूमि हो तो उसे तित्तिरिवज्र (१८) कहते हैं। इससे आहत होने पर बहुत कम्पन होता है॥ ९२॥

वनमाला (जङ्गली फूलों की माला) अथवा (वन में वृक्षों की पंक्तियाँ) सदृश जिसकी आकृति हो उसे मालावज्र (१९) जानना चाहिये। इसका प्रक्षालित जल गन्धवाला होता है। इसके सम्पर्क से उष्ण जल शीघ्र ही ठण्डा हो जाता है॥ ९३-९४॥

यह जल पित्तदाह के अतिरिक्त अन्य दाह में अमृतसदृश है। इस खड्ग की प्राप्ति भाग्य से होती है॥ ९५॥

जब जीरे के आकारवाला अङ्ग और भूमि श्वेत तथा कृष्ण हो तो उसे जीरकवज्र (२०) कहते हैं, इससे आहत होने पर शीघ्र ज्वर होता है। श्वेत और कृष्णभूमि और भ्रमर की आकृतिवाला जिसका मध्यभाग सूक्ष्म होता है, भ्रमरवज्र (२१) होता है। इसके घाव में विशूचिका (सूई चुभने सदृश-पीड़ा) होती है॥ ९७॥

उठी हुई आकृतिवाला, कपिल-(भूरे)-वर्णवाला अङ्ग जिसमें हो, उसे ऊर्ध्ववज्र (२२) कहते हैं। यह वज्र विष के वेग को समाप्त करनेवाला होता है॥ ९८॥

**लौहप्रदीप में भी कहा है**—ऊपर को गया हुआ, कपिलाकार अङ्ग जिसमें हो, उसे

**अङ्गं मरीचसंकाशं भवेद् भूमिः सितेतरा। मरीचाङ्गमिदं वज्रं तत् क्षते कटुरक्तता॥ १००॥**
**तत् प्रक्षालनतोयेन नश्यति पीनसादयः। यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला॥ १०१॥**
**भुजङ्गवज्रं तद्विद्यात्तत् क्षते विषवद् रुजा। तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते॥ १०२॥**
**एकस्यास्य प्रसादेन कृत्स्नां शास्ति महीं नृपः। यदाश्वखुरसङ्काशं अङ्गं भूमिस्तु निर्मला॥ १०३॥**
**अश्वाङ्गमिति तं विद्यात् खड्गं परमदुर्लभम्। तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति॥ १०४॥**
**तस्य क्षालनतोयेन हयानां रोगनाशनम्। एतत् क्षते भृशं मूर्च्छा दाहश्च भ्रम एव च॥ १०५॥**
**मयूरपिच्छसदृशं अङ्गं भूमिः सितेतरा। बर्हाङ्गमिति तं विद्यात् तत क्षते वान्तिरिष्यते॥ १०६॥**
**सर्पाणामिह सर्वेषामस्य स्पर्शाऽसहिष्णुता। एतदेव नृपतिभिर्भाग्यैः कुत्रापि लभ्यते॥ १०७॥**
**भूमिरञ्जनसंकाशा धारा चास्य शिता भवेत्। अञ्जनाख्यमिदं प्रायः सर्वदैवोपलभ्यते॥ १०८॥**
**धाराशुभ्रा भवेद्यस्य भूमिः कज्जलसन्निभा। कृष्णरङ्गैश्चितं वापि विद्यात् कज्जलवज्रकम्॥ १०९॥**
**मधुवर्णसमाभूमिरङ्गं वा मधुविन्दुवत्। क्षोद्राख्यमिति जानीयात् जयलक्ष्मी यशः प्रदम्॥ ११०॥**

---

लाङ्गंलाकृति (वत्सनाभ) कलिहारीवज्र कहते हैं। इसके स्पर्शमात्र से ही सर्प मर जाता है॥ ९९॥ (जङ्गमविष का स्थावरविष औषध है)।

मिर्च के समान अङ्ग, कृष्णभूमिवाला मरीचवज्र (२३) होता है, इसके घाव से कटु रक्त बहता है॥ १००॥ इसके प्रक्षालित जल से पीनस (नजला) आदि नष्ट होता है।

सर्प के फण-सदृश आकृति और निर्मल (शुद्ध) भूमिवाला भुजङ्गवज्र (२४) जानना चाहिये। इसके घाव में विषवेग के समान पीड़ा होती है। इसके स्पर्शमात्र से ही मेंढक मर जाता है॥ १०१-१०२॥

केवल इस अकेले खड्ग के द्वारा समस्त पृथ्वी का शासन किया जा सकता है। घोड़े के खुर-सदृश अङ्ग और निर्मल भूमिवाला अश्ववज्र (२५) कहलाता है। यह बहुत दुर्लभ है। इसके स्पर्शमात्र से ही मन्द दौड़नेवाला घोड़ा भी तेज दौड़ने लगता है॥ १०३-१०४॥

इसके प्रक्षालित जल से घोड़ों के रोग नष्ट होते हैं। इसके घाव से शीघ्र ही मूर्च्छा, दाह और भ्रम उत्पन्न हो जाते हैं॥ १०५॥

मोर की पूँछ-जैसी आकृतिवाला और कृष्णभूमिवाला बर्हिवज्र (२६) जानना चाहिये। इसके द्वारा आहत होने पर वमन होती है॥ १०६॥

इसका स्पर्श सर्पों के लिए असहनीय है। यह राजाओं को जैसे-तैसे सौभाग्य से ही मिलता है॥ १०७॥

अञ्जन=काजल के समान भूमि और सफेद धारवाला अञ्जनवज्र (२७) होता है, यह प्रायः सर्वत्र प्राप्य होता है॥ १०८॥

जिसकी धार श्वेतवर्ण और भूमि काजल के जैसी हो अथवा काले वर्णों से युक्त हो, उसे कज्जलवज्र कहते हैं॥ १०९॥

मधु (शहद) के वर्ण-(रङ्ग)-जैसी भूमि और शहद के बिन्दु जैसी आकृतिवाला क्षौद्रवज्र (२८) जानना चाहिये। यह जय, धन और यशप्रद होता है॥ ११०॥

**शार्ङ्गधरेऽपि—**

**निम्नकक्षो भवेद् यत्र रात्रिन्दिवविलेपितः। मधुरो मधुवर्णाभः स खड्गो देववल्लभः॥ १११॥**
**विशेषाच्चाऽत्र रज्यन्ति सततं मक्षिकादयः। आसीमकोणिका यस्य क्षुद्राङ्गं कुण्डलीकृतम्॥ ११२॥**
**क्षुद्रवज्रकनामानं प्राह नागार्जुनो मुनिः। इदं कुण्डवज्रञ्च प्राह लौहार्णवे मुनिः॥ ११३॥**
**अस्य क्षतेषु बलवान् दाहो मम विलोकितः। यदङ्गं मक्षिकाकारं भूमिश्चैव सितासिता॥ ११४॥**
**स्नेहः शुष्यति चैवात्र मक्षिकाङ्गं तमादिशेत्। अङ्गं यदा तुषाकारं या च भूमिः सितासिता॥ ११५॥**
**तुषवज्रमिदं ख्यातं प्राह नार्गाजुनो मुनिः। अङ्गं यवफलाकारं भूमिः कृष्णासिता तथा॥ ११६॥**
**यवाङ्गमिति तं विद्यात्तत् स्पर्शे कण्डूसंभवः। एष खड्गाधमस्त्याज्यो यदीच्छेद् भूतिरात्मनः॥ ११७॥**
**अङ्गं व्रीहिप्रसूनाभं भूमिर्धूम्रा क्षतेऽतिरुक्। तद् व्रीहिवज्रं जानीयाच्छत्रूणां भयवर्धनम्॥ ११८॥**
**अतसीफलसङ्काशमङ्गं भूमिः सितासिता। अतसीवज्रमाहुस्तं तत् क्षते शिरसो रुजा॥ ११९॥**
**यदासर्षपबीजाभमङ्गं भूमिः सितासिता। खरधारः खरस्पर्शः सर्षपाङ्गः स दुर्लभः॥ १२०॥**
**सिंह्याकारं भवेद्यस्य अङ्गभूमिः सितासिता। सिंहीवज्रन्तु तद्विद्यात्तत्क्षते प्रलपेन्नरः॥ १२१॥**
**एतद् धावनतोयेन कासरोगोपनाशकम्। अङ्गं तण्डुलसंकाशं भूमिर्धूम्रा सितासिता॥ १२२॥**

---

**इसका लक्षण शार्ङ्गधर में भी कहा है**—निम्न कक्षावाला कृष्ण और श्वेतवर्णवाला मधु के समान खड्ग मधुर कहलाता है। यह देवों का प्रिय है॥ १११॥

विशेषकरके इस खड्ग पर मक्खियाँ बहुत आती है। आसीम (अन्तिम अवधि) तक जिसकी कोणिका (मुड़ाव) हो, क्षुद्र आकृतिवाला गोलाकार क्षुद्रवज्र (२९) कहलाता है। यह नागार्जुन मुनि का मत है। इसको मुनि ने लौहार्णव नामक शास्त्र में कुण्डलवज्र भी कहा है॥ ११२-११३॥ इसके घाव में बहुत दाह होता है, ऐसा मैंने देखा है।

जब मक्खी के सदृश अङ्ग, श्वेत-कृष्णभूमि हो॥ ११४॥ और स्नेह (चिकने पदार्थ) का शोषण करले, उसे मक्षिवज्र (३०) कहते हैं।

तुषाकार अङ्ग और श्वेत-कृष्णभूमिवाला तुषवज्र (३१) कहलाता है, ऐसा नागार्जुन मुनि ने कहा है॥ ११५॥

जौ के सदृश अङ्ग, काली और श्वेत भूमिवाला यवव्रज्र (३२) जानना चाहिये। इसके छूने से खुजली होती है। अपना अस्तित्व रखने के लिए इस अधम खड्ग को त्यागना उचित है॥ ११६-११७॥

चावल के पुष्प-सदृश अङ्ग, धूम्रवर्ण भूमिवाला, प्रहार में अति पीड़ादायक व्रीहिवज्र (३३) होता है। यह शत्रुओं के हृदय में भयदायक है॥ ११८॥ अलसी के फल-सदृश अङ्ग और श्वेत-कृष्णभूमिवाला अतसीवज्र (३४) होता है। इसके घाव से शिर में पीड़ा होती है॥ ११९॥ जब सरसों के बीज-सदृश अङ्ग, श्वेतकृष्णभूमि, खर (मोटी) धार और खरस्पर्श (छूने में मोटा प्रतीत होना) इन लक्षणों से युक्त खड्ग सर्षपवज्र (३५) होता है। यह दुर्लभ (कठिनता से प्राप्य) है॥ १२०॥ जिस खड्ग का सिंही-(काकड़ासिंगी)-सदृश आकार, श्वेतकृष्णभूमि हो, उसे सिंहीवज्र (३६) कहते हैं। इससे आहत होने पर व्यक्ति प्रलाप करता है॥ १२१॥ इसका प्रक्षालित जल कासरोग नाशक होता है। तण्डुल (चावल) के सदृश अङ्ग, धूम्र, श्वेत और

**तण्डुलाङ्गमिमं विद्यात् यशः श्रीबलवर्धनम्। एतत् पर्युषितं तोयं तण्डुलोदकसन्निभम्॥ १२३॥**
**अस्य प्रभावान्मनुजो भ्रष्टां हि लभते श्रियम्। अङ्गञ्चेद् गोक्षुराकारं भूमिराघातनिग्रहा॥ १२४॥**
**खड्गाधममिदं विद्याद्गोवज्रं नाम नामतः। स्थूला दीर्घाः शिरा कृष्णा भूमिश्चैवसितासिता॥ १२५॥**
**शिराङ्गमिति तं ब्रूयादेनं खड्गाधमं बुधाः। शिवलिङ्गाकृतिश्चाङ्गे धारा चैव सिताथवा॥ १२६॥**
**शिवलिङ्गमिति तं ब्रूयाच्छत्रुपक्षनिषूदनम्। यदा व्याघ्रनखाकारमङ्गं भूमिस्तु पिंगला॥ १२७॥**
**नखवज्रमिदं ब्रूयात् तत्क्षते श्वयथुर्भवेत्। एतदामिषसंस्पर्शात् प्रविशेत् स्वयमेवच॥ १२८॥**
**ग्राहपुच्छोपमन्त्वङ्गं भूमिर्धूम्रा खराकृतिः। ग्राहाङ्गमिति जानीयाच्छकृद्वंशोपनाशनम्॥ १२९॥**
**अस्य स्पर्शमात्रेण जीवन्मत्स्यो जहत्यसून्। यदा मनुजनेत्राभमङ्गं भूमिः सितासिता॥ १३०॥**
**नेत्राङ्गमिति जानीयात् संग्रामे विजयप्रदम्। एतद् धावनतोयेन नूनमन्धोऽपि पश्यति॥ १३१॥**
**अङ्गं केशसमं यस्य भूमिर्धूम्रा सितासिता। केशाङ्गमिति जानीयात् क्लेशदुःखभयापहम्॥ १३२॥**
**निरङ्गस्थूलप्रकृतिमुपलाङ्गं विदुर्बुधाः। एतद् हि प्रायशो लोके दृश्यते द्विजसत्तम॥ १३३॥**

**पद्मपुराणस्य—**

**निरङ्गा निशिता धारा शाणे वह्निं वमत्यपि। द्रोणीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम्॥ १३४॥**

---

काली भूमिवाला तण्डुलवज्र होता है। यह धन और बलवर्धक है। इसके प्रभाव से मनुष्य गये हुए धन सम्पति को प्राप्त करता है। इसका एकदिन रखा हुआ जल तण्डुलोदक के समान गुणकारक है॥ १२३॥ गौ के खुर सदृश आकार, आघात सहने में असमर्थ भूमिवाला गोवज्र (३८) होता है अधम होने से यह त्याज्य हैं। स्थूल दीर्घ कृष्ण शिराओंवाला और श्वेत कृष्ण भूमिवाला शिरावज्र (३९) होता है। यह खड्गों में अधम है॥ १२५॥

शिवलिङ्ग की आकृतियुक्त अङ्ग और श्वेत या तत्सदृश धारावाला शिववज्र (४०) होता है। यह शत्रुपक्ष का संहारक है॥ १२६॥

जब व्याघ्र के नख-सदृश अङ्ग और पिङ्गल भूमि हो उसे नखवज्र (४१) कहते हैं। इसके घाव में वमन होता है। यह मांस के स्पर्शमात्र से ही स्वयं उसमें घुस जाता है॥ १२७-१२८॥

मगरमच्छ की पूँछ के सदृश अङ्ग, धूम्रभूमि और कठोर आकृतिवाला ग्राहवज्र (४२) कहलाता है जो देवों का भी संहारक है॥ १२९॥ इसके स्पर्शमात्र से ही मछली जीवित होती हुई भी प्राणों को छोड़ देती है। जब मनुष्य के नेत्र सदृश अङ्ग और श्वेतकृष्णभूमि हो तो उसे नेत्रवज्र (४३) जानना चाहिये। यह संग्राम में विजय दिलानेवाला होता है॥ १३०॥ इसके प्रक्षालित (धोये हुये) जल से अन्धा भी निश्चितरूप से देखने लग जाता है॥ १३१॥ केश (बाल) के समान अङ्ग, धूम्र, श्वेत और काली भूमिवाला केशवज्र (४४) होता है। यह क्लेश भय और दुःखनाशक है॥ १३२॥

बिना विशेष अङ्ग (आकृति) और मोटा उपलवज्र (४५) होता है। यह खड्ग प्रायःलोक में सर्वत्र देखा जाता है॥ १३३॥

**पद्मपुराण के अनुसार**—बिना अङ्गविशेष के आकृति, तीक्ष्णधार, शाणपर चढ़ाने से अग्नि-स्फुलिङ्गों का छोड़ना, इन गुणोंवाला द्रोणीवज्र (४६) जानना चाहिये, यह सर्वत्र सुलभ है॥ १३४॥

अङ्गं काकपदाकारं भूमिराघातनिःसहा। एष खड्गाधमस्त्याज्यः काकाङ्गो भूतिमिच्छता॥ १३५॥
यदा कपालमङ्गेषु दृश्यते स्पर्शतः खरम्। एतद् हि दुःखजनकं कपालाङ्गं बुधस्त्यजेत्॥ १३६॥
तन्वीपत्रा बलाङ्का या सुवर्णाङ्गासि पुत्रिका। पत्रवज्रकमाहुस्तं आयुर्वेदविदो जनाः॥ १३७॥

**लौहार्णवेऽपि—**

सुप (व) र्णसन्निभाभूमिरङ्गं कालं प्रतीयते। तत्पत्रवज्रं काकस्य सुप (व) र्णमुपजायते॥ १३८॥
तुवरीदलसङ्काशं अङ्गं यस्मिन् प्रतीयते। तुवरीवज्रमाहुस्तं तत् क्षते शिरसो भ्रमः॥ १३९॥
एष खड्गाधमस्त्याज्यो यदीच्छेज्जीवनं निजम्। बिम्बीदलसमा भूमिरङ्गंबिम्बीफलोपमम्॥ १४०॥
बिम्बीवज्रन्तु तद्विद्ययात्तज्जलं तिक्तमुच्यते। पित्तश्लेष्मविकाराणां प्रशमाय प्रयुज्यते॥ १४१॥
प्रियङ्गुसदृशन्त्वङ्गं भूमिश्च कपिलाकृतिः। फलवज्रमिदं प्रोक्तं शाणे धूमं वमत्यपि॥ १४२॥
अङ्गं सर्षपपुष्पाभं भूमिश्चैव सितासिता। एतत् सर्षपवज्रं स्यात् शाणे वह्निं वमत्यपि॥ १४३॥
अपि कुण्डलिकां याति एतदत्यन्तकोमलम्। एतत्प्रसादात्क्षितिपः कृत्स्नां साधयते महीम्॥ १४४॥
नीलीरससमाभूमिरङ्गं नीलीतरङ्गवत्। नीलीवज्रमिदं दृष्टं शाणे वह्निशिखां वमेत्॥ १४५॥

---

कव्वे के पैर के आकारवाला, भूमि (धार) आघात सहने के अयोग्य काकवज्र (४७) होता है। ऐश्वर्य की कामना करनेवाले को यह अधम खड्ग त्याज्य है॥ १३५॥

कपाल-(ठीकरा)-सदृश अङ्ग और खरस्पर्श (कुण्ठित धार) वाला कपालवज्र (४८) होता है। दुःखदायी होने से बुद्धिमान् इसे छोड़ दे।। १३६॥ बलापत्र के सदृश आकृति और सुवर्णाकार असिपुत्रिका (छुरी) पत्रवज्र (४८) कहलाती है। यह आयुर्वेदविदों का मत है॥ १३७॥

**लौहार्णव में** भी सुवर्ण-सदृश भूमि, काला अङ्ग, कव्वे के पङ्ख सदृश आकृतिवाला पत्रवज्र होता है॥ १३८॥

तुवरी के पुष्प सदृश अङ्गवाला (तुवरीवज्र) (५०) कहलाता है, इसके प्रहार से शिर में चक्कर आते हैं॥ १३९॥ अपने जीवन को सुरक्षित रखनेवाले को इस अधम खड्ग को त्याग देना चाहिये॥ १४०॥

बिम्बी के पुष्प सदृश भूमि (कुछ नीली-श्वेत) बिम्बी (सेम) की फली के समान आकृतिवाला बिम्बीवज्र (५१) होता है। इसका जल तिक्तगुण होने से पित्त और कफ के शमनार्थ प्रयोग होता है॥ १४१॥ प्रियङ्गु-सदृश अङ्ग और कपिला भूमिवाला फलवज्र (५२) कहा है। इसे शाण पर चढ़ाने से धूँआ निकलता है॥ १४२॥

सरसों के पुष्प सदृश अङ्ग, श्वेत और कृष्णभूमिवाला सर्षपवज्र (५३) होता है। इसे शाण पर रखने से अग्नि निकलती है॥ १४३॥

इसे लपेटकर गोलाकार बनाया जा सकता है। यह बहुत ही सुकोमल होता है। इससे राजा समस्त पृथ्वी को वश में कर लेता है॥ १४४॥

नीलीरस (नीले रङ्ग) के सदृश भूमि, नीली तरङ्ग के सदृश अङ्गवाला नीलीवज्र (५४) होता है। यह शाण पर आग की लपटें छोड़ता है॥ १४५॥

**एष खड्गवरो नृणामरिष्टभयनाशनः। रक्तास्तिस्त्रो महारेखा भूमिश्चैव सितासिता॥ १४६॥**
**रक्ताङ्गमिति जानीयाद्वैरिपक्षविनाशनम्। शाणेन यस्तु रक्तां वा नीलां वा वमते शिखाम्॥ १४७॥**
**रक्तस्पर्शनमात्रेण स्वयमेव निकृन्तति। क्षतेऽस्य रक्तश्वयथुस्तृषादाहश्च जायते॥ १४८॥**
**अङ्गं वचादलसमं भूमिश्चैव सितासिता। वचावज्रमिदं ज्ञेयं तत् क्षताद् विषनाशनम्॥ १४९॥**
**एष खड्गवरो राज्ञा साधनीयः प्रयत्नतः। रसोनादुत्तमं ह्यङ्गं भूमिस्तस्य दलोपमा॥ १५०॥**
**रसोनवज्रं जानीयात् शाणे वह्निं वमत्यपि। अस्य धावनतोयेन आमवातविनाशनम्॥ १५१॥**
**निरङ्का निर्मला भूमिर्धारा तीक्ष्णा खरः स्वयम्। सुमनावज्रमेतत् स्याद् भुवि नात्यन्तदुर्लभम्॥ १५२॥**
**मञ्जिष्ठा सदृशा दीर्घास्तन्व्यो रेखाः सुविस्तराः। जिङ्गवज्रमिदं नाम सर्वकामार्थसाधनम्॥ १५३॥**
**अङ्गं शमीपत्रसमं भूमिर्धूम्रा सितासिता। शमीवज्रमिदं ज्ञेयं शनैश्चरमुदावहम्।**
**शाणेषु वमते वह्निं सहते वह्निपीडनम्॥ १५४॥**
**रोहितवल्कलसदृशमङ्गं भूमिः सितासिता वापि।**
**धूम्रागम्भीरस्वरयुक्तं धारातीक्ष्णा सिता भवेद् रेखा॥ १५५॥**
**रोहिताख्यमिदं वज्रं सर्वारिष्टविनाशनम्। वह्निसंस्पर्शमात्रेण किञ्चिच्चिमचिमायते॥ १५६॥**
**इत्ययं दुर्लभो खड्गो देवानामपि कथ्यते। शफरीवल्कलाकारमङ्गं भूमिः सितासिता॥ १५७॥**

---

यह खड्गों में श्रेष्ठ, राजाओं के अशुभ और भय का नाशक है। तीन लाल रेखाओंवाला, श्वेत और कृष्ण भूमि॥ १४६॥ वाला रक्तवज्र (५५) जानना चाहिये। यह शत्रुपक्ष का नाश करनेवाला है। यह शाण पर रक्त और नीली शिखा को निकालता है। रक्त के स्पर्शमात्र (हल्के आघात) से ही काट देता है। इसके द्वारा आहत होने पर रक्तवमन, तृषा और दाह होता है॥ १४७-१४८॥

वच के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला वचावज्र (५६) जानना चाहिये। इसके द्वारा आहत होने पर विष के सदृश नाश होता है। अथवा विष के सदृश प्रभाव होता है। राजा को प्रयत्नपूर्वक इस खड्ग की प्राप्ति (साधना, निर्माणादि) करनी चाहिये॥ १४९॥

लहसुन के सदृश अङ्ग और उसी के समान भूमिवाला रसोनवज्र (५७) जानना चाहिये॥ १५०॥ यह शाण पर अग्निशिखा छोड़ता है। इसके प्रक्षालित जल से आमवात दूर होता है॥ १५१॥ निरङ्का (धब्बेरहित), निर्मल भूमि, तीक्ष्ण धार और खराकृतिवाला सुमनावज्र (५८) होता है। यह सुलभ है॥ १५२॥

मजीठ के सदृश दीर्घ और हल्की विस्तृत रेखाओंवाला जिङ्गवज्र (५९) होता है। यह सब कार्यों की सिद्धि करनेवाला है॥ १५३॥

शमी (जंडवृक्ष) पत्र के समान अङ्ग, धूम्र, श्वेत और कृष्णभूमिवाला शमीवज्र (६०) जानना चाहिये। यह शनैश्चरों द्वारा धारण किया जाता है। शाण पर अग्नि स्फुलिङ्ग छोड़ता है। अग्निसङ्कट को सहने में समर्थ है॥ १५४॥

रोहित (रोहेड़ा) की छाल के समान अङ्ग, श्वेत, कृष्ण अथवा धूम्रवर्णभूमि, गम्भीर स्वरयुक्त, तीक्ष्णधार और श्वेत रेखावाला रोहितवज्र (६१) होता है। यह सब सङ्कटों का नाशक है। अग्नि

**प्रोष्ठी वज्रमिदं प्रोक्तं न्यस्तं तरति वारिणी। एष खड्गोत्तमो राज्ञां विपक्षकुलनाशकः ॥ १५८ ॥**
**कदाचिल्लभ्यते भाग्यैर्लभ्यते लभ्यते मही। अङ्गं मारिषपत्राभं भूमिः स्याद्विषमच्छविः ॥ १५९ ॥**
**इत्ययं मारिषाङ्गः स्यात् पृथिव्यां नातिदुर्लभः। भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्दलप्रभा ॥ १६० ॥**
**आघातं सह तेनैव एष खड्गाधमो मतः। धारातीक्ष्णा खुराकारा भूमिरङ्गविवर्जिता ॥ १६१ ॥**
**आघातं सहते घोरं शाणे वह्निं वमत्यपि। खुराङ्गमिति जानीयात् पृथिव्यां नातिदुर्लभम् ॥ १६२ ॥**
**निर्मला समला भूमिर्भवेच्चैव कदा कदा। मन्दा तीव्रा भवेद्धारा तडिद्वज्रस्य लक्षणम् ॥ १६३ ॥**
**नीलाञ्जनसमाभूमिरङ्गं जलतरङ्गवत्। मेघाङ्गमिति जानीयाच्छाणे शीतं भवत्यपि ॥ १६४ ॥**
**एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः। भर्त्तुः प्रतापं शमयेद्रविबिम्बं यथाघनः ॥ १६५ ॥**
**मन्दा धारा भृशं गाढा भूमिरङ्गविवर्जिता। पर्वताङ्गमिदं नाम सर्वत्रैवोपलभ्यते ॥ १६६ ॥**
**अङ्गं गुञ्जाफलसमं भूमिर्मीनदलोपमा। गुञ्जावज्रमिदं पृष्टं तप्तं भवति घर्षणे ॥ १६७ ॥**
**शाणे सिन्दूरसङ्काशं रजो वमति चासकृत्। एष खड्गवरो राज्ञा भाग्यादेवोपजायते ॥ १६८ ॥**
**अस्य प्रभावात् तन्नास्ति यन्न साधयेत् नृपः। अङ्गं तनुशराकारं भूमिश्चैव सितासिता ॥ १६९ ॥**
**धारा तीक्ष्णा वमति च शाणे वह्निसमाः शिखाः। शरवज्रमिदं ज्ञेयं राज्ञां वांच्छितसिद्धये ॥ १७० ॥**

---

के स्पर्शमात्र से ही चमचमाहट करने लगता है॥ १५५-१५६ ॥ यह देवों को भी दुर्लभ है। शफरी मछली की त्वचा के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला, पानी में डालने पर भी ऊपर तैरनेवाला प्रोष्ठीवज्र (६२) कहा है, यह उत्तम खड्ग राजाओं के शत्रुओं का नाशक है। इसकी प्राप्ति भाग्य से ही होती है। प्राप्त होने पर यह समस्त पृथ्वी की प्राप्ति में सहायक है॥ १५७-१५८ ॥

मारिष-(शुक, तोता)-पङ्ख के समान अङ्ग, विषम छवियुक्त भूमि, सर्वसुलभ मारिषवज्र (६३) होता है॥ १५९ ॥

भृङ्गराज के फूल के सदृश अङ्ग, उसके सदृश वर्णवाली भूमिवाला, आघात सहने में असमर्थ, अधम, (६४) मार्कवा नामवाला खड्ग होता है॥ १६० ॥

**तीक्ष्णधार**—खुर के सदृश आकृतिवाली भूमि, अङ्ग से रहित, घोर आघात को सहनेवाला, शाण पर अग्नि छोड़नेवाला, सर्वसुलभ खुरवज्र (६५) कहलाता है॥ १६१-१६२ ॥

कभी निर्मल और कभी मलयुक्त भूमिवाला, इसी प्रकार कभी मन्द कभी तीव्रधारवाला होना, यह तडित् वज्र (६६) का लक्षण है॥ १६३ ॥ नीले अञ्जन के सदृश भूमि और जल की तरङ्ग के समान अङ्गवाला मेघवज्र (६७) होता है। यह शाण पर भी ठण्डा ही रहता है (अग्नि नहीं निकलती) ॥ १६४ ॥ धनैश्वर्य के रक्षार्थ इस अधम खड्ग का त्याग ही उत्तम है॥ सूर्य को ढकनेवाले मेघ के सदृश यह स्वामी के बल-प्रताप को तिरोहित कर देता है॥ १६५ ॥

मन्दधार, गाढ भूमि, अङ्गरहित सर्वसुलभ पर्वतवज्र (६८) होता है॥ १६६ ॥ गुञ्जा के सदृश अङ्ग, मछली के सदृश भूमिवाला गुञ्जावज्र (६९) होता है। यह घर्षण करने पर उष्ण हो जाता है। शाण पर चढ़ाने से सिन्दूर के सदृश अग्निकण बार-बार छोड़ता है। इसकी प्राप्ति राजा को भाग्य से ही होती है॥ १६७-१६८ ॥ इसके प्रभाव से राजाओं को कुछ असाध्य नहीं होता। हल्के सरकण्डे के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला, तीक्ष्णधारवाला शाण पर अग्नि सदृश

**दूर्वादलनिभाभूमिर्धारा तीक्ष्णा खरः स्वरः। शाणेन वमते वह्निं दूर्वावज्रं सुदुर्लभम्॥ १७१ ॥**
**अङ्गं बिल्वदलाकारं भूमिश्चैव सितासिता। बिल्ववज्रमिदं शाणे नीलपीते वमेच्छिखे॥ १७२ ॥**
**एष खड्गवरः प्रोक्तः शत्रूणां कुलनाशनः। मसूरदल-सङ्काशा भूमिरङ्गं मसूरवत्॥ १७३ ॥**
**मसूराङ्गमिदं शाणे रजो वमति चारुणम्। शोणपुष्पनिभा रेखा दीर्घाभूमिः सितेतरा॥ १७४ ॥**
**शोणाङ्गमिति जानीयात् खड्गं परमदुर्लभम्। शठीदल समाभूमिरङ्गं तत् कुसुमोपमम्।**
**शठीवज्रमिदं प्रायो लभ्यते गुणवत्तरम्॥ १७५ ॥**
**मार्जाररोमसदृशमङ्गं भूमिः सितेतरा। मार्जाराङ्गमिदं नाम्ना रोगशोकभयावहम्॥ १७६ ॥**
**एष खड्गाधमस्त्याज्यो यदीच्छेद् भूतिरात्मनः। केतकी पत्रसदृशमङ्गं यस्मिन् प्रतीयते॥ १७७ ॥**
**विद्यात् केतकवज्रं तद् वाराणसी समुद्भवम्।**

**लौहप्रदीपे—**

**अङ्गं मूर्वातन्तुनिभं भूमिर्मूर्व्वादलच्छविः॥ १७८ ॥**
**शाणेन वमते शुक्लां शिखां मौर्व्वी भवेत्ततः। मौर्व्वाङ्गमिदमुत्कृष्टं यशः कीर्त्तिबलावहम्॥ १७९ ॥**
**लिङ्गं तीक्ष्णं खरं गाढं शाणे वह्नेर्वमेत्कणम्। छिनत्यन्यविधं लौहं वज्राङ्गमिति तद्वदेत्॥ १८० ॥**

---

लपट छोड़नेवाला, राजाओं की अभीष्ट-सिद्धि करनेवाला शरवज्र (७०) होता है॥ १६९-१७० ॥

दूर्वा (दूब) के पत्र-सदृश भूमि, तीक्ष्णधार, खरस्वरवाला, शाण पर अग्नि निकालनेवाला दूर्वावज्र (७१) होता है, यह बहुत दुर्लभ है॥ १७१ ॥

बिल्वदल-(बेलपत्र)-सदृश अङ्ग, श्वेत और काली भूमिवाला बिल्ववज्र (७२) होता है। यह शाण पर नीली और पीली शिखायें छोड़ता है। यह उत्तम खड्ग शत्रुओं का नाश करनेवाला है॥ १७२ ॥

मसूर के पुष्प-सदृश भूमि, मसूर के सदृश अङ्गवाला मसूरवज्र (७३) होता है। यह शाण पर चढ़ाने से अरुण अग्नि-स्फुलिङ्ग छोड़ता है॥ १७३ ॥

शोण-पुष्प के सदृश रेखावाला, दीर्घ, कृष्णभूमिवाला शोणवज्र (७४) जानना चाहिये। यह बहुत ही दुर्लभ है॥ १७४ ॥

शठीपत्र-(बालछड़)-सदृश भूमि और उसके पुष्प सदृश अङ्गवाला शठीवज्र (७५) होता है। इस गुणवाला खड्ग प्राय मिल जाता है॥ १७५ ॥

मार्जार (बिल्ली) के रोम-सदृश अङ्ग, कृष्णभूमिवाला मार्जारवज्र (७६) नाम से प्रसिद्ध है। यह रोग, शोक और भयकारक है॥ १७६ ॥ अपने ऐश्वर्य की स्थिरता की कामना करनेवाले को इस अधम खड्ग का त्याग करना ही उचित है॥ १७७ ॥ जिसकी आकृति केतकी (केवड़ा) के सदृश हो, उसे केतकीवज्र (७७) कहते हैं। यह वाराणसी में बनता है॥ १७८ ॥

**लोहप्रदीप में**—मूर्वा (बालछड़) के रेशों के सदृश अङ्ग, मूर्वापत्र सदृशभूमि, शाण पर श्वेत शिखा को निकालनेवाला, मूर्वावज्र (७८) होता है। यह श्रेष्ठ खड्ग है और यश, कीर्ति तथा बल की प्राप्ति करानेवाला है॥ १७९ ॥

तीक्ष्ण लोहे (इस्पात) से निर्मित खरप्रकृतिवाला, गाढ (सुदृढ़), शाण पर अग्नि की चिनगारियाँ छोड़नेवाला, अन्य सभी लौहशस्त्रों को काटनेवाला वज्र (७९) नाम से प्रसिद्ध है।

**कलायपुष्प सदृशमङ्गं भूमिः सितासिता। कलायवज्रं जानीयात् तत् क्षते पाक इष्यते॥ १८१॥**
**अङ्गं चम्पकपुष्पाभं भूमिः कृष्णा तथा सिता। शिखां शाणे वमेच्छीतां तिक्तं तस्य जलं भवेत्॥**
**इदं चम्पकवज्रं स्यात् सर्वत्र विजयप्रदम्॥ १८२॥**
**अङ्गं बलादलसमं भूमिः शुक्ला तथेतरा। बलावज्रमिदं ज्ञेयं नानाभावं भवेद् द्रुतम्।**
**इत्ययं वातरोगाणां नाशने परमौषधम्॥ १८३॥**
**अङ्गं वटारोहसमं भूमिर्वटदलच्छविः। वटवज्रमिदं ज्ञेयं खरं खड्गाधमं बुधैः।**
**एतस्य स्पर्शमात्रेण नरो मुच्येत सम्पदाम्॥ १८४॥**
**वंशनीलीसमा भूमिः खरधारासिताकृतिः। वंशाङ्गमिति जानीयात् वंशवृद्धिकरः परः॥ १८५॥**
**भूमिः शालदलाकारा अङ्गं लघु सितासितम्। शालाङ्ग एषः खड्गः स्यात् पूज्यः सर्वार्थदायकः।**
**अयं शाणे वमेद् वह्निं धारा चाप्यथवा भवेत्॥ १८६॥**
**भूमिः सितासिता वापि अङ्गं ज्येष्ठीसमं लघु। ज्येष्ठीवज्रमिदं निन्द्यं न स्पृश्यं वा हितेच्छुभिः॥ १८७॥**
**पुराणजालसदृशमङ्गं भूमिः सितासिता। जालवज्रमिदं पूज्यं शत्रुसम्पत्तिनाशनम्॥ १८८॥**
**यदि शाणे वमेन्नीलां शिखां वह्निवमेच्च वा। तदैष दुर्लभः खड्गो नान्यथा भयहेतुकः॥ १८९॥**

---

मटर के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला कलायवज्र (८०) जानना चाहिये। इसके द्वारा आहत होने पर पाक (पीप-शोथादि) होता है॥ १८०-१८१॥

चम्पक (चमेली) के पुष्प-सदृश अङ्ग और कृष्ण तथा श्वेत भूमिवाला, शाण पर शीतल लपट उगलनेवाला, चम्पकवज्र (८१) होता है। इसका जल तिक्त होता है। यह सर्वत्र विजय दिलवानेवाला होता है॥ १८२॥

बला के पत्र-सदृश (कंगूरेदार) श्वेत और कृष्णभूमिवाला, बलावज्र (८२) जानना चाहिये। यह बहुत शीघ्र ही अनेक आकृतियोंवाला बन जाता है या इससे अनेक कार्य लिये जा सकते हैं। यह वात रोगों के दूर करने में परमौषध सदृश कार्य करता है॥ १८३॥

बड़ वृक्ष के सदृश अङ्ग और उसके पत्तों के सदृश आभायुक्त भूमिवाला, खरगुणयुक्त वटवज्र (८३) होता है। यह अधम खड्ग है। इसके स्पर्शमात्र से मनुष्य सम्पतिरहित हो जाता है। (शोभा नहीं देता)॥ १८४॥

वंश (बाँस) और नीली (नील) के सदृश भूमि, खरधार और श्वेत आकृतिवाला वंशवज्र (८४) होता है। यह वंश (कुल) की वृद्धि करनेवाला है॥ १८५॥

शाल वृक्ष के पत्र के आकारवाली भूमि, हल्के श्वेत कृष्ण अङ्गवाला शालवज्र (८५) होता है। यह पूज्य और सर्व कार्यों की सिद्धि करानेवाला है। यह शाण पर अग्नि निकालता है॥ १८६॥

श्वेत और कृष्णभूमि, ज्येष्ठी के सदृश लघु अङ्गवाला ज्येष्ठीवज्र (८६) होता है। यह निन्दनीय और हित चाहनेवालों के लिए न छूने योग्य है॥ १८७॥

पुरातनजाल के सदृश अङ्ग, श्वेत और कृष्णभूमिवाला जालवज्र (८७) होता है। यह पूज्य और शत्रुनाशक है। यदि शाण पर नीली शिखा को उगले और अग्नि प्रकट करे तो ऐसा खड्ग दुर्लभ है और किसी प्रकार का भी विघ्न नहीं करता॥ १८९॥

**अङ्गं पिपीलिकाकारं भूमिर्धूम्रा तथासिता। पिपीलिकाङ्ग इत्येष तत् क्षते कण्डूसम्भवः। स्वयं यदि भवेद् धूम्रः शाणे पूज्यते यस्तदा॥ १९०॥**
**नलपत्रसमाभूमिरङ्गं तत् कुसुमोपमम्। नलाङ्गमिति जानीयाद् भर्तुः सर्वार्थसाधकः॥ १९१॥**
**निरङ्का निर्मला भूमिर्घृष्टं घृष्टं वमेद्रजः। दृढा धारा भृशंस्थूला आघातं सहते न च। रजोवज्रमिदं निन्द्यं शत्रूणां विजयावहम्॥ १९२॥**
**कुष्माण्डबीजसदृशमङ्गं भूमिः सितासिता। कुष्मांडवज्रं जानीयात्तत् क्षते वेगनिग्रहः॥ १९३॥**
**अङ्गं नृरोमसदृशं भूमिर्धूम्रा सितासिता। रोमाङ्गमिति जानीयात्तत् क्षते पिडकोद्गमः॥ १९४॥**
**भूमिस्नुही दलसमा अङ्गं तत्कण्टकोपमम्। धारा तीक्ष्णा खरस्तीक्ष्णो लघुमानं खरस्पृशः॥ १९५॥**
**सुधाङ्गः खड्ग इत्येष तत्क्षते दाहतृड् भ्रमाः। मुखाक्षिकर्णनासानां दाहः पाकश्च जायते॥ १९६॥**
**अयं यदि च सर्पाणां फणासूपरि विश्यते। फणाविदारमाप्नोति सर्पो लोटयते शिरः। अस्य धावनतोयेन कुष्ठरोगविनाशनम्॥ १९७॥**
**कर्कन्धुदलपृष्ठाभा भूमिरङ्गं तु तत् समम्। कर्कन्धुवज्रं जानीयात्तत् क्षते दाहनाशनम्॥ १९८॥**
**एष खड्गाधमस्त्याज्यो जेतव्या यदि विद्विषः। अङ्गं बकुलपुष्पाभं भूमिस्तत् फलसन्निभा॥ १९९॥**

---

पिपीलिका (चींटी) के सदृश अङ्ग (मध्य में लघु) धूम्र और कृष्णभूमिवाला पिपीलिकावज्र (८८) होता है। इसके द्वारा घायल होने पर खुजली होती है। यदि शाण पर स्वयं ही धूम्राकार हो जाये तो बहुत प्रशस्त है॥ १९०॥

नल-पत्र के सदृश भूमि, उसके फूल के समान अङ्गवाला नलवज्र (८९) होता है। यह धारण करनेवाले के सब कार्यों का साधक है॥ १९१॥

धब्बोंरहित और निर्मल भूमिवाला, बार-बार घिसने पर रजकणों को छोड़नेवाला, दृढ़ और मोटीधारवाला, आघात को न सहनेवाला, शत्रुओं को विजय देनेवाला (अपनी पराजय करनेवाला) रजोवज्र (९०) होता है॥ १९२॥

कुष्माण्ड (पेठे) के बीज-सदृश अङ्ग, श्वेत और कृष्णभूमिवाला कुष्माण्डवज्र (९१) जानना चाहिये। इससे आहत होने पर चेष्टाओं आदि का निरोध हो जाता है (अङ्ग अकड़ जाते हैं)॥ १९३॥

मनुष्य के रोम-सदृश अङ्ग, धूम्रवर्ण, श्वेत और कृष्णभूमिवाला रोमवज्र (९२) होता है। इससे घायल होने पर घाव के आसपास फुंसियाँ हो जाती हैं॥ १९४॥

स्नुही (थूहर) के सदृशभूमि और इसके काँटों के सदृश अङ्ग, तीक्ष्णधार, खर, तीक्ष्ण, छोटी आकृति और खर स्पर्शवाला सुधावज्र (९३) होता है। इसके घाव में जलन होती है और मुख, आँख, कान आदि पक जाता है॥ १९५-१९६॥

इसको यदि साँपों के फणों (शिर) पर रख दें तो फण फट जाता है और साँप शिर पटकता है। इसके प्रक्षालित जल से कुष्ठरोग का निवारण होता है॥ १९७॥

कर्कन्धु दल की आभायुक्त भूमि और उस सदृश ही अङ्गवाला कर्कन्धुवज्र (९४) होता है। इसके घाव में दाह नहीं होती है। शत्रुओं को जीतनेवाले को इस अधम खड्ग का परित्याग ही उचित है॥ १९८-१९९॥

बकुलाङ्गमिदं पूज्यं शाणे सुरभिगन्धवत्। तन्नास्ति जगतीमध्ये यदनेन न साध्यते॥ २००॥
अङ्गं मिश्रितं यस्मिन्न किंचिद् व्यक्तमीक्षते। सर्वेषां दर्शनं वापि तीक्ष्णधारः खरः स्वरः॥ २०१॥
एष काञ्जिकवज्रः स्याद्यत्नादेवोपलभ्यते। नैनं प्राप्यापि वर्द्धन्ते शेषाश्चित्रादयोऽपि च॥ २०२॥
भूमिः कृष्णानिरङ्गा चेद्धारातीक्ष्णा दृढापि च। आघातं सहते घोरं रक्तं स्पर्शेन यो विशेत्॥ २०३॥
शाणेन वह्निं वमति ध्रुवं वाप्यति घर्षणात्। महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः॥ २०४॥
अत्यन्तनिर्मला भूमिः शरीरं प्रतिबिम्बितम्। धारा तीक्ष्णा स्वरस्तीक्ष्णः स्वच्छश्चाङ्गं तद्विनिर्दिशेत्॥ २०५॥
तस्मिन्यदा भवेद्रेखा ऊर्ध्वा ऋत्वाख्यकं तदा। अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत्॥ २०६॥
एतत् त्रितयमुद्दिष्टं खड्गानां प्रवरं बुधैः। प्रायशो लभ्यते लोके यदि सर्वगुणावहम्॥ २०७॥
इतीदं निखिलं प्रोक्तं वज्राणां लक्षणं मया। प्रयत्नैर्लिखितं व्यक्तं सर्वेषां हितकाम्यया॥ २०८॥
इतः परन्तु लौहानां लक्षणं यत्र लक्ष्यते। तस्य दासो भवाम्येव प्रतिज्ञेति कृता मया॥ २०९॥
द्विलिङ्गमिश्रमालोक्य मिश्राङ्गमिति निर्दिशेत्। सर्वेषामङ्गमालोक्य सर्वाङ्गमिति निर्दिशेत्॥ २१०॥

**खड्गस्य रूपाणि—**

नीली कलाय-कुसुमच्छविगृञ्जनाभा, या चन्द्रनीलमणि-काचमणिप्रभा च।
भूमिश्च या मरकत-प्रतिभावभासा, खड्गस्य नीलरूपमिदं वदन्ति॥ २११॥

---

बकुल (मौलसरी) के पुष्प-सदृश अङ्ग, उसके फल-जैसी भूमिवाला बकुलवज्र (९५) होता है। शाण पर चढ़ाने से इससे सुरभि=गन्ध निकलती है। संसार में इसके द्वारा सभी कुछ प्राप्त होने योग्य है॥ २००॥

मिश्रित अङ्ग-(मिलीजुली आकृति)-वाला, जिसमें सब खड्गों की आकृति दिखलाई पड़ती है, तीक्ष्णधार, खर स्वरवाला काञ्जिकवज्र (९६) होता है। यह यत्न से ही प्राप्त होता है। इसको प्राप्त करने पर उसे देवता भी नहीं जीत सकते॥ २०१-२०२॥

जिसकी भूमि कृष्णवर्णवाली और अङ्गरहित हो, जिसकी धार तीक्ष्ण और दृढ़ हो, जो घोर आघात को भी सहन कर सकता हो, रक्त स्पर्शमात्र से ही जो भीतर प्रविष्ट हो जाता हो, शाण और अतिघर्षण से जिसमें अग्नि निकलती हो, उसे महिषवज्र (९७) कहते हैं। यह दुर्लभ नहीं है। सर्वत्र मिल जाता है॥ २०३-२०४॥

जिसकी भूमि निर्मल हो, जिसमें प्रतिबिम्ब (परछाई) दिखलाई दे, तीक्ष्णधार, तीक्ष्णस्वर, स्वच्छ अङ्गवाला स्वच्छवज्र (९८) कहलाता है॥ २०५॥

जब इसी में रेखा हो तो इसे ऋतुवज्र (९९) कहते हैं। इसमें ही जब तिरछी रेखा हो तो उसे वक्रवज्र (१००) नाम से पुकारते हैं॥ २०६॥

यह खड्गों के तीन भेद (उत्तम, मध्यम, अधम) सभी कह दिये गये हैं। मैंने (ग्रन्थकार) सभी के हित की कामना से प्रयत्नपूर्वक स्पष्ट लिख दिया है॥ २०७॥

लोहप्रदीप में कहे लक्षणों से अतिरिक्त यदि किसी ने खड्गादि के लक्षण विशेष बतलायें हों तो मैं उनका अनुचर बनना स्वीकार करता हूँ। यह मेरी प्रतिज्ञा है।॥ २०८-२०९॥

दो अङ्गों का मेल जिस खड्ग में हो उसे मिश्राङ्गवज्र कहे और सब अङ्गों के मेल को देखकर सर्वाङ्ग (सर्वगुणोपेत) खड्ग होता है। ऐसा निर्देश करे॥ २१०॥

**अब खड्गों के स्वरूप का वर्णन किया जाता है—**नील के पौधे और मटर के पुष्प

तत्र चेन्निन्दितान्यङ्गान्यरिष्टानि बहून्यपि। दृश्यन्ते बहुदोषाणि तथापि गुणवत्तरम् ॥ २१२ ॥
या कालकाम्बुदमसीरसकालसर्पशङ्कान्धकारकचभारसमाविभाति ।
भूमिश्च या भ्रमरबन्धुसमावभासा खड्गस्य कृष्णमिति रूपमिदं वदन्ति ॥ २१३ ॥
अत्र नेत्राणि सम्पत्यै अरिष्टान्यशुभानि च। साधारणमिदं रूपं प्राह नागार्जुनो मुनिः ॥ २१४ ॥
या प्रावृषेण्यनवभेकसमानवर्णा गोमेदरत्नसदृशापि च यस्य भूमिः।
खड्गस्य पिङ्गमिति रूपमिदं वदन्ति भर्तुर्यशोबलधनक्षय कारणाय ॥ २१५ ॥
या मन्दधूम सदृशा च शिरीषपुष्पतुल्या विभाति मलिनापि च खड्गभूमिः।
नागार्जुनो वदति धूम्रमिदं हि रूपं भर्तुयशोबलधनावलिवर्धनाय ॥ २१६ ॥
द्विरूपं मिश्रितं कृत्वा सङ्करं प्रवदेद् बुधः। त्रिभी रूपैः समेतन्तु खड्गं त्रिपुरसंज्ञितम्।
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गमुत्तमम् ॥ २१७ ॥
जातिश्चतुर्विधा प्रोक्ता खड्गानां या पुरा मया। सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते ॥ २१८ ॥

**ब्राह्मणखड्गजातिः—**

शुद्धाङ्गः शुद्धवर्णश्च सुनेत्रसुस्वरश्च यः। मृदुस्पर्श सुसन्धेयस्तीक्ष्णधारो महागुणः ॥ २१९ ॥

---

के समान छवि, गाजर के समान आभा, चन्द्रनीलमणि और काचमणि के सदृश चमकनेवाला, जिसकी भूमि मरकतमणि के सदृश हो, ऐसे खड्ग के स्वरूप को नीलरूप कहते हैं ॥ २११ ॥

इस खड्ग के भी बहुत निन्दित अङ्ग, अरिष्ट और बहुत-से अन्य दोष कहे हैं तब भी यह खड्ग अपेक्षाकृत् अन्य खड्गों से श्रेष्ठ है ॥ २१२ ॥

जो तलवार काले वर्णवाली, बरसनेवाले मेघ के सदृश, काली स्याही के समान, काले सर्प जैसी, अन्धकार या काले बालों जैसे स्वरूपवाली, भारी हो, जिसकी भूमि भ्रमर सदृश हो, ऐसे खड्ग को कृष्णरूपवाला कहते हैं ॥ २१३ ॥

इसमें भी नेत्रादि एवं अरिष्टादि अशुभलक्षण होने से इस खड्ग को साधारण (न अधिक अच्छा न बुरा) नागार्जुन मुनि ने कहा है ॥ २१४ ॥

जो खड्ग वर्षाऋतु के प्रारम्भ में उत्पन्न हुए मण्डूक (पीले वर्णवाला) के समान वर्णवाला हो, जिसकी भूमि गोमेद मणि के सदृश हो, ऐसे खड्ग को पिङ्गरूप (पीले वर्णवाला) कहते हैं। यह धारण करनेवाले के बल, धन और कीर्ति का नाशक है ॥ २१५ ॥

जो हल्के धूयें के समान, शिरीष (सिरस) के फूल-समान वर्णवाली जिसकी भूमि इसी वर्णवाली हो, मलिन भी हो, नागार्जुन मुनि ने इस खड्ग को धूम्रवर्णवाला खड्ग कहा है। यह धारण करनेवाले का यश, बल और धन का वर्धक है ॥ २१६ ॥

जब खड्गों में दो रूप हों, तब उसे मतिमान सङ्कर खड्ग जाने, इसी प्रकार तीन वर्णों से युक्त को त्रिपुर और चारों वर्णों से युक्त खड्ग चतुरखड्ग होता है, यह उत्तम है ॥ २१७ ॥

जो चार प्रकार की खड्गों की जाति मैंने पहले कही है, अब मैं उनके लक्षणों को कहता हूँ ॥ २१८ ॥

**( १ ) ब्राह्मण जातिवाला खड्ग**—शुद्ध अङ्ग, शुद्ध वर्ण, अच्छे नेत्र, अच्छी ध्वनिवाला,

खड्गं ब्राह्मणजातिं तं प्राह नागार्जुनो मुनिः। अस्य क्षते भवेच्छोथो घोरः सर्वाङ्गगोचरः॥ २२०॥
मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते। अघृष्टं त्रिफलाकल्कमर्द्धरात्रिन्दिवोषितम्॥ २२१॥
मलिनत्वं न सन्धत्ते निर्मलं कुरुते परम्। तरुणादित्यकिरणस्पर्शादेव तृणे स्थितः॥ २२२॥
दहेत् सर्वं न तु करं पुरुषस्य हि धारिणः। गायत्र्युच्चारणमात्रेण खरतां व्रजति स्फुटम्॥ २२३॥
एष खड्गवरः सर्वमरिष्टं नाशयेद् ध्रुवम्। अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत्॥ २२४॥
तस्मादेव मनुष्याणां सुलभो न हि भूतले। दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये॥ २२५॥
इति ब्राह्मणखड्गजातिः।

**क्षत्रियजातिखड्गः—**

धूम्रवर्णं महासारं तीक्ष्णधारं खरस्वरम्। सर्वाघातसहं सर्वनेत्रवर्णस्वराकरम्॥ २२६॥
खड्गक्षत्रियजातिं तं जानीयात्खड्गकोविदः। अस्य क्षते भवेद्दाहस्तृषानाहो ज्वरो भ्रमः॥ २२७॥
मृत्युश्च जायते शाणे वमेद्वह्निकणान् बहून्। संस्कारे चाप्यसंस्कारे नैर्मल्यं तस्य लक्ष्यते॥ २२८॥
शाणेऽप्यशाणे खरतामूर्ध्नि (युद्धे) चात्यन्त तीक्ष्णता। रक्तस्पर्शनमात्रेण विशेदन्तरमन्तरम्॥ २२९॥
अयं खड्गवरः पूज्यो मनुष्यैरपि लभ्यते॥ २३०॥

**वैश्यजातिः—**

नीलवर्णः कृष्णवर्णः संस्कारे निर्मलो भवेत्। शाणेन खरता चास्य घाततुल्यं निकृन्तति॥ २३१॥

---

छूने में मृदु (कोमल), चलाने में उत्तम, तीक्ष्ण धार, उत्तम गुणोंवाला॥ २१९॥ खड्ग नागार्जुन मुनि ने ब्राह्मणजातिवाला कहा है। इसके द्वारा आहत होने पर सभी अङ्गों में अत्यन्त शोथ (सूजन) होता है। मूर्च्छा, प्यास, ज्वर होकर मृत्यु भी हो जाती है॥ २२०॥ बिना घिसे (पीसे) हुए त्रिफला (हरड़, बहेड़ा, आंवला) के कल्क में आधी रात्रि और पूरे दिन रखने से भी इस पर मैल (जङ्ग) नहीं लगता अपितु और चमकता है। इसे तिनके पर रखने से सूर्य की किरणों के स्पर्शमात्र से ही जला देता है, परन्तु धारण करनेवाले पुरुष के हाथ को नहीं जलाता। यह गायत्रीमन्त्र के उच्चारणमात्र से ही पर्याप्त कठोर हो जाता है। यह श्रेष्ठ खड्ग है, सभी सङ्कटों का निश्चितरूप से निवारण करता है। इसकी कृपा से मनुष्य तीनों लोकों को भी विजय कर सकता है॥ २२१-२२४॥ इसीलिये यह पृथ्वी पर मनुष्यों को सुलभ नहीं है। यह स्वर्ग (त्रिविष्टप-तिब्बत) कुशद्वीप और हिमालयस्थ देशों में ही देखा जाता है॥ २२५॥

**(२) क्षत्रिय जातिवाला खड्ग**—धूम्रवर्णवाला, विस्तृत, तेजधार, खर स्वर, सभी आघातों को सहनेवाला, नेत्र, वर्ण और स्वरादि सभी सुलक्षणों से युक्त खड्ग को खड्गज्ञाता क्षत्रियजाति का खड्ग कहते हैं॥ २२६॥ इसके घाव में जलन होती है। तृषा, आनाह (अफारा), ज्वर, भ्रम, मूर्च्छा या प्रलाप होता है॥ २२७॥ और मृत्यु भी हो जाती है। इसे शाण पर चढ़ाने से अग्नि की चिनगारियाँ बहुत निकलती हैं। संस्कार (पानी चढ़ाना) या बिना संस्कार के भी यह शुद्ध (मलरहित) ही रहता है॥ २२८॥

यह शाण पर चढ़ाया हुआ या बिना चढ़ाया हुआ भी सदैव तीक्ष्ण रहता है। रक्तस्पर्श (हल्के आघात) मात्र से ही अन्दर प्रविष्ट हो जाता है। यह श्रेष्ठ खड्ग मनुष्यों को भी प्राप्त है॥ २२९-२३०॥

**(३) वैश्यजातिवाला खड्ग**—नीले और काले वर्णवाला, संस्कार द्वारा निर्मल होनेवाला,

**वैश्यजातिरयं खड्गः क्षते त्वङ्मात्रदर्शनम्। नात्युत्कृष्टो नातिहीनः सर्वत्रैवोपलभ्यते॥ २३२॥**

**शूद्रजातिः—**

**सजलाम्भोदसङ्काशः स्थूलधारो मृदुस्वरः। संस्कारे चैव मलिनः शाणे चापि खरेतरः॥ २३३॥**
**शूद्रजातिरयं खड्गः क्षते नाल्पापि वेदना। दूरादेषोऽधमस्त्याज्यो यदीच्छेद् हितमात्मनः॥ २३४॥**
**प्रायशः सर्वलोकेषु स्वयमेवोपदृश्यते। द्वयोर्लक्षणमालोक्य जारजं खड्गमादिशेत्॥ २३५॥**
**त्रयाणां लक्षणेनैव त्रिजातिं खड्गमादिशेत्। चतुर्णां लक्षणेनैव जातिसङ्करमुच्यते॥ २३६॥**

**अथ त्रिंशन्नेत्राणां लक्षणानि—**

**अङ्गं स्यात् सर्वतो वापि नेत्रमेकत्रसंस्थितम्। अतः परं तु नेत्राणां लक्षणं संप्रवक्ष्यते॥ २३७॥**
**नेत्रेणैकेन हस्तेन निन्दितोऽपि प्रशस्यते। यथा जातिविहीनोऽपि गुणवान् पूज्यते नरः॥ २३८॥**
**खड्गः सदङ्गो न च नेत्रहीनो न पूज्यते नाम्बुकरः स एव।**
**यथा मनुष्यः खलु सुन्दराङ्गो न कर्मयोग्यो भुवि नेत्रहीनः॥ २३९॥**
**चक्रपद्मे गदाशंखौ भयवर्धन्नवाङ्कुशः। छत्रं पताका वीणा च मत्स्यन्तु शिवलिङ्गकः॥ २४०॥**
**ध्वजार्धचन्द्रकलसाः शूलं शार्दूलनेत्रकम्। सिंहसिंहासनञ्चैव गजहंसमयूरकाः॥ २४१॥**
**जिह्वादन्ताश्च खड्गश्च मनुष्यश्चामरस्तथा। शैलश्चैव तथा पुष्पमाला सर्षप एव च॥ २४२॥**

---

शाण पर चढ़ाने से तीक्ष्ण होनेवाला, आघात के समान ही काटनेवाला खड्ग वैश्यजाति का होता है। इसके द्वारा आहत होने पर त्वक्-(चमड़ी)-मात्र का दर्शन होता है। यह न बहुत श्रेष्ठ है और न बहुत निकृष्ट। यह सर्वत्र प्राप्त है॥ २३१-२३२॥

**(४) शूद्र जातिवाला खड्ग**—बरसनेवाले मेघ के सदृश वर्णवाला, मोटी धार, मृदु (हल्का) स्वर, संस्कार होने पर भी मलिन रहनेवाला, शाण पर चढ़ाने से भी कुण्ठित रहनेवाला शूद्रजाति का खड्ग होता है। इससे आहत होने पर थोड़ी-सी भी पीड़ा नहीं होती। अपना हित चाहनेवाले को इसका परित्याग कर देना चाहिये॥ २३३-२३४॥ यह सब स्थानों में सहज ही प्राप्त हो जाता है। दो लक्षणों से युक्त खड्ग को जारज, तीन लक्षणोंवाले को त्रिजाति और चार लक्षणों से युक्त खड्ग को सङ्कर कहते हैं॥ २३५-२३६॥

**तीस नेत्रों का प्रारम्भ किया जाता है**—अङ्ग तो समष्टिरूप से सर्वत्र लक्षित होता है, परन्तु नेत्र (खड्ग पर प्रशस्त चिह्न) एक स्थान पर ही होता है। इससे आगे नेत्रों के लक्षण कहते हैं॥ २३७॥ एकहस्त (खड्ग में एक हाथ दूर होनेवाले) नेत्र से निन्दित खड्ग भी प्रशस्त होता है। जैसे उत्तम कुल आदि में उत्पन्न न होने पर भी गुणवान् व्यक्ति पूजित होता है॥ २३८॥

अच्छे अङ्गादि से युक्त खड्ग भी बिना नेत्र के प्रशंसनीय नहीं है, यह कार्य योग्य नहीं होता, जैसे सुन्दर अङ्गोंवाला मनुष्य भी नेत्र के बिना काम करने में असमर्थ रहता है॥ २३९॥

चक्र, पद्म, गदा, शङ्ख, भयदायक नवीन अङ्कुश, छत्र, पताका, वीणा, मत्स्य, शिवलिङ्ग, ध्वजा, अर्धचन्द्र, कलस, शूल, शार्दूल, सिंह, सिंहासन, गज, हंस, मयूर, जिह्वा, दन्त, खड्ग (गेंडे का सींग) मनुष्य, चामर, शैल, पुष्प, माला और सर्षप—ये खड्ग के नेत्र कहे हैं। (पहले भी इनका वर्णन किया जा चुका है। यहाँ यह वर्णन अप्रासंगिक है, अथवा अन्य पुस्तक का प्रकरण उद्धृत किया गया है)॥ २४०-२४२॥

**चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते। तं चक्रनेत्रं जानीयात् भर्तुः सर्वार्थसाधनम्॥ २४३॥**
**अनेनैकेन खड्गेन कृत्स्नां साधयते महीम्। प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम्॥ २४४॥**
**यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत्। अयं खड्गवरो यत्र तत्रैव कमलालया॥ २४५॥**
**ऊर्ध्वा स्थूला यदा रेखा गदाकारा प्रतीयते। गदानेत्रमिदं विद्धि सर्वशत्रुनिषूदनम्॥ २४६॥**
**शङ्खाकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते। शङ्खनेत्रमिदं सर्वं देवानामपि दुर्लभम्॥ २४७॥**
**डमरुप्रतिमं नेत्रं यस्य भूमौ प्रतीयते। सर्वार्थसाधकं खड्गं तं विद्याद् विजयप्रदम्॥ २४८॥**
**धनुः स्वरूपं यन्नेत्रं धनुर्नेत्रमुशन्ति तम्। तस्य स्पर्शनमात्रेण मन्दोऽपि प्रमुखायते॥ २४९॥**
**अयं निशीथे विजने खड्गो झनझनायते। यन्नेत्रमङ्कुशाकारं तं विद्याद् गुणवत्तरम्॥ २५०॥**
**खड्गमङ्कुशनेत्राख्यं भर्तुः सर्वार्थसाधकम्। अलक्ष्मीपापरक्षोघ्नं कृत्याग्रहनिवारणम्॥ २५१॥**
**छत्राकारं यदा नेत्रं छत्रनेत्रं वदन्ति तम्। अस्य प्रभावात् क्षीणोऽपि सार्वभौमो भवेन्नृपः॥ २५२॥**
**दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः। महेश्वरोऽपि सचिवः सचिवो मण्डलेश्वरः।**
**मण्डलेशश्चक्रवर्त्ति भवेदत्र न संशयः॥ २५३॥**

---

जब चक्र के आकार का नेत्र अङ्ग में दिखलाई दे तो इसे चक्रनेत्र (१) कहते हैं। यह धारण करनेवाले की सभी कामनाओं को पूर्ण करता है॥ २४३॥ इस अकेले खड्ग से समस्त पृथ्वी को वश में किया जा सकता है।

खिले हुए कमल के सदृश अथवा कमल की पङ्खुड़ी के समान पद्मनेत्र (२) होता है। इस गुण से युक्त खड्ग जिसके पास होता है, वहीं लक्ष्मी निवास करती है। (लक्ष्मी का निवास भी कमल में होता है)॥ २४४-२४५॥

जिस खड्ग में गदा की आकृति-जैसी ऊँची और स्थला (स्थूल) रेखा प्रतीत हो, उसे गदानेत्र (३) जानना चाहिये। यह खड्ग सब शत्रुओं का संहारक होता है॥ २४६॥

जब खड्ग के मध्य में शङ्ख के आकारवाला नेत्र दीखे, तो इसे शङ्खनेत्र-(४)-वाला खड्ग कहते हैं। यह देवों को भी दुर्लभ है॥ २४७॥

जिसकी भूमि पर डमरु-सदृश नेत्र (५) प्रतीत हो, उस खड्ग को सब कार्यों का साधक और विजयप्रद जानना चाहिये॥ २४८॥

धनुष के समान नेत्रवाला धनुनेत्र (६) होता है। इसके स्पर्शमात्र (हाथ में लेते ही) मन्दपुरुष भी शूरवीर हो जाता है॥ २४९॥ यह खड्ग रात्रि में और एकान्त में (झन्-झन) की ध्वनि करता है।

जो नेत्र अङ्कुश की आकृतिवाला हो उसे गुणवान् जाने। इससे युक्त खड्ग को अङ्कुशनेत्र (७) कहते हैं। यह धारण करनेवाले की सब मनः कामनाओं को पूरी करता है। दारिद्र्य, पाप, राक्षस, (रोग-शोक), कृत्या (दूसरे द्वारा किया गया गुप्त प्रयोग), ग्रह आदि सभी सङ्कटों का निवारण करता है॥ २५०-२५१॥

छत्राकार नेत्रवाले खड्ग को छत्रनेत्र (८) कहते हैं। इसके प्रभाव से दुर्बल भी सार्वभौम राजा हो जाता है॥ २५२॥

दीन व्यक्ति भी सुखी हो जाता है, सुखी व्यक्ति महेश्वर हो जाता है महेश्वर, सचिव, सचिव

पताकाकृतिनेत्रं चेत् सर्वसम्पत्तिकारकम्। पताकानेत्रमाहुस्तं संग्रामेविजयप्रदम्॥ २५४॥
नेत्रं वीणाकृतिर्यदा वीणानेत्रमुशन्ति तम्। निशीथे विजने खड्गो वीणावत् स्वनमावहेत्।
अस्य प्रभावात् सर्वेऽवशापि वश्या भवन्ति हि॥ २५५॥
मत्स्याकृतिर्यदानेत्रं मत्स्यनेत्रमिदं विदुः। अस्य प्रभावात् क्षितिपः कृत्स्नां साधयेद् महीम्॥ २५६॥
शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिदं विदुः। भर्त्तुः सर्वार्थसंसिद्ध्यै शत्रूणां नाशनाय च।
वामपार्श्वे तु यात्रायां धर्त्तव्योऽयं तथा रणे॥ २५७॥
(अत्र ध्वजार्द्धचन्द्रकलसानां लक्षणानि पतितानि)।
शूलाकृति यदा नेत्रं शूलनेत्रं वदन्ति तम्। सर्वार्थसाधकः सर्वारिष्टानिष्टप्रणाशनः॥ २५८॥
शार्दूलनेत्रं तं विद्यात् शार्दूलाकृतिनेत्रतः। शत्रुश्रेणी विनाशाय संग्रामे विजयाय च॥ २५९॥
सिंहाकृतिर्यदा नेत्रं सिंहनेत्रमिमं विदुः। अस्य प्रभावात्क्षीणोऽपि कृत्स्नां साधयते महीम्॥ २६०॥
तत् सिंहासननेत्रं स्यान्नेत्रे सिंहासनोपमे। अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते महीम्॥ २६१॥
गजाकृतिर्यदा नेत्रं गजनेत्रं वदन्ति तम्। अस्य प्रभावात् क्षीणोऽपि लभते राजसम्पदम्॥ २६२॥

---

मण्डलेश्वर (अनेक देशों का राजा) और मण्डलेश्वर चक्रवर्ति=सारे संसार का सम्राट् हो जाता है, इसमें संशय नहीं है॥ २५३॥

पताका की आकृति सदृश खड्ग को पताका नेत्र (९) कहते हैं, यह सब धनैश्वर्यों को देनेवाला और संग्राम में विजय करानेवाला है॥ २५४॥

वीणा की आकृति सदृश नेत्रवाला खड्ग वीणा नेत्र (१०) कहलाता है। रात्रि और एकान्त में इस खड्ग से वीणा के समान स्वर निकलता है। इसके प्रभाव से वश में न आनेवाले भी सभी वश में आ जाते हैं॥ २५५॥

मत्स्य (मछली) की आकृति से युक्त नेत्रवाले खड्ग को मत्स्यनेत्र (११) कहते हैं। इसके प्रभाव से राजा सारी पृथ्वी को वश में कर लेता है॥ २५६॥

शिवलिङ्ग के समान नेत्रवाले खड्ग को लिङ्गनेत्र (१२) कहते हैं। यह खड्ग स्वामी के सब कार्यों का साधक और शत्रुओं का संहारक है। इसे यात्रा एवं रण (युद्धक्षेत्र) में बाईं ओर धारण करना चाहिये॥ २५७॥

[इस प्रकरण में ध्वज (१३) अर्धचन्द्र (१४) और कलस (१५) के लक्षण नहीं हैं।]

शूल (भाला) के सदृश आकृतिवाले को शूलनेत्र (१६) और इससे युक्त खड्ग शूलनेत्र खड्ग कहलाता है। यह सब कामों का साधक और सब सङ्कटों का नाशक है॥ २५८॥

शार्दूल (चीता) की आकृतिवाले खड्ग को शार्दूलनेत्र (१७) जानना चाहिये। यह शत्रु के समूह का नाशक और संग्राम में विजय दिलानेवाला है॥ २५९॥

सिंह की आकृतिवाला खड्ग सिंहनेत्र (१८) होता है। इसके प्रभाव से राजा समस्त पृथ्वी को अपने वश में कर लेता है॥ २६०॥

सिंहासन के सदृश नेत्रवाला सिंहासननेत्र (१९) कहलाता है। इसके प्रभाव से राजा समस्त पृथ्वी को वश में कर लेता है॥ २६१॥

गज (हाथी) की आकृतिवाला खड्ग गजनेत्र (२०) होता है। इसके प्रभाव से दुर्बल भी

**नेत्रं हंसाकृतिर्यदा हंसनेत्रं वदन्ति तम्। अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम्॥ २६३॥**
**मयूराकृति नेत्रे द्वे तन्नेत्रमिति निर्दिशेत्। अस्य प्रभावान् मनुजः सर्पदर्पान् निषूदयेत्॥ २६४॥**
**जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति च। संग्रामखर्परेष्वयं पिबेद् वैरिशिरो रजः॥ २६५॥**
**दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम्। अयं रिपुगणं मूर्द्धनि चर्वयत्यतिभैरवम्॥ २६६॥**
**खड्गाकारं यदा नेत्रं खडगनेत्रं वदन्ति तम्। अस्य प्रभावात् मनुजस्त्रिलोकीं वशयेदपि॥ २६७॥**
**मनुष्यपुत्रिकाकारा पुत्रिका नेत्रमुच्यते। अयं सशैलां सद्वीपां कृत्स्ना साधयते क्षितीम्॥ २६८॥**
**न चेयं पुत्रिका किन्तु जयलक्ष्मीरिह स्वयम्। तस्मान्नायं मनुष्यानामल्पभाग्येन लभ्यते॥ २६९॥**
**चामराकृति नेत्रत्वात् तन्नेत्रमिति निर्दिशेत्। अस्य प्रभावात् जायन्ते चामरोद्धृतः सम्पदः॥ २७०॥**
**एकानेकशिखे शैलनेत्रे तन्नेत्रसंज्ञकम्। अपि राष्ट्रमये युद्धे विषमे वैरिसङ्कटे।**
**स्थिरी करोति धरणीं धरणीं पर्वतो यथा॥ २७१॥**
**पुष्पमालां समं नेत्रं पुष्पनेत्रं वदन्ति तम्। अस्य प्रभावात् तुष्यन्ति ग्रहाः सर्वाश्च देवताः॥ २७२॥**

---

राजसम्पदा को प्राप्त कर लेता है॥ २६२॥

जब हंस की आकृतिवाला नेत्र हो तो उसे हंसनेत्र (२१) कहते हैं। इसके प्रभाव से राजा उत्तम यश की प्राप्ति करता है॥ २६३॥

मयूर (मोर) की आकृति के दो नेत्र होने पर खड्ग मयूरनेत्र (२२) कहलाता है। इसके प्रभाव से व्यक्ति सभी दर्प-(घमण्ड)-वालों का संहार कर सकता है॥ २६४॥

जिह्वा की आकृतिवाला खड्ग जिह्वानेत्र (२३) कहलाता है। इस चिह्न से युक्त खड्ग संग्रामरूपी कपालों में वैरि के शिर से निकला हुआ रक्तपान करता है॥ २६५॥

दन्त की आकृतिवाला खड्ग दन्तनेत्र (२४) कहलाता है, इस चिह्न से युक्त खड्ग का प्रभाव बड़ा भयानक होता है। यह शत्रु के शिर को चबा डालता है (भयानक आघात करता है)॥ २६६॥

खड्ग की आकृति अथवा गेंडे के सींग की आकृतिवाला खड्गनेत्र (२५) कहलाता है। यह खड्ग पर्वत-द्वीपोंसहित सारी पृथ्वी को विजय करता है॥ २६७॥

मनुष्य की आँख की पुतली-जैसे चिह्नवाला खड्ग पुत्रिकानेत्र (२६) कहलाता है। यह खड्ग पर्वत-द्वीपों-सहित सारी पृथिवी को विजय करता है। यह पुत्रिका न होकर स्वयं ही विजयश्री होती है। इसलिये इस खड्ग को मन्दभाग्यवाला प्राप्त नहीं कर सकता॥ २६८-२६९॥

चँवर की आकृतियुक्त खड्ग चामरनेत्र (२७) होता है। इसके प्रभाव से चामर द्वारा अर्जित सम्पति की प्राप्ति (राज्यप्राप्ति) होती है॥ २७०॥

एक या अनेक (बहुत) शिखाओं-(चोटियों)-वाले पर्वतचिह्न जिस खड्ग में दीखें उसे शैलनेत्र (२८) कहते हैं। यह खड्ग राष्ट्र में भय (आन्तरिक), विषम युद्ध में शत्रु द्वारा आपत्ति होने पर स्वराज्य को स्थिर रखता है, जैसे पृथ्वी को पर्वत स्थिर (सन्तुलित) रखते हैं॥ २७१॥

पुष्पमाला की आकृति से युक्त पुष्पनेत्र (२९) होता है। इसके प्रभाव से सभी ग्रह और देवता सन्तुष्ट हो जाते हैं॥ २७२॥

**भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम्। अयं शत्रुगणं हन्ति यथा मर्त्यं भुजङ्गमः॥ २७३॥**
**सवर्णमसवर्णञ्च तत् सर्वं द्विविधं भवेत्। सवर्णं शान्तिसम्पत्त्यै रिपुनाशे तथा परम्॥ २७४॥**
**द्वयोरेकत्रपृष्ठे च तत् पुनर्द्विविधं भवेत्। एकलोकसुखं नेदं ददाति द्विविधं द्वयोः॥ २७५॥**
**मूलमध्याग्रसंस्थानात्तत् पुनर्द्विविधं भवेत्। अग्रे चाग्रफलं ज्ञेयं मध्ये मध्यफलं मतम्॥ २७६॥**
**मूले फलं जघन्यं स्यात् प्राह नागार्जुनो मुनिः। एकं द्वे त्रीणि नेत्राणि नात्र संख्याव्यतिक्रमः॥ २७७॥**
**एकं धर्मस्वर्गकामौ द्वे त्रीणि च त्रिवर्गकम्। तत्फलानि प्रयच्छन्ति प्राह नागार्जुनो मुनिः॥ २७८॥**
**द्विनेत्रमिति जानीयात् स्वसंज्ञां नेत्रयोर्द्वयोः। त्रिनेत्रं त्रिभिर्ज्ञेयं बहुनेत्रमतः परम्॥ २७९॥**
**यथोत्तरं गुणवहं खड्गमाहुरनुत्तमम्। दिङ्नेत्रमिति निर्दिष्टं नेत्राणां शुभदायिनाम्॥ २८०॥**
**इति खड्गपरीक्षायां नेत्राध्यायः पञ्चमः। यथानेत्रस्य संस्थानं तथारिष्टस्य लक्षयेत्।**
**नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः। प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टेनैकेन निन्दितः॥ २८१॥**

**अथ त्रिंशदरिष्टानां लक्षणानि—**

**छिद्रकाकपदे रेखा भिन्नं भेकश्च मूषिका। विडालः शर्करानीला मशको भृङ्गसूचकः॥ २८२॥**

---

जिस खड्ग में काले सर्प के समान नेत्र दिखलाई दें, उसे सर्प नेत्र (३०) कहते हैं। यह सर्प के समान शत्रुओं का संहारक होता है॥ २७३॥

ये नेत्र सवर्ण (खड्ग के रूप-सदृश) और असवर्ण (भिन्नरूपवाले) दो प्रकार के होते हैं। सवर्ण नेत्र शान्ति और धन का हेतु है तथा असवर्ण शत्रु-नाशक है॥ २७४॥

जब ये नेत्र खड्ग के पृष्ठभाग पर दोनों ओर स्थित हों, तब ये द्विविध कहलाते हैं। ये द्विविध (दो लक्षणों से युक्त) केवल एक लोक का सुख नहीं देते अपितु दोनों (लोक-परलोक) में सुखदायक होते हैं॥ २७५॥

ये द्विविध नेत्र खड्ग के मूलभाग, मध्यभाग और अग्रभाग में हों तो अग्रभाग में होने से उत्तम फलदायक मध्य में, मध्यफलकारक और मूल में स्थित होने पर निकृष्टफल देनेवाले होते हैं। यह नागार्जुन मुनि ने कहा है॥ २७६॥

जब एक, दो या तीन नेत्र क्रमानुसार हों तो एक धर्म, दो स्वर्ग और काम तथा तीन त्रिवर्ग (धर्म-अर्थ-काम) का फल देते हैं। ऐसा नागार्जुन मुनि ने कहा है॥ २७७-२७८॥

दो नेत्रों से युक्त खड्ग द्विनेत्र, तीन से युक्त त्रिनेत्र और इनसे अधिक नेत्र होने पर बहुनेत्र कहलाता है॥ २७९॥

उत्तरोत्तर गुणों से युक्त खड्ग अद्वितीय होता है। इस अध्याय में शुभकारक नेत्रों का यहाँ दिग्दर्शन कराया गया है॥ २८०॥

(खड्ग परीक्षात्मक अध्याय में यह नेत्र नामक अध्याय समाप्त हुआ)।

जैसे नेत्र की स्थिति खड्ग पर होती है, ऐसे ही अरिष्ट (अशुभकारक चिह्न) भी होते हैं। नेत्रों के होने में स्थान-नियम (एक के पश्चात् समाङ्गुल पर होना प्रशस्त) कहा है, परन्तु अरिष्टों के लिए नियम नहीं है। प्रशस्त अङ्गवाला खड्ग भी एक अरिष्ट के होने से निन्दित हो जाता है॥ २८१॥

**अब तीस अरिष्टों के लक्षण कहते हैं**—छिद्र, काकपद, रेखा, भिन्न, मेंढक, मूषिका, विडाल,

विन्दुश्च कालिकादेवी कपोतः काकविग्रहः। खर्परशकली चाथ क्रोडारिष्टं तथा कुलम्॥ २८३॥
जालारिष्टं करालाख्यं कङ्कखर्जूरशृङ्गकम्। गोपुच्छारिष्टखानित्रे लाङ्गलारिष्टमेव च॥ २८४॥
छिद्रवद् दृश्यते खड्गे स्वभावेन च लक्ष्यते। छिद्रारिष्टमिदं विद्धि भर्तुवीर्यबलापहम्॥ २८५॥
यदाकाकपदाकारमरिष्टं दृश्यते क्वचिद्। अयं काकपदारिष्टः सर्वाभीष्टविनाशनः॥ २८६॥
रेखाकारं यदारिष्टमूर्ध्वं वा तिर्यगेव वा। रेखारिष्टमिदं विद्धि भर्त्तुवीर्यबलापहम्॥ २८७॥
भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः। भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न व्रजेत् स्वयम्॥ २८८॥
यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित्। भेकारिष्टमिदं नाम्ना संग्रामे भयदायकम्॥ २८९॥
अरिष्टे मूषिकाकारे मूषिकारिष्टमुच्यते। अयं खड्गाधमः कुर्यात् पत्युः पातालसंगमम्॥ २९०॥
विडालनयनाकारो विन्दुरेकोऽतिविस्तरः। विडालारिष्टमेतत् स्यात् भर्तुः सर्वार्थः नाशनम्॥ २९१॥
अरिष्टं शर्कराकारं यदा स्पर्शेन बुध्यते। शर्करारिष्टमेतत् स्यात् धनबुद्धिविनाशनम्॥ २९२॥
कालिकारिष्टमित्येतद् धीधृतिस्मृतिनाशनम्॥ २९८॥
एकत्र यदि न ह्येषः प्रयत्नेनापि संवृत्तः। दारी नाम महारिष्टं सर्वाभीष्टविनाशनम्।
अनेकगुणसम्पन्नः खड्गो लोकैर्न गृह्यते॥ २९९॥

---

शर्करा, नीला, मशक, भृङ्ग, सूची, बिन्दु, कालिका, दारी, कपोत, काकविग्रह, खर्पर, शकली, क्रोड़ा, कुल, जाल, कराल, कङ्क, खर्जूर, शृङ्ग, गोपुच्छ, कुद्दाल (खनित्र), लाङ्गल—ये तीस अरिष्ट होते हैं॥ २८२-२८४॥

शेष आकृति स्वाभाविक होने पर भी जिस खड्ग में छिद्र हो उस अरिष्ट (दोष-त्रुटि) को छिद्रारिष्ट कहते हैं। यह अपने स्वामी के बल और वीर्य का नाशक है॥ २८५॥

जब कव्वे के पैर की आकृतिवाला चिह्न कहीं पर भी दिखाई पड़ता है तो उसे काकपद अरिष्ट कहते हैं। यह सभी सिद्धियों का नाशक हैं॥ २८६॥

ऊँची या तिरछी रेखा के आकारवाला रेखा-अरिष्ट जानना चाहिये। यह स्वामी के बल-वीर्य का नाशक है॥ २८७॥

भिन्न (विविध) प्रकार की भ्रान्ति (सन्देह) को उत्पन्न करनेवाला भिन्न-अरिष्ट कहलाता है। यह स्वामी के कुल, यश और राष्ट्र की समाप्ति किये बिना नहीं जाता॥ २८८॥

जब मेंढक के शिर के रूपवाला अरिष्ट कहीं पर भी दिखलाई दे तो उसे भेकारिष्ट कहते हैं। यह संग्राम में भयदायक होता है॥ २८९॥

मूषिका (चूहिया) के आकारवाला अरिष्ट मूषिकारिष्ट होता है। यह अधम खड्ग अपने स्वामी को पाताल में पहुँचा देता है॥ २९०॥

विडाल (बिल्ला) के नयन के सदृश बड़ा बिन्दु विडाल-अरिष्ट होता है। यह स्वामी के सभी कार्यों की समाप्ति करनेवाला है॥ २९१॥ जब छूने से शर्करा (छोटे कङ्कर) के समान प्रतीत हो तो इसे शर्करारिष्ट कहते हैं। यह धन और बुद्धि का नाशक है॥ २९२॥

कालिकारिष्ट (कृष्णतिल-सदृश बिन्दु) बुद्धि, धैर्य, स्मरणशक्ति का नाश करनेवाला है॥ २९८॥ यदि यह एक स्थान पर इकट्ठा नहीं है तो प्रयत्न में बाधा नहीं करता। दारी (बिवाई के समान खड्ग में दरारें दिखाई देना) नामवाला अरिष्ट सभी कामनाओं का नाशक है। यह अनेक गुणों से सम्पन्न होने पर भी ग्रहण करने के अयोग्य है॥ २९९॥

**कपोतपक्ष प्रतिममरिष्टं चेत् तदाह्वयम्। भर्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत्॥ ३००॥**
**काकाकृतिर्यदारिष्टं काकारिष्टं तदोच्यते। अनेन भर्तुः संग्रामे भङ्ग एवोपजायते॥ ३०१॥**
**अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते। भर्तुर्यशोबलं वीर्यं बुद्धिं प्रीतिञ्च नाशयेत्॥ ३०२॥**
**यदान्यल्लोह शकलं लग्नं स्यादिव लक्ष्यते। शकलीति स वै खड्गः सर्वाभीष्टनिषूदनः॥ ३०३॥**
**(क्रोडीकुशपत्रकयोर्लक्षणे पतिते)**
**यस्मिन् निम्नमिवाभाति मध्ये वा दृष्यते क्वचित्। जालारिष्टमिदं नाम भर्त्तुः कुलधनापहम्॥ ३०४॥**
**एकैकरेखा दीर्घाग्रा यदा पल्लविनी भवेत्। स्पर्शे वाथ करेणाथ करालारिष्टमुच्यते॥ ३०५॥**
**अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्नहि। दर्शनादेव नश्यति यशो लक्ष्मीजयादयः॥ ३०६॥**
**अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते। अस्य स्पर्शनमात्रेण नश्यत्यायुर्यशो बलम्॥ ३०७॥**
**खर्जूरवृक्षप्रतिमं यदारिष्टस्तु लक्ष्यते। खर्जूरारिष्टमेतत् स्याद् भर्त्तुः कुलधनापहम्॥ ३०८॥**
**गोशृङ्गाभमरिष्टं चेत् शृङ्गारिष्टं तदुच्यते। अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः॥ ३०९॥**
**गोपुच्छाकृतिश्चेत् खड्गे अरिष्टं संप्रतीक्ष्यते। पुच्छारिष्टमिदं नाम भर्त्तुः सर्वार्थनाशनम्॥ ३१०॥**

---

कपोत (कबूतर) के पङ्ख-सदृश अरिष्ट धारण करनेवाले का कुल, यश, विद्या, बल और बुद्धि का नाश करता है॥ ३००॥

कव्वे की आकृतिवाला अरिष्ट काकारिष्ट कहलाता है। इससे संग्राम में स्वामी का भङ्ग ही होता है॥ ३०१॥

खर्पर (ठीकरा) के सदृश खर्पर-अरिष्ट कहलाता है। यह स्वामी के यश, बल, वीर्य, बुद्धि और प्रीति का नाश करता है॥ ३०२॥

जब खड्ग में लोह का दूसरा टुकड़ा-सा लगा हुआ दिखलाई देता है तो वह खड्ग शकली अरिष्टवाला होता है, जो सभी मनोरथों को समाप्त करनेवाला होता है॥ ३०३॥

(इस प्रकरण में क्रोडी और कुशपत्रक अरिष्टों के लक्षणवाले श्लोक नहीं हैं)—जिस खड्ग में उसका धरातल कहीं-कहीं नीचा दिखाई पड़ता है अथवा मध्यभाग नीचा दिखाई देता है, उसे जालारिष्ट कहते हैं। यह स्वामी के कुल और धन की समाप्ति करनेवाला है॥ ३०४॥

जब एक-एक रेखा अगले भाग में स्थूल या हस्तादि से स्पर्श में पत्राकार अनुभव प्रतीत हो, तो इसे करालारिष्ट कहते हैं। यह खड्ग राजाओं को देखना भी नहीं चाहिये। इसके दर्शनमात्र से यश, धन और विजयादि समाप्त हो जाते हैं॥ ३०५-३०६॥

कङ्कपत्र (कंघी) के सदृश अरिष्ट होने पर उसे कङ्क-अरिष्ट कहते हैं। इसके स्पर्शमात्र से ही आयु, यश और बल नष्ट हो जाते हैं॥ ३०७॥

जब खजूर के वृक्ष-सदृश अरिष्ट दिखाई दे तो उसे खर्जूर-अरिष्ट कहते हैं। यह स्वामी के कुल और धन का अपहरण करनेवाला है॥ ३०८॥

गाय के सींग के सदृश शृङ्ग-अरिष्ट कहलाता है, इससे स्वामी की लक्ष्मी, बल और कुलादि नष्ट हो जाते हैं॥ ३०९॥

जब खड्ग में गाय की पूँछ के सदृश आकृतिवाला अरिष्ट दीखे तो उसे पुच्छ-अरिष्ट कहते हैं। यह स्वामी के सब कार्यों का नाशक है॥ ३१०॥

खनित्राभमरिष्टं चेत् खनित्रारिष्टमुच्यते। शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति॥ ३११॥
अरिष्टे लाङ्गलाकारे लाङ्गलारिष्टमुच्यते। अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा।
अयमायुः श्रियं हन्ति विद्यां बलमशेषतः॥ ३१२॥
(बडिशारिष्टस्य लक्षणं पतितम्)
इत्यरिष्टानि प्रोक्तानि नाना तन्त्राद् प्रयत्नतः। विचार्यैतानि मतिमान् खड्गं कोशे निधापयेत्॥ ३१३॥
दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम्। अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम्॥ ३१४॥
अरिष्टमेकमेव स्याद् द्विररिष्टं शुभावहम्। अन्यान्यमशुभं हन्याद् विषस्य हि विषं यथा॥ ३१५॥
एकमारभ्य सप्तान्तमरिष्टं प्राह नान्यथा। यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः॥ ३१६॥

**अथ द्विविधाभूमिः —**

दिव्यभौमविभागेन भूमिर्या द्विविधा मता। दिव्दा दिवि समुद्भूता भौमा भूमिसमुद्भवा॥ ३१७॥
तल्लक्षणमशेषेण लिख्यते तन्निबोधत। देवदानवयोर्मध्ये खड्गसृष्टिरभूत् पुरा।
ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः॥ ३१८॥

---

खनित्र (कुद्दाल-खुरपा आदि) के सदृश अरिष्ट खनित्र-अरिष्ट कहा जाता है। यह संग्राम में शूरवीरों को भी पराजित करा देता है॥ ३११॥

लाङ्गल (हल या कलिहारी) के समान आकृतिवाला लाङ्गल-अरिष्ट होता है। यह अत्यन्त निकृष्ट है। इसे राजा को देखना भी नहीं चाहिये। यह आयु, यश, विद्या और बल का सम्पूर्णरूप से नाशक है॥ ३१२॥

(पूर्व निर्दिष्ट बडिश=मछली पकड़ने का काँटा, अरिष्ट का लक्षण नहीं दिया)—इन अरिष्टों को अनेक शास्त्रों से प्रयत्नपूर्वक इकट्ठा करके कहा है। बुद्धिमान् को चाहिये कि इनका विचार करके ही (शुभाशुभ लक्षण देखकर) खड्ग को कोश (म्यान) में रखे तथा शुभ लक्षणोंवाला खड्ग ही धारण करे॥ ३१३॥

अपने लिए हितकारी अरिष्टों का भी दिग्दर्शन कराया जाता है। अमाङ्गलिक और मन्द अरिष्टों का दर्शन भी शुभकारक नहीं है॥ ३१४॥

पूर्वोक्त अरिष्टों में एक ही अरिष्ट खड्ग में हो तो वह अशुभकारक है, यदि दो अरिष्ट हों तो वे शुभकारक हैं, क्योंकि एक के अशुभ प्रभाव को दूसरा समाप्त कर देता है जैसे कि विष का औषध विष होता है॥ ३१५॥

एक से लेकर ७ तक संख्या में अरिष्ट होना शुभकारक है। इससे अधिक नहीं।

मनीषी (खड्गशास्त्रवेत्ता) एक से अधिक अरिष्ट होने पर क्रमश दुगना, तीन गुणा आदि फल कहते हैं॥ ३१६॥

अब दो प्रकार की भूमि को कहते हैं—दिव्य और भौम के विभाग से दो प्रकार की भूमि खड्ग की होती है। दिव्य भूमि स्वयं ही पूर्व से रहती है और भौम को बनाया जाता है (खड्ग पर ओषधि प्रलेप या पानी चढ़ाना आदि से निर्माण किया जाता है)॥ ३१७॥

इसके सभी लक्षणों को यहाँ लिखा जाता है, इनको जानो।

पहले देवों और दानवों में खड्ग का सर्जन (निर्माण) हुआ। वे खड्ग कुछ पुण्य-स्थानों

**दिव्यलक्षणं यथा—**

**ये खड्गाः स्थूलधारा भृशमतिलघवो निर्मलाङ्गाः सुनेत्राः। ये रिष्टाश्चास्वरूपाः सुविमलतन-वश्चाप्यसंस्कारयोग्यात्। दुर्भेद्या दुर्घटाश्च ध्वनिगुणमुखो यत् क्षते दाहपाकौ ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशोवृद्धिमाशु॥ ३१९॥**

**अथ भौमलक्षणम्—बृहद्हारीते—**

**पूर्वं महेशेन विषाणि यानि भुक्तानि तेषां पतितास्तु बिन्दवः। यस्मिन् प्रदेशे स एव देशः कालायसामाकरतां जगाम॥ ३२०॥ पुरामृतं क्षीरसमुद्रमध्यादुत्पाद्य संगृह्य ययुः सुरेन्द्राः। तद् बिन्दवो यत्र निपेतुरेष शुद्धायसामाकरतां जगाम॥ ३२१॥**

**ये विषोत्था भृशं कालाः खराङ्गाः सम्भवन्ति हि। मूर्च्छादाहज्वरानाहः शोकहिक्का वमीकराः॥ ३२२॥**

**येऽमृतोत्था कर्व्वुराङ्गाः मन्दाङ्गाः सम्भवन्ति च। वलीपतितमालिन्यज्वरव्याधिविनाशनाः। यत्रेव पतितं यत् तु तत्तदाकरतां गताः॥ ३२३॥**

**तद्यथा**

**वाराणसीमगधसिंहलभूमिभागे नेपालभूमिषु तथाङ्गमहीप्रदेशे।**
**सौराष्ट्रिकेऽन्यतरधन्यमहीविभागे शुद्धायसां कृतिवराः प्रवदन्ति जन्म॥ ३२४॥**

---

में स्थापित किये गये॥ ३१८॥

जो खड्ग मोटी धारवाले, तीक्ष्ण, हल्के, निर्मल अङ्गोंवाले, सुनेत्र (शुभसूचक चिह्नादि), अरिष्टों से रहित, सुन्दर आकृतिवाले, बिना संस्कार (पानी चढ़ाना) आदि के ही सुन्दर रहनेवाले, दूसरे के शस्त्राघात से न टूटनेवाले, कठिनकर्मवाले, गुरु (गम्भीर) ध्वनिवाले जिनके द्वारा आहत होने पर दाह और पाक होता हो वे दिव्य होते हैं। ये सभी कुल, धन, विजय, श्री, और यश की बहुत शीघ्र ही वृद्धि करनेवाले होते हैं॥ ३१९॥

पुराकाल (क्षीरसागर मन्थन) में भगवान् शिव ने जिन विषों का पान किया, उनके कुछ बिन्दु जिस देश में गिरे वहीं पर लौहे की खानें बन गईं॥ ३२०॥

पुराकाल में क्षीर-समुद्र से देवता अमृत का मन्थन करके ले-जा रहे थे तब उसके बिन्दु जहाँ-जहाँ पड़े वहीं शुद्ध लोहे की खानों की उत्पत्ति हो गई॥ ३२१॥

जो खड्ग विष की उत्पत्ति (काले लोहे) से बने हुए होते हैं वे बहुत काले, खर अङ्गवाले होते हैं। इनके आघात में मूर्च्छा, दाह, ज्वर, अफारा, शोक, हिक्का (हिचकी) और वमन होती है॥ ३२२॥

जो अमृत से उत्पन्न (शुद्ध लोहे के बने हुए) हैं वे कबूतरी रङ्गवाले, हल्के होते हैं। ये चेहरे की झुर्रियाँ, खिन्नता, ज्वर और अनेक व्याधियों के नाशक हैं॥ ३२३॥

जहाँ (पूर्वोक्त विष और अमृत के बिन्दु) जो बिन्दु पड़ा वहीं वैसी ही खानें उत्पन्न हो गईं।

जैसे वाराणसी, मगध, सिंहलभूमि (लङ्का), नेपाल, अङ्गदेश, सौराष्ट्र और अन्य देशों की भूमियों में भी शुद्ध लोहे की खाने हैं॥ ३२४॥

वाराणसेयाः सुस्निग्धास्तीक्ष्णधारा सदाङ्गिनः। लघवः सुखसन्धेया ज्ञेयाश्चाभेद्यशालिनः॥ ३२५॥
मागधाः कर्कशाः स्थूलधारा गूढतरङ्गिणः। गुरवो दुःखसन्धेयाः खड्गा ज्ञेया विचक्षणैः॥ ३२६॥
नेपालदेशप्रभवा निरङ्गा निश्चलाश्च ये। ज्ञेयाः सदङ्गा मलिना लघवः स्थूलधारिणः॥ ३२७॥
कलिङ्गागुरवः स्वच्छा व्यक्ताङ्गास्तन्तुहेतवः। सौराष्ट्रा निर्मलाः स्निग्धाः सुव्यक्ताङ्गा भृशं खराः॥ ३२८॥
सिंहलद्वीपजातानां चतुर्धा भेदमुच्यते। केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः।। ३२९॥
एषां रूपेण मिश्रेण ज्ञेया हि द्विजजातयः॥ ३३०॥
सामान्याद् द्विगुणञ्चौण्ड्रं कलिर्दशगुणस्ततः। कलेः शतगुणं भद्रं भद्राद् वज्रं सहस्त्रधा॥ ३३१॥
वज्रात् षष्टिगुणः पाण्डिर्निरविर्दशभिर्गुणैः। ततः कोटिसहस्त्रेण ह्ययस्कान्तः प्रशस्यते॥ ३३२॥

(इत्यादिकं रसायनोपयोगिकमेव न तु खड्गे दृष्टफलम्)

यदाह

एषां तु लौहजातीनां वज्रं खड्गाय युज्यते॥ ३३३॥

तथा च

ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः। केचित् साङ्गा निरङ्गा कतिचन

---

वाराणसेया (वाराणसी में बननेवाले) खड्ग चिकने, तीक्ष्णधारवाले, अच्छे अङ्गोंवाले, हल्के, सुख से चलाने योग्य और न टूटनेवाले होते हैं॥ ३२५॥

मगधदेश के खड्ग, कर्कश (कठोर), मोटी धारवाले, गूढ अङ्गोंवाले, भारी, कठिनता से धारण करने योग्य बुद्धिमानों को जानने चाहियें॥ ३२६॥

नेपालदेश में होनेवाले खड्ग निरङ्ग, निश्चल, अच्छी आकृतिवाले, मलिन, लघु और स्थूलधारवाले होते हैं॥ ३२७॥

कलिङ्ग देश के खड्ग भारी, स्वच्छ, स्पष्ट आकृतिवाले, रेखाओंवाले या (चित्रकारीयुक्त) होते हैं। सौराष्ट्र के खड्ग निर्मल चिकने, स्पष्ट आकृतिवाले और बहुत कठोर होते हैं॥ ३२८॥

सिंहलद्वीप (लङ्का) में बने हुए खड्गों के चार भेद होते हैं—कुछ सुन्दर अङ्गोंवाले, भारी, कर्कश, चिकनी धारवाले और कुछ सुन्दर आकृतिवाले, हल्के या छोटे, चिकने, मोटी धारवाले होते हैं। इनके परस्पर मेल से ब्राह्मण, क्षत्रिय-वैश्यात्मक जातिवाले खड्ग जानने चाहियें॥ ३२९,३३०॥

सामान्य लोहे से दो गुणा चौण्ड्र, उससे दश गुणा कलि, कलि से सौ गुणा भद्र, भद्र से हज़ार गुणा वज्र, वज्र से साठ गुणा पाण्डि, पाण्डि से दश गुणा निरवि और उससे भी करोड़ों गुणा उत्तम अयस्कान्त लौह होता है॥ ३३१-३३२॥

(परन्तु इनकी रसायनकार्य=भस्मादि बनाने में ही उपयोगिता कही है। खड्ग-निर्माण में ऐसा फल नहीं देखा गया) जैसा कहा भी है—

इन लौह की जातियों में वज्रलौह खड्ग के लिए जितना उपयुक्त हैं, (इतना अधिक अन्य लौह गुणकारी नहीं है, यह अभिप्राय है)॥

जो खड्ग तीक्ष्णधारवाले, बहुत अधिक भारी, छह गुणों से युक्त, सुगमता से भेदने योग्य,

**समला निर्मलाः केचिदेव। ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा वा, ते दुःखं स्तोकमुग्रं दधति बलकुलश्रीयशोनाशनास्ते॥ ३३४॥**

**अथाष्टधा ध्वनिः—**

**ध्वनिरष्टविधः प्रोक्तो यः पूर्वं सूत्रसंग्रहे। तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्॥ ३३५॥**

**तद्यथा**

**हंसकास्ये तथामेघः ढक्का काकश्च तन्त्रिका। गर्दभः प्रस्तरश्चैव ध्वनिरष्टविधः स्मृतः॥ ३३६॥**

**पूर्वे चत्वारः शुभदाः परे निन्दास्पदास्तथा। विचार्य खड्गमानञ्च कर्तव्यं खड्गकोविदैः॥ ३३७॥**

**घोरस्तार इति ख्यातो द्विविधः खड्गकोविदैः। घोरः स्यात्सुखसम्पत्त्यै तार उच्चाटने मतः॥ ३३८॥**

**यत्र हंसरवस्येव खड्गे नखहतध्वनिः। हंसध्वनिरयं खड्ग सकलार्थप्रसाधनः॥ ३३९॥**

**कांस्यशब्द इवाभाति यस्मिन्खड्गे हते ध्वनिः। कांस्यध्वनिरयं खड्गः प्राह नागार्जुनो मुनिः॥ ३४०॥**

**(अभ्रस्य लक्षणं पतितम्)**

**ढक्काशब्द इवाभाति यस्मिन्खड्गे हते ध्वनिः। ढक्का ध्वनिरयं खड्गः सर्वशत्रुनिषूदनः॥ ३४१॥**

**काकस्वर इवाभाति यस्मिन्खड्गे हते ध्वनिः। काकस्वरोऽयं खड्गः स्याच्छ्रीयशः कुलनाशनः॥ ३४२॥**

---

कुछ अङ्गोंवाले और कुछ निर्मल हों वे भौमखड्ग होते हैं। ये धन, विजय, बल आदि छह गुणों की वृद्धि करनेवाले और जो गुणरहित होते हैं वे धारण करने पर दुःखदायी बल, कुल, श्री, यश को समाप्त करनेवाले होते हैं॥ ३३४॥

पूर्व सूत्रों के संग्रहों में आठ प्रकार की जो ध्वनियाँ कही है, उनमें से मैं गुणसहित आठ लक्षणोंवाली ध्वनियों को यहाँ लिखता हूँ॥ ३३५॥

हंस, कांस्य, मेघ, ढक्का, (झाँझ) कव्वा, लघु ध्वनि, गर्दभ (गधा) और पत्थर के सदृश— ये आठ प्रकार की ध्वनियाँ कही हैं॥ ३३६॥

पहली चार शुभ हैं और अगली चार निन्दित हैं। खड्ग ज्ञान के जाननेवालों को खड्ग का मान (लम्बाई, चौड़ाई, मोटाई) सोचकर निश्चित करना चाहिये॥ ३३७॥ घोर (मोटा) और तार (हल्का) ये दो भेद खड्ग के मानानुसार होते हैं। घोर सुखसम्पत्तिकारक और तार इनका नाशक है॥ ३३८॥

जिस खड्ग से नाखून (चुटकी) द्वारा बजाने पर हंस की ध्वनि के सदृश ध्वनि निकलती हो, उसे हंसध्वनि खड्ग कहते हैं। यह सभी कार्यों का साधक हैं॥ ३३९॥

जिस खड्ग के बजाने पर कांस्य (कांसी के बर्तन सदृश) ध्वनि निकलती हो उसे नागार्जुन मुनि ने कांस्यध्वनिवाला खड्ग कहा है॥ ३४०॥

[अभ्र-(विद्युत्)-ध्वनि का लक्षणात्मक सूत्र नहीं है]—जिस खड्ग से ढक्का (झाँझ) के सदृश ध्वनि निकलती हो, उसे ढक्का ध्वनिवाला खड्ग कहते हैं। यह सभी शत्रुओं का नाश करनेवाला है॥ ३४१॥

जिस खड्ग के बजाने से काक-(कव्वे के स्वर-जैसी)-ध्वनि निकलती हो, उसे काक-ध्वनिवाला खड्ग कहते हैं। यह श्री, यश और कुल का नाशक है॥ ३४२॥

तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः । तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः ॥ ३४३ ॥
खरस्येव ध्वनिर्यस्मिन् खरध्वनिरयं मतः । श्रीयशोज्ञानविज्ञानजयतेजो विनाशनः ॥ ३४४ ॥
प्रस्तरस्येव यः खड्ग स निन्द्यः खड्ग लक्षणे ॥ ३४५ ॥
गभीरतारध्वनिता खड्गस्य शुभलक्षणम् । उत्तानमन्द्रध्वनिता खड्गस्याशुभलक्षणम् ॥ ३४६ ॥
अपाङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः । अन्धः कुरूपो मनुजो यथा भुवि सुगायनः ॥ ३४७ ॥
सर्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्जितः । स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्जितः ॥ ३४८ ॥
नखेन वाथ दण्डेन तथा लौहशलाकया । लोष्ठेन शर्कराभिर्वा ध्वनिविज्ञानमुच्यते ॥ ३४९ ॥

**अथ द्विविधं मानम्—**

यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते । उत्तमाधमभेदेन भेदो हि द्विविधो मतः ॥ ३५० ॥
उत्तमं यद् विशालं स्याल्लघुमानं प्रकीर्नितम् । अधमं तच्च यत् खर्व्वं गुरुमानं प्रकीर्तितम् ॥ ३५१ ॥
तत् पुनस्त्रिविधं प्रोक्तमादिमध्यान्त भेदतः ॥ ३५२ ॥
यो मुष्टिं विंशतिसमायततीव्रधारो भर्त्तुर्भवेत् प्रसरतोऽपि षडङ्गुलोभिः ।
मानेन चाष्टपलिकः स हिं खड्गमध्ये नातिप्रकृष्टं न विकृष्टफलप्रदः स्यात् ॥ ३५३ ॥

---

तन्त्री (वीणा) के समान ध्वनि जिससे निकलती हो उस खड्ग को तन्त्रीध्वनि कहते हैं। यह कुल, श्री और धन का नाश करनेवाला है ॥ ३४३ ॥

जिस खड्ग को बजाने से गधे के समान ध्वनि निकलती हो, उसे खरध्वनि कहते हैं। यह श्री, यश, ज्ञान, विज्ञान, जय और तेज का नाश करनेवाला है ॥ ३४४ ॥

पत्थर के सदृश ध्वनिवाला खड्ग भी निन्दित है ॥ ३४५ ॥

गम्भीर और ऊँची (देर तक होनेवाली) ध्वनिवाला खड्ग शुभकारक है और सीधी (बिना गूँजवाला) तथा धीमी ध्वनि खड्ग का अशुभ लक्षण है ॥ ३४६ ॥

अङ्ग और नेत्ररहित खड्ग भी यदि सुन्दर ध्वनिवाला हो तो उत्तम होता हैं। जैसेकि लोक में अन्धा और कुरूप व्यक्ति भी सुन्दर गानेवाला हो तो वह अच्छा माना जाता है ॥ ३४७ ॥

सभी अच्छे लक्षणोंवाला होने पर भी ध्वनिरहित खड्ग निन्दनीय है, जैसेकि सुन्दर आकृतिवाला पुरुष मूक (गूँगा) या मीठा न बोलनेवाला अच्छा नहीं माना जाता ॥ ३४८ ॥

नख (चुटकी), दण्डा, लौहशलाका, ढेला या छोटी कङ्करी से खड्ग में ध्वनि की जाती है ॥ ३४९ ॥

**अब दो प्रकार के मान को कहते हैं**—मान दो प्रकार का कहा है उसका लक्षण कहते हैं, उत्तम, अधम भेद से दो भेद मान के होते हैं ॥ ३५० ॥

जो खड्ग विशाल एवं हल्का हो उसे उत्तम मानवाला और जो छोटा तथा भारी हो उसे अधम मानवाला खड्ग कहते हैं ॥ ३५१ ॥

आदि मध्य और अन्त के भेद से उसके तीन भेद होते हैं ॥ ३५२ ॥

जो बीसमुष्टि लम्बा, तीक्ष्ण धारवाला, धारण करनेवाले की छह अङ्गुलीमान-प्रसार-(चौड़ाई)-वाला आठ पल या अधिक भारवाला खड्ग हो, वह न शुभ और न अशुभ फल

**योो द्वादशाष्टनवमुष्टिभिरायतः स्यात्, मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः।**
**तावत् पलैः परिमितस्तु ततोऽधिको वा, खड्गाधमो धनयशःकुलनाशनाय॥ ३५४॥**

**नागार्जुनोऽपि—**

**यावत्यो मुष्टयो दैर्घ्ये तदर्द्धाङ्गुलयो यदा। प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम्॥ ३५५॥**
**यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत् त्रिभागिकः। पलैस्तदर्धैस्तुलितः स खड्गो मध्य उच्यते॥ ३५६॥**
**यावत्यो मुष्टयोदैर्घ्ये तुल्यांशः प्रसरे तु तत्। अधमः कीर्तितः खड्गस्तत्समो वाधिकः पलैः॥ ३५७॥**
**भौमानामिदमुद्दिष्टं दिव्यास्तु लघवो मताः॥ ३५८॥**

**भोजस्तु—**

**दीर्घता लघुता खरविस्तीर्णता तथा। दुर्भेद्यता सुघटता खड्गानां गुणसंग्रहः॥ ३५९॥**
**खर्व्वता गुरुता चैव मन्दता तनुता तथा। सुभेद्यता दुर्घटता खड्गानां दोषसंग्रहः॥ ३६०॥**
**(इति निखिलमुदारमुक्तमत्र बहुतन्त्रेषु निष्कृष्य खड्गयष्टे)**
**नृपतिरिति विचिन्त्य यो विधत्ते स चिरतरां श्रियमुच्छ्रितां लभते॥ ३६१॥**
**(इति श्रीभोजराजीये युक्तिकल्पतरौ खड्गपरीक्षा)**

---

देनेवाला होता है॥ ३५३॥

जो बारह, आठ या नौ मुष्टि लम्बा, इनका चतुर्थांश चौड़ा मन्द, इतने ही (१२-८-९) पल भारवाला या अधिक भारवाला खड्ग अधम होता है। यह धन, यश और कुल का नाश करता है॥ ३५४॥

**नागार्जुन ने भी कहा है**—जितनी मुष्टि लम्बाई हो, उतनी ही अंगुलियों के आधे भाग का चौथा भाग चौड़ाई उत्तम मान कहा है॥ ३५५॥

जितनी मुष्टि लम्बाई हो प्रस्तार (चौड़ाई) में उसका तीसरा भाग (अङ्गुलों में) उन (मुष्टियों) से पलों का भार आधा हो, उसे मध्यम खड्ग कहते हैं। जितनी मुष्टि लम्बाई हो उतने ही अंगुल चौड़ाईवाला और उसके समान या अधिक पलभारवाला अधम खड्ग कहा है॥ ३५६, ३५७॥

यह लक्षण भौम खड्गों के कहे हैं। दिव्य खड्ग लघु (छोटे या हल्के) होते हैं॥ ३५८॥

लम्बाई, हलकापन, खरता, विस्तार (चौड़ाई) दुर्भेद्य, सुघड़ आकार ये खड्गों के गुण होते हैं॥ ३५९॥

छोटापन, भारीपन, मन्द (कुण्ठित), छोटा आकार, शीघ्र ही टूट जाना, बद शकल (कुरूपता) ये खड्गों के दोष होते हैं॥ ३६०॥

(यहाँ खड्गों के समस्त लक्षणादि बहुत-से शास्त्रों से संग्रह करके कह दिये हैं।)

इन सब गुण वा गुणों को विचार करके जो इसे धारण करता है, वह चिरकाल तक रहनेवाली लक्ष्मी को प्राप्त करता है॥ ३६१॥

**(यह श्रीभोजराजकृत 'युक्तिकल्पतरू' ग्रन्थ में**
**खड्ग परीक्षात्मक अध्याय समाप्त हुआ।)**

## नीतिप्रकाशिकायां खड्गचालनस्य द्वात्रिंशद् विधयः।

## ( अध्याय ३ )

द्वात्रिंशत् करणानि स्युर्यानि खड्गप्रयोधने। चित्रशीघ्रपदं तानि दैत्यसङ्घे न्यदर्शयत्॥ २४॥
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम्। संयातं समुदीर्णञ्च निग्रहप्रग्रहौ तथा॥ २५॥
पादावकर्षसन्धाने शिरोभुजपरिभ्रमौ। पाशपादविबन्धाश्च भूम्युद्भ्रमणके तथा॥ २६॥

**सीतारामकृततत्त्वविवृत्तिः—**

भ्रान्तं भ्रमणम्। उद्भ्रान्तमूर्ध्वभ्रमणम्। आविद्धं भुग्नम्। आविद्धं कुटिलं भुग्नमित्यमरः। आप्लुतं हरिणवत् प्लुतम्। विप्लुतं विशेषप्लवनम्। सृतमनुसरणम्। संयातं सम्यग्यानम्। समुदीर्णं सम्यक् तरणम्। निग्रहोऽधिक्षेपः। प्रग्रहो दृढग्रहणम्॥ २५॥

पादावकर्षः पादप्रान्तेन खड्गनमनम्। सन्धानं शत्रूपरि विन्यासः। शिरो भ्रमणं भुजपरिभ्रमणम्। पाशः खड्गयोर्ग्रथनं प्रसिद्धम्। पादः त्सरुमिश्रणम्। खड्गयोर्मिश्रणम्। पाशः पादोमुष्टिर्विमिश्रणमिति मेदिनी। विबन्धः खड्ग निरोधनम्। भूमिरधोविन्यासः उद्भ्रमणक-मुच्चैरुद्धृतिः॥ २६॥

---

१. भ्रान्त—चारों ओर तलवार घुमाना।
२. उद्भ्रान्त—हाथ को ऊपर उठाकर घुमाना।
३. आविद्ध—तिरछा घुमाना।
४. आप्लुत—हरिण के समान छलांग लगाना।
५. विप्लुत—विशेष छलांग लगाना।
६. सृतम्—शत्रु का अनुकरण करते हुए जाना।
७. संयातम्—शत्रु पर हावी होना।
८. समुदीर्णम्—तलवार चलाते हुए शत्रुदल से बाहर निकलना।
९. निग्रह—तलवार से प्रहार करना।
१०. प्रग्रह—दृढता से तलवार को पकड़े रहना।
११. पादावकर्ष—पैर तक खड्ग को झुकाना।
१२. सन्धान—शत्रु पर प्रहार करना।
१३. शिरो-भ्रमण—सिर के ऊपर तलवार घुमाना।
१४. भुज-भ्रमण—अपने हाथ के चारों ओर तलवार घुमाना।
१५. पाश—बन्दिश लगाना।
१६. पाद—मूठ में मूठ मिलाकर बन्दिश लगाना।
१७. विबन्ध—तलवार को रोककर शत्रु को नाकाम कर देना।
१८. भूमि—खड्ग को नीचे करके पैरों पर प्रहार करना।

गतप्रत्यागताक्षेपाः पातनोत्थानके प्लुतम्। लाघवं सौष्ठवं शोभा स्थिरत्वं दृढमुष्टिता॥ २७॥
तिर्यगूर्ध्वप्रचरणे द्वात्रिंशत् करणान्यहो। विजित्य दानवान् सङ्ख्ये हृष्टो रुद्रो बभूव ह॥ २८॥

**व्याख्या—**

गतं पश्चाद् गमनम्। प्रत्यागतं शत्रूद्देशेनाभिमुखगमनम्। आक्षेपो रिपुमुष्टिस्खालनम्। पातनं रिपुकराद् भूमौ खड्गन्यासनम्। उत्थानकं स्वखड्गोद्धृतिः। प्लुतं स्वस्थानप्राप्तिः। लाघवं शीघ्रप्रयोगः। सौष्ठवं खड्गधारणनैपुण्यम्। शोभा एकेनैव खड्गेन समन्ताच्चालितेन सर्वदिगवच्छेदेन झलझलायमानता। स्थिरत्वं दृढावस्थितिः। दृढमुष्टिता त्सरोर्दृढग्रहणम्॥ २७॥
तिर्यक् प्रचरणं तिर्यग् गतिः। ऊर्ध्वप्रचरणमुन्नतदेशावस्थितिः।
इति द्वात्रिंशत् खड्गवल्गितानि॥ २८॥

**मानसोल्लासे खड्गचालनविधयः—**

कोशात् खड्गं समाकृष्य बिलादाशीविषं यथा॥ ६३॥
चर्म वा फलकं वापि गृह्णीयाद्वामपाणिना। पाणिना भ्रामयेत्खड्गं चर्म वामेन चालयेत्॥ ७४॥
पूर्वोक्तपदसञ्चारैः सञ्चरेत विचक्षणः। शीर्षस्योपरि संस्थाप्य खड्गचर्म तथोरसि॥ ७५॥

---

१९. उद्भ्रमण—उछलकर वार मारना।
२०. गतम्—लड़ते हुए पीछे हटना।
२१. प्रत्यागतम्—शत्रु को लक्ष्य करके आगे बढ़ना।
२२. आक्षेप—शत्रु के हाथ से तलवार नीचे गिरा देना।
२४. उत्थानकम्—अपनी नीचे गिरी तलवार को विधि से उठा लेना।
२५. प्लुतम्—अपने स्थान पर आ जाना।
२६. लाघव—स्फूर्ति से प्रहार करना।
२७. सौष्ठव—खड्ग धारण में निपुणता दिखाना।
२८. शोभा—एक ही खड्ग को इस प्रकार घुमाना कि चारों ओर प्रहार होते दिखाई पड़ें।
२९. स्थिरत्वम्—अपने स्थान पर दृढ़ता से स्थित रहना।
३०. दृढमुष्टिता—खड्ग की मूठ को दृढ़ता से पकड़े रहना।
३१. तिर्यक् प्रचरंणम्—तिरछा (पैंतरा काटकर) चलना।
३२. ऊर्ध्वप्रचरणम्—शत्रु को दबाते हुए चलना।

**मानसोल्लास में खड्ग चालन की विधियाँ**—जैसे बिल से सर्प फुंकारता हुआ निकलता है, उसी प्रकार कोश (म्यान) से खड्ग को दाहिने हाथ से शीघ्रतापूर्वक निकाले॥ ७३॥

चर्म (ढाल) या फलक को बायें हाथ से पकड़े। दाहिने हाथ से खड्ग और बायें से चर्म को चलाए॥ ७४॥

बुद्धिमान् को चाहिए कि पूर्वोक्त (छुरी प्रकरण में कहे हुए) पैंतरों से खड्ग चर्म लेकर चले। शिर पर खड्ग और वक्षस्थल पर चर्म रखकर दाहिना पैर आगे करके शिखर स्थान को दिखलावे॥ ७५½॥

दक्षिणांघ्रिं पुरस्कृत्य स्थानं शिखरकं श्रयेत्। वामं हस्तं प्रसार्याग्रे चर्मणा फलकेन वा॥ ७६॥
कर्णोपान्ते समासज्य स्थानं कापोलकं भजेत्। वक्षस्यासज्य फलकं खड्गं तत्रैव बाह्यतः॥ ७७॥
परस्यान्तरमीक्षेत श्रीवत्सस्थानमाश्रितः। खड्गं महीमुखं कृत्वा खड्गाग्रं पुरतः समम्॥ ७८॥
वीक्ष्यमाणः परच्छिद्रं स्थानं भूमण्डलं भजेत्। कुक्षिदेशे त्सरुं कृत्वा फलं तिर्यक्तथोरसि॥ ७९॥
अग्रे प्रसार्य फलकं तीक्ष्णाग्रं स्थानकं न्यसेत्। कडगं चरणे विन्द्याद्दोलगं दक्षिणाङ्गजे (के)॥ ८०॥
पोगरं वामभागे स्यात्कालवल्कं तु मस्तके। आनाभिः कण्ठपर्यन्तं खड्गाग्रेण तु भेदनम्॥ ८१॥
मुनयन्नाम तत् प्रोक्तं कौक्षेयकविचक्षणैः। वारणं हननं तेषु पञ्चघातेषु पाटवम्॥ ८२॥
दर्शयेद् रचनाघातं हस्तलाघवमाचरेत्। फलके वा तथा चर्मण्यङ्गं सर्वं निगृह्य च॥ ८३॥
सञ्चरेत् परघातार्थं शून्यं पश्येत् पराङ्गकम्। पञ्चघातप्रयोगं च पञ्चघातनिवारणम्॥ ८४॥
पादलाघवसंस्थानं चालनं खड्गचर्मणा। प्रदर्श्य रञ्जयेद् राजा सर्वांश्च खुरलीगतान्॥ ८५॥

*—मानसो० २/१/४*

### (महाभारते खड्गसञ्चालनस्य विविधा मार्गाः)

भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतम्। परिवृत्तं निवृत्तञ्च खड्गं चर्म च धारयन्॥ ३८॥
सम्पातं समुदीर्णञ्च दर्शयामास पार्षतः। भारतं कौशिकं चैव सात्वतं चैव शिक्षया॥ ३९॥

*(महा० द्रोण० अ० १९१)*

---

बायां हाथ चर्मसहित आगे फैलाकर उसे कान के समीप लाकर कापोलक स्थान का प्रदर्शन करे॥ ७६½॥

छाती पर ढाल रखकर, वहीं पर बाहर की ओर से तलवार रखकर श्रीवत्स स्थान में स्थित रहता हुआ दूसरे के अन्तर (मर्मस्थल) को देखे॥ ७७½॥

खड्ग को भूमि की ओर करते हुए उसका अगला भाग भूमि के समानान्तर रखकर दूसरे के छिद्र (असुरक्षित स्थान) को देखता हुआ भूमण्डल स्थान को प्रदर्शित करे॥ ७८½॥

कुक्षिदेश (बगल) में तलवार की मूठ लाकर तलवार के अग्रभाग को छाती पर तिरछा रखकर ढाल के आगे फैलाकर तीक्ष्णाग्र स्थान पर स्थित होवे॥ ७९½॥

पैर पर किया जानेवाला खड्ग का प्रहार कड़ग, दाहिनी ओर का प्रहार दोलग, बायीं ओर किया गया पोगर, मस्तक का प्रहार कालवल्क और नाभि से कण्ठ तक खोंच मारकर भेदना मुनय, ये पाँच प्रहार खड्गशास्त्र के विद्वानों ने कहे हैं॥ ८०-८१½॥

इन पाँच आघातों को बचाना और प्रहार करना इत्यादि का प्रदर्शन राजा लाघव (फुर्ति) दिखलाता हुआ करे॥ ८२½॥

ढाल द्वारा अपने सभी अङ्गों को सुरक्षित रखता हुआ प्रतिद्वन्द्वी पर प्रहार करने के हेतु आगे बढ़े। उसके शून्य (असुरक्षित) भाग को देखे। इस प्रकार पाँच प्रहार, पाँच आघात को बचाने के उपाय, पैंतरा चाल, खड्ग और ढाल का चलाना इत्यादि का प्रदर्शन करके राजा खुरली में आये हुए व्यक्तियों का मनोरञ्जन करे॥ ८३-८४-८५॥

# खड्ग चालन के स्थान (पवित्रे)

शिखरक

कापोलक

श्रीवत्स

तीक्ष्णाग्र

भूमण्डल

# खड्ग के विभिन्न प्रहार

कड्ग

कालवल्क

दोलग

पोगर

मुनय

**भारतभावदीपटीका—द्रोणपर्व पृष्ठ ३११**

**मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते। तदेव बाहुमुद्यम्य कृतमुद्भ्रान्तमीरितम्॥ १॥**
**भ्रामणं स्वस्य परितः खड्गस्याविद्धमुच्यते। परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम्॥ २॥**
**शत्रोराक्रमणार्थाय गमनं त्वाप्लुतं मतम्। खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं मतम्॥ ३॥**
**वञ्चयित्वा रिपौ शस्त्रपातनं गदितं सृतम्। परिवृत्तं भवेच्छत्रोर्वामदक्षिणभागतः॥ ४॥**
**पश्चात् पदापसरणं निवृत्तं सम्प्रचक्षते। अन्योन्यताडनं प्राहुः सम्पातमुभयोरपि॥ ५॥**
**आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम्। अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम्॥ ६॥**
**विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम्। निलीयचर्मणिक्षेपो यदसेः सात्वतं हि तत्॥ ७॥**
**भ्रान्तं मण्डलाकृतिः, तदेव क्लमोपेतमाविद्धं, भ्रान्तमेवोन्नति सहितमुद्भ्रान्तं, आप्लुतं केवलमुत्प्लवनं प्रसृतं सर्वासु दिक्षु प्रसरणं प्लुतमेकस्यां दिशि, सम्पातं वेगं समुदीर्णं सर्वान् प्रति समुद्यमम्।** *—(महा० भीष्म० ५४/५०) (भारतभावदीप पृष्ठ १७५)*

---

**महाभारत में खड्ग चालन की अनेक विधियाँ—**

**भारतभावदीप टीका में**—खड्ग को गोलाई में घुमाना भ्रान्त कहा जाता है। इसी को हाथ ऊपर उठाकर घुमाना उद्भ्रान्त होता है। अपने चारों ओर खड्ग को घुमाना आविद्ध कहलाता है। इन तीनों विधियों से दूसरे के शस्त्र से अपनी रक्षा की जाती है॥ १-२॥

शत्रु पर आक्रमण करने के लिए छलांग लगाकर जाना आप्लुत माना गया है। खड्ग के अगले भाग से शत्रु के शरीर को छूना (खोंच का वार मारना) प्रसृत होता है॥ ३॥

शत्रु को धोखा देकर उसपर प्रहार करना सृत कहा गया है। शत्रु के बाँये या दाहिने भाग में प्रहार मारना परिवृत्त विज्ञान होता है॥ ४॥

पीछे की ओर पैंतरा चलकर हटना निवृत्त कहलाता है। परस्पर एक-दूसरे पर प्रहार करना सम्पात होता है॥ ५॥

अपने कौशल्य की अधिकता से दूसरे को दबा लेना समुदीर्ण कहा गया है। अङ्ग-प्रत्यङ्गों (एक बार में ही कई अङ्गों पर निरन्तर प्रहार) पर प्रकार करने के लिए तलवार घुमाना भारत कहा गया है॥ ६॥

खड्ग सञ्चालन का अद्भुत कौशल्य प्रदर्शित करना कौशिक कहलाता है। चर्म (ढाल) से अपने-आपको सुरक्षित करके असि का प्रहार करना सात्वत विज्ञान होता है॥ ७॥

मण्डल (घेरे) में तलवार को घुमाना भ्रान्त, उसी को शीघ्रता या स्फूर्ति से घुमाना आविद्ध, भ्रान्त को ही ऊँचा घुमाना उद्भ्रान्त, केवल छलाङ्ग लगाना आप्लुत, सभी दिशाओं में प्रहार करना प्रसृत, एक दिशा में उछलकर जाना प्लुत, वेग से प्रहार सम्पात और सभी से लड़ने का उद्यम करना समुदीर्ण कहलाता है।

# खड्ग विज्ञान

भ्रान्त

उद्भ्रान्त

आप्लुत

सव्य दक्षिण गमन

पैतरा चलना

# अष्टम अध्याय

## छुरिका

युद्धक्षेत्र में छुरिका का प्रयोग देखने को नहीं मिलता। फिर भी सभी क्षत्रिय एवं उनकी स्त्रियाँ आत्मरक्षा के लिये कटिप्रदेश में छुरिका अवश्य रखते थे। इसका प्रयोग निकट युद्ध या आकस्मिक विपत्ति से सुरक्षा करने के लिये किया जाता है।

नीतिप्रकाशिका में छुरी का मान १ हाथ दिया है। इसकी चौड़ाई २ अङ्गुल और तीन किनारे होते हैं। कमर प्रदेश में मेखला (पेटी) बाँधकर उसमें इसे लटकाते हैं। 'अपराजितपृच्छा' में छुरिका का मान ६ से १२ अङ्गुल दिया है। इसका दण्ड भैंस के सींग का बना हुआ, जौ के समान (मध्य में स्थूल) और उसमें कीलें लगी हुई होती हैं।

'मानसोल्लास' के शस्त्रविनोदप्रकरण में सर्वप्रथम छुरिका-विनोद ही दिया है। इसके अनुसार राजा समुचित शृङ्गार, भुजा, मस्तक पर तिलक लगाये तथा हाथ एवं कानों में आभूषण धारण करके घुटनों तक आनेवाला कच्छा पहने। इसके पश्चात् रङ्गभूमि (अखाड़े) में जाकर दूसरे छुरीयुद्ध के ज्ञाता व्यक्ति को बुलाकर विविध प्रहार, पवित्रे एवं उनको रोकने की विधियों का प्रदर्शन करे। इनका सचित्र वर्णन आगे किया जाता है।

## छुरिकाया लक्षणम्

**नीतिप्रकाशिकायाम्—**

**असिधेनुः समाख्याता हस्त्योन्नत्या प्रमाणतः। अतलभत्सरुयुक्ता श्यामा कोटित्रयाशिता॥ १५॥**
**अङ्गुलिद्वयविस्तारा ह्यासन्नरिपुघातिनी। [1]मेखला ग्रन्थिनी सा तु प्रोच्यते खड्गपुत्रिका॥ १६॥**
**मुष्ट्याग्रे ग्रहणं चैव पातनं कुण्ठनं तथा। वल्गितत्रयवत्येषा सदा धार्यानृपोत्तमैः॥ १७॥**

*—नीतिप्र० अ० ५*

**अपराजितपृच्छायाम्—**

**छुरिकालक्षणं वक्ष्ये यदुक्तं परमेश्वरैः। कौमारी चैव लक्ष्मीश्च शंखिनी तुन्दका तथा॥ १७॥**

---

## छुरी का लक्षण

**नीतिप्रकाशिका में**—एक हाथ लम्बी, बिना हाथ के बचाने की डण्डी की मूठवाली, श्याम रङ्ग की, तीन धारवाली, दो अङ्गुल चौड़ी, समीप के शत्रु पर वार करनेवाली मेखला (कमर) से लटकी हुई खड्ग की पुत्री या असिधेनु (छुरी) कहाती है॥ १५-१६॥

इसकी मुट्ठी में पकड़ना, पाटन (घोंपना) कुण्ठन (घोंपकर तिरछा करके निकालना) ये तीन गतियाँ हैं। यह श्रेष्ठ राजाओं को सदा धारण करनी चाहिये॥ १७॥

*—धनुर्वेदः पं० जयदेव शर्मा, पृष्ठ ५४*

**अपराजितपृच्छा में छुरी का मान**—जैसा शिवजी महाराज ने कहा वैसा छुरी का मान

---

१. महिषविषाणघटितमुष्टिकटारकोत्कटकटिभागम्। (भैंस के सींग से बनी हुई मूठवाली छुरियाँ जिनके उत्कट कटिभाग में सुशोभित हो रही हैं।) *—यशस्तिलकचम्पूकाव्ये, पृष्ठ० ३१२*

पापिनी शुभगा लक्षा षडङ्गुलादिकोद्भवा। द्वादशान्तिमाङ्गुलान्यङ्गुलमानं प्रशस्यते॥ १८॥
आदिहीना मतिभ्रंशं मध्यहीना धनक्षयम्। हन्याद् वंशहीना शूलाग्रे मृत्युसम्भवः॥ १९॥
चतुरङ्गुला भवेन्मुष्टिरूर्ध्वे द्व्यङ्गुलताडिता। मुष्टिकाऽधो यवाकारो जडनार्थे च कीलकम्॥ २०॥

*—अपरा० अ० २३५, पृष्ठ ५९८*

**मानसोल्लासे—**

**वितस्तिमात्रिकाहीनं मध्यमं विहिनस्ति च। स्थापयित्वोत्तमां शस्त्रीं गृह्णीयाच्छिक्षया नृपः॥ १६॥**
**अङ्गुष्ठपर्वमानेन माननीयासिधेनुका। मुष्टिभागं परित्यज्य गणयेद् वंशपृष्ठतः॥ १७॥**
**आयुर्लक्ष्मीमृतिश्चेति समुच्चार्य पुनः पुनः। आयुर्लक्ष्मीपदे शस्ता वर्ज्या मृत्युपदे स्थिता॥ १८॥**
**तीक्ष्णधारा दृढा लघ्वी तिर्यग्रेखा विवर्जिता। अभिन्नधारा नात्युच्चैर्नीच्चैस्तिष्ठेत्स सौष्ठवम्॥ १९॥**
**वामं पादं तथा सव्यं प्रसृतं बाहुदण्डकम्। पुरस्कृत्यावतिष्ठेत सङ्क्रामेच्च परं प्रति॥ २०॥**
**समुष्टिकं बाहुदण्डं दक्षिणं क्षुरिकान्वितम्। शिरः समं समुत्क्षिप्य भैरवं स्थानमाचरेत्॥ २१॥**

---

एवं लक्षण कहता हूँ। कुमारी, लक्ष्मी, शङ्खिनी, तुन्दका, पापिनी, शुभगा और लक्षा ये सात प्रकार की छुरियाँ होती हैं। इनमें क्रम से कुमारी छह अङ्गुल लम्बी, लक्ष्मी सात, शङ्खिनी आठ, तुन्दका नौ, पापिनी दस, शुभगा ग्यारह और लक्षा बारह अङ्गुल मान की होती है॥ १७-१८॥

प्रारम्भ में हीन (टूटी हुई या विकारयुक्त) बुद्धि की नाशक, मध्य में त्रुटित धन की नाशक, वंश (मूठ) में दोषयुक्त कुल की संहारक और शूलाग्रफल के अगले भाग में दोषयुक्त छुरी मारक होती है॥ १९॥

छुरी की मुष्टि (मूठ) चार अङ्गुल लम्बी और दो अङ्गुल मोटी होती है। मूठ का निचला भाग जौ की आकृति के जैसा (मध्य में कुछ मोटा और किनारों में पतला) होता है एवं जड़ने के लिये कील लगी हुई होती है॥ २०॥

**मानसोल्लास में छुरी का मान**—मात्रिका (एक अङ्गुल) कम एक वितस्ति (बालिस्त) लम्बाईवाली छुरी मध्यम एवं प्रहार करने में समर्थ होती है। ऐसी उत्तम छुरी को राजा युक्तिपूर्वक धारण करे॥ १६॥

छुरी का माप मुष्टि (मूठ) को छोड़कर शेषभाग अंगूठे के पोरवों से करना चाहिये। अंगूठे के तीनों पर्व (पोरवों) को क्रमशः आयु, लक्ष्मी और मृत्यु नाम से उच्चारण करके छुरी का माप करना चाहिये। इसमें आयु और लक्ष्मी (प्रथम दो पर्वों) के माप से समाप्त होनेवाली छुरी प्रशस्त मानी जाती है और मृत्यु (अन्तिम पर्व) पर समाप्त होनेवाली वर्जनीय है॥ १७-१८॥

तेज धारवाली, दृढ, छोटी, तिरछी—रेखाओं से रहित, समानधार, न कहीं पर स्थूलधार और न ही सूक्ष्मधारवाली छुरी उत्तम होती है॥ १९॥

**मानसोल्लास में छुरी सञ्चालन**—बायाँ पैर आगे करके, बायें भुजदण्ड को फैलाकर आगे करके स्थित हो और दूसरे की ओर आगे बढ़े॥ २०॥ दाहिने हाथ में छुरी पकड़कर इसी स्थिति में उसे सिर के समान ऊँचा उठाकर विपक्षी पर प्रहार करे। इसे भैरवस्थान नामक पैंतरा कहते हैं॥ २१॥

**दक्षिणं क्षुरिकाहस्तमपसार्य च पृष्ठतः। वामदण्डं प्रसार्याग्रे पल्लीवालं प्रदर्शयेत्॥ २२॥**
**क्षुरिकाग्रे तथा दण्डं प्रसार्य पुरतः समम्। पुरतो नम्रगात्रस्तु शुनकस्थानकं न्यसेत्॥ २३॥**
**प्रसार्य दक्षिणं बाहुमसिधेनुमधोमुखीम्। उरसि न्यस्तदण्डस्तु स्थानकं नूकमाचरेत्॥ २४॥**
**क्षुरिकाग्रं समुन्नम्य नीचे तु मणिबन्धने। दण्डं चोरसि संस्थाप्य विनूकं स्थानमाश्रयेत्॥ २५॥**
**वामे भागे सशस्त्रीकं करं सन्न्यस्य कम्पयन्। दण्डवत्सन्न्यसेद्दण्डं लुलितं स्थानकं भजेत्॥ २६॥**
**क्षुरिकाग्रं प्रसार्याग्रे दण्डं संकोच्य वक्षसि। नहयं स्थानकं कुर्याद् भूपः सौष्ठवसंयुतम्॥ २७॥**
**असिधेनुमुरौ देशे कृत्वा दण्डं तदग्रतः। नट्टेकं नाम संस्थानं कुर्यात् स रञ्जयन्सताम्॥ २८॥**
**जानुनोर्मध्यभागे तु शस्त्र्यग्रेण स्पृशन् भुवम्। वामं प्रसार्य दोर्दण्डं स्थानं रोपितकं चरेत्॥ २९॥**
**दण्डकस्य शिरस्थाने सासिधेनुं करं दधत्। वामदण्डं क्षिपन्नग्रे स्थानं पोत्ताङ्गुलं भजेत्॥ ३०॥**
**उत्क्षिप्य दक्षिणं बाहुं सासिधेनुं मृगारिवत्। दण्डं नीचं तथा कृत्वा स्थानं व्याघ्रनखं श्रयेत्॥ ३१॥**
**वामदण्डस्थलस्याधः कुर्वन् मूर्वीं स शस्त्रिकाम्। दक्षिणे च स्तने दण्डं भजेदर्धकपोलके॥ ३२॥**

---

दाहिने छुरीवाले हाथ को पीछे और बायें हाथ को आगे करके पल्लीवाल स्थान को दिखाये॥ २२॥

इसी प्रकार छुरी के आगे सम (बराबरवाला बायाँ) हाथ सामने फैलाकर अपने शरीर को आगे बढ़ाकर झुकाये। इसे शुनकस्थान कहते हैं॥ २३॥

दाहिने हाथ को फैलाकर छुरी का मुख नीचे की ओर करे। बायाँ हाथ छाती पर रखकर नूकस्थान को करे॥ २४॥

छुरी का अग्रभाग (मुख) ऊपर की ओर करके दाहिने हाथ की कलाई नीचे करे। बायाँ हाथ पूर्ववत् वक्षस्थल (छाती) पर रखकर विनूक स्थान को दिखाये॥ २५॥

छुरीसहित दाहिने हाथ को चलाता हुआ अपनी बायीं ओर ले जाये। (छुरी भूमि के समानान्तर रहेगी) बायाँ हाथ दण्ड के समान सीधा रखकर लुलितस्थान को प्रदर्शित करे॥ २६॥

छुरिका के अगले भाग को आगे करके हाथ को छाती के पास लेकर दीखने में सुन्दर नहयस्थान को राजा दिखलाये॥ २७॥

छुरी को छाती के पास लाकर हाथ को उसके आगे करके सज्जनों को आनन्दित करता हुआ नट्टेकस्थान का प्रदर्शन करे॥ २८॥

दोनों घुटनों के मध्य से छुरी के अग्रभाग से भूमि को छूते हुए तथा बायाँ हाथ फैलाकर रोपितकस्थान को दिखाये॥ २९॥

शिर के ऊपर छुरीसहित दाहिने हाथ को लाकर बायाँ हाथ आगे फेंकते हुए पोत्ताङ्गुलस्थान को दिखलावे॥ ३०॥

दाहिनी भुजा को ऊपर उठाकर सिंह की भाँति झटके से प्रहार करते हुए नीचे लाकर व्याघ्रनख पैंतरे का प्रदर्शन करे॥ ३१॥

बायें हाथ के नीचे (कक्षा में) छुरीसहित दाहिने हाथ की मुट्ठी को रखे। दाहिने हाथ की कुहनी दाहिने स्तन के पास रहेगी इस प्रकार करता हुआ अर्धकपोलक दाव को करे॥ ३२॥

# छुरिका के विज्ञान

भैरव

पल्लीवाल

शुनक

विनूक

लुलित

# छुरिका के विज्ञान

नूक

रोपितकम्

विनूक

नहयम्

व्याघ्रनख

अर्धकपोलक

वामं पुरः स्थितं पादं दक्षिणेन स्पृशेन्ननु। वामं पुनः क्षिपेदग्रे दक्षिणेन पुनः स्पृशेत्॥ ३३॥
तथैवोपन्यसेत् पादं दक्षिणं चरणेन तु। गतागतैर्विनिर्गच्छन् पदग्राहं समाचरेत्॥ ३४॥
पुरः स्थितेन पादेन पाश्चात्यं घट्टयेत् पुनः। तदेवाग्रे क्षिपन्गच्छन् पदप्राप्तिं गतिं भवेत्॥ ३५॥
न्यस्तौ च पादावुत्क्षिप्य प्रसर्पंश्च शनैः शनैः। अनुक्षेपगतिं कुर्यात् सर्पणेन विसर्पणः॥ ३६॥
पादयोर्हतसञ्चारैरीषदुत्क्षेपलक्षणैः। सर्पणं सर्पवत् कुर्यात् सर्पिकां गतिमाचरेत्॥ ३७॥
आकुञ्चितैस्तथा पादैर्लीलाचङ्क्रमणाञ्चितैः। मत्तवारणवद् गच्छेन्मत्तेभगतिमाचरेत्॥ ३८॥
जिघृक्षया द्रुतं गत्वा यदुत्प्लुत्यापसर्पति। तां गतिं वायसीं बिभ्रद्विचरेच्छस्त्र कोविदः॥ ३९॥
आकुञ्चिताभ्यां पादाभ्यामङ्गुल्यग्रैः स्पृशन्महीम्। बाकोटीं गतिमास्थाय सञ्चरेत्क्षुरिकाकरः॥ ४०॥
गात्रसंकोचनं कृत्वा सिंहवल्लङ्घयन्ध्रुवम्। पञ्चाननगतिं कुर्वन्दर्शयेत् पाणिलाघवम्॥ ४१॥
किञ्चिदाकुञ्चयन्शस्त्रीं किञ्चिदालोलयन्भुजम्। आवर्तैः परिवर्तैश्च तथा सव्यापसव्यकैः॥ ४२॥

---

१. यहाँ आठ प्रकार के मल्लों की गणना आयु और शक्ति को ध्यान में रखकर की है। इसी ग्रन्थ के तीसरे अध्याय में शक्ति-सामर्थ्य के अनुसार ज्येष्ठी, अन्तरज्येष्ठी, गोपकुल और भविष्णु ये चार भेद किये हैं। मानसोल्लास में भी यही चार भेद हैं।

**शरीरानुसारं मल्लानां पञ्चभेदाः—**

**अस्थिसारो मांससारो मेदसारस्तथैव च। तथास्थिमांससारश्च चतुर्थकः प्रकीर्तितः॥ २॥**
**तथास्थिमेदसारोऽ पि पञ्चमश्च प्रयुज्यते॥ ३॥** *—मल्लपु० अ० ११*

**वयोऽनुसारं मल्लानां भेदाः—**

**आविंशतेर्वत्सरेभ्यो भविष्णुर्मल्ल उच्यते। तत ऊर्ध्वं त्रिंशदब्दात् प्ररूढः परिकीर्तितः॥ ८०॥**
**ततः परं हीयमानो नियुद्धे त्वक्षमो भवेत्॥ ८१॥** *—मानसोल्लास खण्ड २ अ० १ विंशति ४*

**मल्लानां श्रमकालस्यायुः—**

**त्रिंशद् वर्षादिपर्यन्तं प्रवृत्तिः सङ्गमेव च। आहारे न प्रवर्तन्ते सर्वेषां भविता गुणाः॥ ६॥**
**त्रिचत्वारिंशद् वर्षाणि मल्लाश्चत्वार एव च। श्रमैरभ्यासैराहारैः संयमैश्च निरन्तरम्॥ ७॥**
**धारयन्त्यात्मनो विद्यां गुणांश्चापि यथा तथा। अथोर्ध्वं यावत्पञ्चाशत्प्राणेनापि बलेन च॥ ८॥**
**सर्वाभ्यासेन शौर्येण कालेनापि पुनः पुनः। वृषभश्च मृगश्चैव सिंहश्चापि तथा पुनः॥ ९॥**
**अथैषामेव मल्लानां धार्यमाणा अपि ध्रुवम्। गुणाः प्रयान्ति व्यसनैः कालस्यापि क्रमादपि॥ १०॥**
**वर्जयित्वा गजं तस्य षष्टिवर्षाणि योग्यता। वृषसिंहमृगाश्चापि तेनेव व्यतिरिच्यते॥ ११॥**
**अन्यानपि गुणान्सर्वान्कथयामि गजस्य च। यैः षष्टिवर्षपर्यन्तं विद्या संधार्यते ध्रुवम्॥ १२॥**

---

**शरीर के आधार पर मल्लों के पाँच भेद**—अस्थिसार (जिसकी हड्डियाँ सुदृढ़ हों), मांससार (सुदृढ़ मांसपेशियोंवाला) मेदसार (वसा=चर्बी की अधिकतावाला, स्थूल), अस्थिमांससार (सुदृढ़ अस्थि और मांसपेशियोंवाला), और अस्थिमेदसार—ये पाँच भेद मल्लों के शरीर के गुणानुसार होते हैं॥ २-३॥

**अवस्थानुसार भेद**—बीस वर्ष तक मल्ल भविष्णु (भावी, आगे बढ़ने की सम्भावनावाला) होता है। बीस से लेकर तीस वर्ष तक पूर्ण युवा प्ररूढ (चढ़ा हुआ) मल्ल कहलाता है, इसके पश्चात् क्रमशः हीन (दुर्बल) होने से नियुद्ध के अयोग्य हो जाता है।

*—मानसोल्लास अ० १ वि० ४ श्लोक ८१-८२*

तीस वर्ष तक अपनी रुचि व संगम (अच्छे गुरु की शरण) से सभी मल्ल दक्ष बन सकते हैं। यहाँ आहार की कुछ अल्पता भी हो तब भी काम चल जाता है, क्योंकि इस समय शरीरादि धातुओं की स्वतः ही वृद्धि होती है॥ ६॥

तीस वर्ष से लेकर तैंतालीस (४३) वर्ष तक चारों प्रकार के मल्ल श्रम, अभ्यास, आहार और संयम (ब्रह्मचर्य) से ही पूर्वोक्त गुणों को बनाये रह सकते हैं॥ ७॥

इसके पश्चात् पचास वर्ष तक प्राण और बल (Stamina and Strength) सभी अभ्यास, शौर्य आदि गुण क्रमशः क्षीण होते जाते हैं। केवल गज-प्रकृति मल्ल ही साठ वर्ष तक इन गुणों को स्थिर रख सकता है॥ ८-१०॥

वृषभ, सिंह और मृग प्रकृतिवाले सभी उससे अल्प रह जाते हैं॥ ११॥

गज-प्रकृति मल्ल के दूसरे अन्य गुणों को भी कहता हूँ, जिनसे साठ वर्ष तक यह विद्या स्थिर रखी जा सकती है॥ १२॥

उद्यमैश्च व्यायामैरग्निराहार एव च। आरोग्यवान् धर्मवांश्च श्रमवानर्थवानपि॥ १३॥
सहायवान् बुद्धिमांश्च बलवान् प्राणवानिति। गजस्तु धारणैरेतैः षष्टिवर्षाणि दुर्जयः॥ १४॥

*—मल्लपुराणे पञ्चमोऽध्यायः*

## मल्लानां गुणाः—

महाकायो महाप्राणो मल्लविद्याविशारदः॥ ८१॥
ज्येष्ठिकः कथ्यते मल्लः प्राणविद्याधिकोऽपि वा।[1] अर्धेन ज्येष्ठिमल्लस्य कायप्राणगुणैस्तु यः॥ ८२॥
हीयमानो भवेन्मल्लो नाम्ना सोऽन्तरज्येष्ठिकः। ततोऽपि हीयमानश्चेदेतैरेव गुणैस्तथा॥ ८३॥
गोवलो[2] नाम मल्लोऽसौ नियुद्धे वेगवान्वरः। वेगाढ्यः सरलो दीर्घो भविष्णुः शैशवे भवेत्॥ ८५॥
जङ्घाकाण्डे कोष्ठके च हनुदेशेऽस्थिसारवान्। द्वात्रिंशतावत्सराणां पाल्यंशे देशविश्रुतः॥ ८६॥

*—मानसोल्लास खण्ड २ अ० ६ विं० ४*

## अस्थिसारादिनां गुणाः—

स्थूलास्थिः स्थूलसन्धिश्च स्वल्पमांसोऽल्पसारवान्। श्रमणो भ्रमणकः कश्चिदल्पश्रमकरस्तथा॥ १९॥
तथा शौर्येण संयुक्तस्तथा चाप्रियदर्शनः। इत्यष्टावास्थिसारस्य भेदाः प्रकीर्तिता मया॥ २०॥
इदानीं मांससारस्य कथ्यते गुणविस्तरः। सुप्रमाणो न सूक्ष्मास्थिर्न स्थूलास्थिर्भवत्यपि॥ २१॥
मध्यस्थास्थिरसौ नैव बहुमांसो न शस्यते। नाल्पमांसो हि बलवान् सममांसश्च चोदयः॥ २२॥

---

उद्यम (उत्साह) और व्यायाम आदि से प्रवृद्ध जठराग्नियुक्त पुष्ट भोजन करनेवाला, स्वस्थ, धार्मिक, परिश्रमी, अर्थवान् (धनी), सहायवान् (इष्ठ-बन्धुजनों का सहयोग), बुद्धिमान्, बलवान् और प्राणशक्ति से युक्त गज-प्रकृति मल्ल साठ वर्षों तक अन्यों से दुर्जय रहता है॥ १३-१४॥

सुडौल शरीर, महाप्राण (बहुत अधिक शक्ति), मल्लविद्या को जाननेवाला, प्राणविद्या (Stamina) में अधिक बढ़ा हुआ ज्येष्ठी मल्ल कहलाता है॥ ८१॥

ज्येष्ठी मल्ल से शरीर, शक्ति और कला में आधा अन्तरज्येष्ठी मल्ल होता है, अन्तरज्येष्ठी से भी गुणों में कम, परन्तु नियुद्ध में॥ ८२॥ तेजी से लड़नेवाले मल्ल को गोवल कहते हैं॥ ८३॥

वेग (फुर्ति) से लड़नेवाला, सरल (सीधा शरीर या विनम्र स्वभाव), दीर्घ=लम्बे कदवाला और बाल्यावस्थायुक्त (बीस वर्ष के कम) भविष्णु मल्ल होता है॥ ८५॥

जङ्घा, कोष्ठ एवं हनुप्रदेश (ठुड्डी) की अस्थियाँ सुदृढ़ हों, ऐसा मल्ल बत्तीस वर्ष की आयु में सुप्रसिद्ध हो जाता है॥ ८६॥

मोटी हड्डियाँ, जिसके अङ्गों के जोड़ मोटे हों, कम मांस एवं सारवाला परिश्रमी दौड़ने में तेज, कम मेहनती, शूरवीर और भद्दी आकृतिवाला—ये आठ भेद अस्थिसार मल्लों के कहे हैं॥ १९-२०॥

अब मांससार (सुदृढ़ मांसपेशियोंवाले मल्ल) के गुणों का कथन किया जाता है।

विशाल शरीर, न स्थूल अस्थि, न सूक्ष्म अस्थिवाला, अर्थात् मध्य अस्थियोंवाला ही उत्तम है। न बहुत मांस से युक्त, न ही अल्प मांसवाला, अर्थात् सममांसवाला ही प्रशस्त होता है॥ २१-२२॥

---

१. मल्लपुराण अध्याय ३ में ज्येष्ठी मल्ल के ६४, अन्तरज्येष्ठी के ३०, गोपकुल के ३७ तथा भविष्णु मल्ल के २४ गुण लिखे हैं। अधिक ज्ञानार्थ वहीं देखिये।

२. गोपकुल इति मल्लपुराणे।

**बलवर्धनलीनाङ्गो बद्धदृढतनुस्तथा। लीनशौर्यगुणोपेतः सर्वेषामुत्तरोत्तरः॥ २३॥**
**प्राणवांश्च श्रमसहस्तथैव च जितश्रमः। कथिता मांससारस्य गुणा एते चतुर्दश॥ २४॥**
**अथातो मेदसारस्य गुणानामेकविंशतिः। मध्यस्थूलो भवेत् कश्चित् सूक्ष्मोऽन्यः करपादयोः॥ २५॥**
**सूक्ष्मास्थिरल्पमांसश्च बहुमेदः श्रमार्धभाक्। श्वासाधिकः स्वल्पबलो व्यायामेऽशक्य एव च॥ २६॥**
**निद्रापरः शय्यापरो बह्वाशी बहुपानकृत्। सेवापरः शीतसहः सदा घर्मेण पीड्यते॥ २७॥**
**बहुश्रमः सूक्ष्मास्योऽर्धस्वरो [१]भीरुरधस्तथा। सस्वेदवान् वातसहो गुणा इत्येक विंशतिः॥ २८॥**
**अथास्थिमेदसारस्य गुणाः सप्तदश स्मृताः। पृथुलास्थिस्वरूपोऽपि मांसलो मेदकस्तथा॥ २९॥**
**कश्चित्स्थूलोदरोऽपि स्यात्सूक्ष्मवक्षः स्थूलोऽपि च। स्थूलस्कन्धः प्रौढ बाहुरल्पजङ्घो भवत्यपि॥ ३०॥**
**अल्पसत्त्वः पृथुश्चैव तथोष्म सह एव च। आहारवान् श्वासपरः प्राणवान् स्थिरयुद्धकृत्॥ ३१॥**
**दृष्टभीरुक् स्वभावात् सः स्थिरश्चैवाङ्गसङ्गरे। इत्यस्थिमेदसारस्य गुणाः सप्तदश स्मृताः॥ ३२॥**
**अथास्थिमांससारस्य गुणाः षोडश प्रोच्यन्ते। शोभनास्थिवयश्चैव तथावशशरीरवान्॥ ३३॥**
**सममांससमास्थिश्च किञ्चित्कायेन मेदुरः। पित्तविस्तारवांश्चापि चतुरवाक्च क्वचिद्भवेत्॥ ३४॥**
**न ह्रस्वः क्वचिदङ्गेषु सप्रमाणश्च सर्वदा। समप्राणः समशौर्यस्तथैवं समसत्वरः॥ ३५॥**

बलिष्ठ, लीनाङ्ग (छरहरे वदन अथवा इकहरे शरीरवाला) सुगठित शरीरयुक्त, लाघव और शौर्यगुणों से युक्त—इन सभी गुणों में उत्तरोत्तर बढ़ा हुआ, प्राणवान्, श्रम को सहन करने में समर्थ और श्रान्त न होनेवाला—ये चौदह गुण मांससार मल्लों के कहे हैं॥ २३-२४॥

अब मेदसारमल्ल के इक्कीस गुणों को कहते हैं—इनमें कुछ मध्यभाग (उदर) से स्थूल, कुछ सूक्ष्म हाथ-पैरवाले, सूक्ष्म हड्डियों और अल्पमांसयुक्त, बहुत मेदवाले, आधा श्रम करनेवाले, जिनका श्वास जल्दी फूलता है, अल्पबल, व्यायाम करने में असमर्थ, अधिक सोनेवाले, खट्वा पर ही पड़े रहनेवाले (आलसी), बहुत भोजन और पान करनेवाले, सेवा चाहनेवाले, सर्दी को सहन करना, धूप से पीड़ित होना, बहुत श्रम करना, छोटा मुख, मन्द और डरपोक स्वर, जिन्हें पसीना अधिक आता हो, वायु को सहनेवाले—इन इक्कीस गुणोंवाले मल्ल मेदसार होते हैं॥ २५-२८॥

अस्थि और मेद जिनके प्रबल हों उनके सतरह गुण होते हैं—मोटी हड्डियाँ, मांसल और मेदस्वी आकृति, किन्हीं का मोटा पेट, किन्हीं की छाती अल्प विस्तृत, मोटे कन्धे, प्रौढ़ भुजा, अल्प जाङ्घें, कम बल परन्तु मोटा शरीर, गर्मी सहन करने में समर्थ, पर्याप्त खाना, श्वासयुक्त, प्राणशक्तियुक्त, जमकर लड़नेवाला, दीखने में डरपोक, परन्तु संग्राम में डटकर लड़नेवाला इत्यादि सतरह गुण अस्थिमेदसार मल्ल के होते हैं॥ २९-३२॥

इसके पश्चात् अस्थिमांससार (जिसकी हड्डियाँ और मांसपेशियाँ सुदृढ़ हों) मल्ल के सोलह गुणों को कहते हैं—सुन्दर अस्थि, जिसका शरीर वश में हो, समुचित मांस और अस्थिवाला, शरीर में कुछ स्थूल (चर्बीवाला), पित्त प्रकृतिवाला, भाषण करने में पटु, जिसके सभी अङ्ग छोटे न हो (सम अनुपात में हो), समप्राण, समान शौर्य, समुचित स्फूर्ति, आधे युद्ध (मल्लयुद्ध

१. अत्र भीरुरवस्तथा इति पाठः स्यात्।

**ऊर्ध्वभद्रप्रयोद्धा च अर्धभद्रप्रयुद्धकृत्। अर्धोर्ध्वभद्रयोधी च सर्वयुद्धकरस्तथा ॥ ३६ ॥**
**अष्टाङ्गभद्रयोधी च गुणाः षोडश संख्यया। इत्यङ्गानां च पञ्चानां गुणाः संकीर्तिता मया ॥ ३७ ॥**

—म० पु० अ० ४

### गजादिप्रकृतीनां मल्लानां गुणाः—( मल्लपुराणे )

**शृणु सोमेश्वरात्रैव एकाग्रहृदयोऽधुना। गजस्तु धारयेद् यांस्तु गुणांस्तान् कथयाम्यहम् ॥ १५ ॥**
**वपुषा धातुतश्चैव बलवान् प्राणवांस्तथा॥ स्नेहसारस्तथा शूर एते शारीरका गुणाः ॥ १६ ॥**
**एतैर्गुणैः सदा मल्लो गजश्चैवोपलक्ष्यते। सिंहोऽपि सहजैस्तद्वदेतैर्द्वादशभिर्गुणै ॥ १७ ॥**
**उरसा चातिविस्तीर्णः कटिविस्तारवांस्तथा। मध्ये क्षामोदरः स्कन्धे प्रकोष्ठे स्थूल एव च ॥ १८ ॥**
**तेजोवान् स्फूर्तिमांश्चैव लघुवेगश्च सर्वदा। वपुषो विस्तरश्चैव तथैवोत्पतने गतिः ॥ १९ ॥**
**शीघ्रप्राणः शौर्यवांश्च सिंहस्य कथिता गुणाः। वृषोऽपि जायते यैस्तु गुणांस्तान्कथयाम्यहम् ॥ २० ॥**
**सुशरीरः सुप्रमाणः पृथुलः कठिनोऽपि च। पादारोपी भारसहो युद्धशूरो जितश्रमः ॥ २१ ॥**
**अष्टौ गुणा भवन्त्येते ज्ञातव्याश्च स्वभावजाः। अथेदानीं मृगस्यापि गुणान्वक्ष्यामि तत्त्वतः ॥ २२ ॥**
**बली वशी भीरुकश्च सूक्ष्मपादकरोऽपि च।**
**सुतनुश्च सुवेगश्च तथैव व्यवसायवान्। अल्पश्रमश्च सप्तैते मृगस्य सहजा गुणाः ॥ २३ ॥**

---

के आधे समय के पश्चात्) में अच्छे प्रकार लड़नेवाला, प्रारम्भ में और बाद में अच्छा लड़नेवाला और सारे समय में भली-भाँति लड़नेवाला तथा आठों अङ्गों से समुचितरूप से युद्ध करनेवाला इन सोलह गुणों से युक्त मल्ल अस्थिमांससार प्रधान होता है॥ ३३-३७॥

**हे सोमेश्वर! एकाग्रचित होकर सुनो! गज प्रकृतिमल्ल जिन गुणों को धारण करें, उनको मैं कहता हूँ॥ १५॥**

शरीर और धातु (रस-रक्त-मांसादि) से बलवान्, प्राणवान्, स्नेह (चर्बी) से युक्त और शूरवीरता—ये शारीरिक गुण जिसमें हों, उसे गज-प्रकृति मल्ल कहते हैं॥ १६½॥

इसी भाँति सिंह भी निम्नलिखित स्वाभाविक बारह गुणों से युक्त होता है—

विस्तीर्ण वक्षस्थल, कटिभाग विस्तृत, मध्य का उदरभाग पतला, स्कन्ध और भुजायें स्थूल, तेज और स्फूर्ति एवं लघुवेग, विस्तृत शरीर, लम्बी छंलाग, एकदम शक्ति लगाना, शौर्य—ये बारह गुण सिंह-प्रकृति मल्ल के कहे हैं॥ १७-१९॥

जिन गुणों से वृष-(बैल)-प्रकृति मल्ल कहाते हैं, उनका कथन कहता हूँ॥ २०॥

सुन्दर, कद्दावर, स्थूल और सुदृढ़ शरीर, पैर को जमानेवाला, भारसहने में समर्थ, युद्ध में शूरवीरता से लड़नेवाला एवं परिश्रम से न थकनेवाला मल्ल वृषभ-प्रकृति जानना चाहिये॥ २०-२१॥

अब मृग-प्रकृति मल्ल के भी सभी गुणों का कथन किया जाता है॥ २२॥

बलवान्, दूसरे के वश में होनेवाला, डरपोक, सूक्ष्म हाथ और पैरोंवाला, सुन्दर शरीरयुक्त, तेजी से लड़नेवाला, कार्य में रत और अल्पश्रम करनेवाला—इन सात गुणों से युक्त मृग-(हरिण)-प्रकृति मल्ल कहलाता है॥ २३॥

**नियुद्धानुसारं मल्लानां द्वादश भेदाः—मानसोल्लासे—**

**महाकायस्तु यो मल्लो भारी सः परिकीर्तितः॥५५॥**
**बलाढ्यः कथ्यते प्राणी ऊर्जलश्च सुशिक्षितः। संस्थाननिरतो ज्ञेयो यः स्थाने सुस्थिरासनः॥५६॥**
**श्रमं न याति यो युद्धे बहुयोधी स कथ्यते। विज्ञानेन गृहीतोऽपि यो मुञ्चति न भाषते॥५७॥**
**नास्फालयति हस्तेन सम्बद्धः पतितो ह्यधः। बलनं सहते यस्तु स भवेद् बलेन सह॥५८॥**
**यो रक्षति हि विज्ञानं मल्लो रक्षणको मतः। आशुप्रयुक्ते विज्ञाने तदपाये परं द्रुतम्॥५९॥**
**स मल्लो ढकणो धन्यः शीघ्रविज्ञानकारकः। परप्रयुक्तं विज्ञानं पररन्ध्रं च पश्यति॥६०॥**
**दर्शनाख्यक्रियायोगान्मल्लो दर्शन उच्यते। उत्प्लुत्य यो लगेत्कण्ठे स मल्लो लगनो भवेत्॥६१॥**
**मर्यादापालको युद्धे नियतः परिकीर्तितः॥६२॥** —*मानसोल्लास भाग २ अ० ६ वि० ४*

**रङ्गभूमिः—**

**अथात्र कथ्यते तावद् रङ्गभूमेस्तु लक्षणम्। जातिवर्णप्रमाणानि बहुभेदसमन्वितम्॥१४॥**
**नित्याभ्यासहिताभूमी रङ्गभूमिः प्रकीर्तिता। सैवाषाढकनाम्नी च प्रसिद्धा परमा मता॥१५॥**
**तस्यास्तु लक्षणं वक्ष्ये जातिवर्णप्रभेदतः। सुलक्षणं जयस्थानं हानिस्थानमलक्षणम्॥१६॥**

---

**नियुद्ध के अनुसार मल्लों के भेद**—जो विशाल शरीरवाला मल्ल है, उसे भारी कहते हैं॥५५॥

अधिक बलवाले को प्राणी, मल्लयुद्ध में अच्छी प्रकार दक्ष, ऊर्जल, अपने स्थान (पैंतरे) पर रहकर लड़नेवाला संस्थाननिरत जानना चाहिये॥५६॥

मल्लयुद्ध में जिसे श्रान्ति (थकान) न आती हो उसे बहुयोधी कहते हैं। विज्ञान (दावपेंच) से पकड़ा जाने पर भी जो दूसरे मल्ल को नहीं छोड़ता और बोलता नहीं, न अपने हाथ से प्रतिक्रिया करता है केवल गिरकर भूमि पकड़ लेता है, ऐसे मल्ल को सम्बद्ध कहते हैं॥५७॥

जो प्रतिपक्षी के द्वारा बलप्रयोग या अंगप्रत्यङ्गों का मरोड़ना इत्यादि को सहनकर लेता है, उसे रक्षणक माना गया है॥५८½॥

प्रतिपक्षी द्वारा बहुत शीघ्र दावपेंच लगाने पर भी जो तुरन्त ही उसकी काट (प्रतीकार) कर देता है, उस मल्ल को ढकण कहते हैं। शीघ्र दावपेंच लगाने से ऐसा मल्ल प्रशंसित है। जो मल्ल दूसरे द्वारा लगाये गये और उसके मर्मस्थल (Weak Points, जहाँ पर अपना दाव लगाकर उसे परास्त किया जा सके) देखने में कुशल है, उसे दर्शन कहते हैं। जो उछलकर कण्ठ को पकड़ ले, ऐसा लगन और नियुद्ध के नियमों का पालक मल्ल नियत कहलाता है॥५९-६२॥

**अखाड़ा**—अब जाति (उन्नत, अवनत समतल आदि), वर्ण (मिट्टी का रङ्ग), प्रमाण (लम्बाई-चौड़ाई) आदि बहुत भेदों से युक्त रङ्गभूमि (अखाड़े) का लक्षण कहा जाता है॥१४॥

प्रतिदिन अभ्यास के लिए उपयुक्त भूमि को रङ्गभूमि कहते हैं, इसी का नाम आषाढ़क (अखाड़ा) भी प्रसिद्ध है॥१५॥

उसका जाति-भेदादि से लक्षण कहता हूँ, क्योंकि अच्छे लक्षणों से युक्त भूमि जय देनेवाली और इससे विपरीत भूमि में श्रम करने से हानि हो जाती है॥१६॥

निम्नोन्नत समत्वेन त्रिविधा भूमिका भवेत्। निम्नोन्नतां परित्यज्य तत्राङ्गी क्रियते सदा॥ १७॥
आषाढकप्रमाणं तु त्रिविधं प्रकीर्तितम्। देवमानं दैत्यमानं मर्त्यमानं तथैव च॥ १८॥
एकोत्तरं हस्तशतं देवमानं प्रकीर्तितम्। दैत्यानामेव पञ्चाशत् मर्त्यानामेकविंशतिः॥ १९॥
चतुरस्त्रं त्रिकोणञ्च वर्तुलं च तथैव च। ब्राह्मणी शुक्लवर्णा च पीता क्षत्रियभूमिका॥ २०॥
श्यामवर्णा तथा शूद्री बहुवर्णा तथाधमा। उत्तमाधममध्यास्तु भूमयो बहुभेदतः॥ २१॥
कर्करैर्लाञ्छिता भूमिर्लोहकाष्ठविदूषिता। पाषाणैः कण्टकैर्वापि कुट्टेनापि पटेन च॥ २२॥
वर्जनीया प्रयत्नेन दुःखदा सर्वदा नृणाम्। —*मल्लपुराणम् अ० ६*
मल्लयुद्धविधानाय रङ्गभूमिं तु विस्तराम्॥ ३५॥
प्रपूज्यां सुदृशां चैव सुवर्तुलाममां नवाम्। एकविंशतिहस्तैश्च विस्तीर्णां च प्रमाणतः॥ ३६॥
हस्तेनोच्चामनीरूक्षामतिमन्द्रामनिन्दिताम्। बीजपातक्षेत्रमिव कोमलां च मनोरमाम्॥ ३७॥
रक्षा सन्तापयेन्मल्लान् शोषं च कुरुते परम्। कण्टकाः कर्कराश्चैव वर्जनीयाः प्रयत्नतः॥ ३८॥
छिद्राणि चैव रन्ध्राणि पूरयित्वा विशोधनैः। शोधयित्वा प्रपूज्या च बहु पुष्पाक्षतैः किल॥ ३९॥
तत्र जयस्य प्राप्त्यर्थे हरिं संस्थापयेत् परम्। बीजपूरकमप्यत्र रङ्गमध्ये निवेशयेत्॥ ४०॥

---

नीची, ऊँची और समतल—तीन प्रकार की भूमि होती है। इनमें नीची-ऊँची को छोड़कर समतल भूमि ही उपयुक्त है॥ १७॥

देवमान, दैत्यमान और मर्त्यमान (पुरुषों के लिए तीन प्रकार के मान से युक्त) अखाड़ा होता है॥ १८॥

देवमान अखाड़े का प्रमाण एक सौ एक हाथ, दैत्यों के अखाड़े का पचास हाथ और मनुष्यों के अखाड़े का मान इक्कीस हाथ होता है॥ १९॥

अखाड़ा चौकोर, त्रिकोण (तीन कोनोंवाला) और गोलाकार तीन प्रकार का होता है।

ब्राह्मण-(उत्तम)-मिट्टी श्वेत, क्षत्रियमिट्टी पीली और शूद्रगुण-(निम्नगुण)-युक्त काली मिट्टी होती है। अनेक वर्णों से युक्त मिट्टी निकृष्ट होती है। इस प्रकार उत्तम, मध्यम और अधम आदि बहुत-से भेद भूमि के होते हैं॥ २०-२१॥

कङ्कर, लोह, काष्ठ, पत्थर, काँटे, कूड़ा, कर्कट, एवं चिथड़े जहाँ पड़े हों, ऐसा स्थान अखाड़े के लिए उपयुक्त नहीं हैं, क्योंकि वह सदा मल्लों को दुःखदायी होता है॥ २२½॥

मल्लयुद्ध के लिये राजा सेवकों को रङ्गभूमि तैयार करने का आदेश दे। वह भूमि सुन्दर, इक्कीस हाथ प्रमाणवाली, गोलाकार, एक हाथ ऊँची, गीली मिट्टीयुक्त, देखने में शोभनीय और जिसकी मिट्टी इतनी कोमल हो, जैसे बीज बोने के लिये तैयार किया हुआ खेत॥ ३५-३७॥

मल्लों को रोगादि एवं चोट लगना—ये बहुत पीड़ित करते हैं, अतः रङ्गभूमि से कण्टक और कङ्कर (पत्थर) आदि प्रयत्न करके दूर करने चाहियें॥ ३८॥

भूमि के गड्ढे और छिद्रादि को भरकर पुष्प, अक्षत, धूपादि से उसे सुवासित करे॥ ३९॥

वहाँ पर जय की प्राप्ति के लिये हरि (श्रीकृष्णजी) की स्थापना करे। रङ्गभूमि में बिजोरा नींबू को रक्खे॥ ४०॥

**एतल्लक्षणसंयुक्तं कारयेद् रङ्गमुत्तमम्। आयुरारोग्यदं सौख्यं श्रीकरं च यशस्करम्॥ ४१॥**

*—मल्लपुराण अ० १४*

**मानसोल्लासे—**

**स्तम्भैः षोडशभिर्युक्तं गृहं कृत्वा समायतम्॥ ६८॥**
**पश्चिमे तु दिशाभागे चतुरस्त्रां सुविस्तृताम्। सार्धहस्तसमुत्सेधां वेदिकां तत्र कारयेत्॥ ६९॥**
**वेदिकाग्नेयकोणे तु कुर्याच्छ्रीकृष्णमण्डपम्। वेदिकायाः पुरो देशे दसहस्तसुविस्तृतम्॥ ७०॥**
**त्रिंशद् हस्तपरीणाहं वितस्तिद्वयखातकम्। पूरयेच्च ततः खातं ग्रामसञ्जातया मृदा॥ ७१॥**
**मृत्तिकां सेचयेत्तोयैः कुद्दालैश्च निखातयेत्। चालयेच्चालिनीभिश्च दृषदादीन्विशोधयेत्॥ ७२॥**
**सुश्लक्ष्णां मृत्तिकामीषदार्द्रां शुद्धां च कारयेत्। एवमक्खाडकं कृत्वा..........।**

*—मान० विं० ४, अ० ६*

---

इन लक्षणों से युक्त बनाया हुआ अखाड़ा आयु, आरोग्य, सुख, श्री और यश की वृद्धि करनेवाला होता है॥ ४१॥

**मानसोल्लास में**—सोलह खम्भों से युक्त वर्गाकार मण्डप बनवाकर उसके पश्चिम दिशा में चौकोर डेढ हाथ ऊँची वेदि को बनवाये॥ ६८–६९॥

वेदि की आग्नेय (पूर्व–दक्षिण) दिशा में श्रीकृष्णजी का मण्डप स्थापित करे। वेदि के सामने ही दश हाथ चौड़ा और तीस हाथ लम्बा एवं एक हाथ गहरा गड्ढा खोदे। उस गड्ढे को ग्राम से लाई हुई मिट्टी से भर दे॥ ७०–७१॥

मिट्टी को जल से गीला करके कुद्दाल (कस्सी) के द्वारा खुदवाये। छलनी से छनवाकर कङ्कर, रोड़े आदि को दूर कर दे। इस प्रकार चिकनी, कुछ गीली और शुद्ध मिट्टी से अखाड़ा तैयार करे॥ ७२॥

# द्वितीय अध्यायः

## मल्लानां दिनचर्या

**प्रथमं प्रातरुत्थाय मल्लैः कर्त्तव्यमादरात्। मलमूत्रविशुद्धिश्च दन्तधावनमेव च॥ २३॥**
**गण्डूषैर्मुखशुद्धिश्च मुखप्रक्षालनं तथा। सन्ध्यादिकञ्च निर्वृत्य रङ्गं गच्छेत् समाहितः॥ २४॥**
**गत्वा च प्रथमं ज्येष्ठी प्राणायामं च कारयेत्। भूमिवन्दनपूर्वं च कारयेत् च ततः श्रमः॥ २५॥**

## मानसोल्लासे—

**योषितां दर्शनात् स्पर्शात् संलापात् सङ्गमादपि॥ ८९०॥**
**संरक्ष्या यत्नतो मल्ला विशेषेण भविष्णवः॥ ८९०॥** *—मा० मा० २ अ० ६ वि० ४*

## आहारः—

**भविष्णवः प्ररूढाश्च पोष्या बृंहणभोजनैः॥ ८८८॥**
**माषैर्मांसैस्तथा दध्ना पिष्टैः क्षीरविमिश्रितैः। घृतेन सितया चैव विदार्या वाजिगन्धया॥ ८८९॥**
**घृतेन भृष्टैः कुष्माण्डैश्चूर्णितैः सितयान्वितैः॥** *—मानसोल्लास भाग २, अ० ६, विं० ४*

## व्यायामान्ते पानीयम्—

**कर्त्तव्यं च पयः पानं सितया च समन्वितम्। [1]द्राक्षाणां भक्षणं चैव श्वेतवस्त्रनिषेवणम्॥ ५४॥**
*—म० पु० अ० ८*

---

**मल्लों की दिनचर्या**—मल्लों को प्रसन्नतापूर्वक स्वेच्छा से प्रातःकाल उठकर मल-मूत्र का त्याग, दाँतों की शुद्धि, कुल्ला करके मुख की शुद्धि और मुँह धोना चाहिये। इसके पश्चात् सन्ध्यादि से निवृत होकर शान्तचित्त से अखाड़े में जाना चाहिये॥ २३-२४॥

वहाँ जाकर ज्येष्ठी मल्ल (गुरु) प्रथम सभी मल्लों से प्राणायाम का अभ्यास करवावे। पश्चात् भूमि-वन्दना करके पुनः श्रम (व्यायाम, मल्लयुद्धादि) सभी मल्ल करें॥ २५॥

**मानसोल्लास में**—मल्लों के लिए संयम—ज्येष्ठी-मल्ल, मल्लों को स्त्रियों के दर्शन, स्पर्श, बातचीत, सङ्गम आदि अष्टविध मैथुनों से यत्नपूर्वक बचावे, विशेषरूप से भविष्णु (भावी) मल्लों को।

भविष्णु और प्ररुढ़ मल्लों की बृंहण (पुष्टि करनेवाले) पदार्थों—यथा माष (उड़द), मांस, दधि और दुग्ध से युक्त पिष्ट पदार्थ, घी, मिश्री, विदारीकन्द, अश्वगन्ध घी में तला हुआ पेठा मिश्रीयुक्त आदि पुष्टि (बलवर्धन) करनेवाले भोज्य पदार्थों के द्वारा वृद्धि करनी चाहिए॥ ८८८-८८९॥

**व्यायाम के पश्चात् पीने योग्य**—व्यायाम के पश्चात् मिश्री मिला हुआ दुग्ध पीना चाहिये और द्राक्षा (किशमिश, मुनक्का) का भक्षण करना तथा श्वेत वस्त्र धारण करके रहना उपयुक्त है॥ ५४॥

---

१. मल्लपुराण के नवम अध्याय में खाद्यपदार्थों की विस्तृत सूची दी है। बारहवें अध्याय में वात-पित्त-कफ को प्रकुपित करनेवाले पदार्थ और उनके शमन के उपाय भी बताये हैं।

**अतिमात्रं तु रोगाय अंशदोषचतुष्टकम्। भोजनं हीनमात्रं च बलं तेन प्रजायते॥ ९१॥**
**हेमन्ते शीतसंरोधाद् भवति प्रबलोऽनलः। पच्यत्यल्पेन्धनो धातूननलो वायुनेरितः॥ ९२॥**
**गोधूमपिष्टकेनापि पाकांश्चैव बहूनपि। गुणान्करोति संयुक्तो घृतेनापि गुडेन च॥ ९३॥**
**वसन्ते यवगोधूमाः क्षौद्रजाङ्गलकान्यपि। सुशीततोयसिक्ताङ्गो लिप्ताङ्गश्चन्दनैः शुभैः॥ ९४॥**
**पाटलावासितं चाम्भः कर्पूरेण च शीतलम्। शशाङ्ककिरणै रात्रौ सेवितं प्रपिबेन्मुहुः॥ ९५॥**
**अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः। पयसोऽष्टगुणं माषं माषादष्टगुणं घृतम्॥ ९६॥**
**घृतादष्टगुणं तैलं स्नानसंमर्दनं परम्। शाकपाके रुचिकरं केवलं नैव भक्षयेत्॥ ९७॥**
**माषेन वर्धते कायो घृतेन वर्धते बलम्। पिष्टेन वर्धते प्राणः शौर्यमन्नात् प्रवर्धते॥ ९८॥**

*—मल्लपुराण अ० ९*

**श्रमस्य भेदाः—**

**श्रमाश्चैव तु चत्वारो भवन्ति विनियोगतः। अल्पश्रमश्चार्धश्रमः पूर्णश्रम इति क्रमात्॥ २३॥**
**ततोऽति श्रम एव स्यात् कथिता मल्लकर्मणि।**

**एतेषां लक्षणानि—**

**अथाल्पश्रमसंभूतं लक्षणं कथयाम्यहम्। अल्पश्रमे कृते प्रातः श्वासस्वेदो न जायते॥ ३४॥**
**अर्धश्रमः कृतो यैस्तु लक्षते शृणु तान् गुणान्। अर्धश्रमेण मल्लानां प्रस्वेदो जायते पुनः॥ ३८॥**

---

अधिकमात्रा में किया हुआ भोजन रोगों की वृद्धि करता है। अल्पमात्रा में (कुछ भूख रखकर खाया हुआ) किया हुआ भोजन बलवर्धक होता है॥ ९१॥

शीतकाल में शीत के द्वारा रोमकूप रुद्ध होने से जठराग्नि प्रबल होती है, अतः पर्याप्त भोजन करना चाहिये, इसके अभाव में यह वायु द्वारा प्रेरित होकर धातुओं को जला डालती है॥ ९२॥ अतः इस ऋतु में गेहूँ, पिष्ट पदार्थ, विविधपाक और घृत तथा गुड़युक्त पदार्थ गुणकारक हैं॥ ९३॥

वसन्त ऋतु में जौ, गेहूँ, मधु, जाङ्गलिक पशुओं का मांस, ठण्डे पानी से स्नान, चन्दन का लेप, गुलाब और कर्पूर से युक्त चन्द्रमा की किरणों से शीतल किया हुआ जल पीना चाहिये॥ ९४॥

अन्न से आठ गुणा लाभदायक पिष्ट पदार्थ, पिष्ट से आठ गुणा दुग्ध, दुग्ध से आठ गुणा उड़द, उड़द से आठ गुणा घी, घी से आठ गुणा तेल (स्नान, मर्दन में और केवल शाक का छोंका लगाने में) लाभ दायक है॥ ९६-९७॥

उड़द से शरीर की पुष्टि होती है, घृत से बल बढ़ता है (पीठी से बने पदार्थ) से प्राण और अन्न से शौर्य की वृद्धि होती है॥ ९८॥

**श्रम के भेद**—श्रम (व्यायाम) के चार भेद होते हैं। (१) अल्पश्रम (२) अर्धश्रम, (३) पूर्णश्रम और (४) अतिश्रम॥ २३॥

**इनके ( श्रम के ) लक्षण**—जिन्होंने हल्का व्यायाम किया है, उसका लक्षण कहता हूँ—प्रातःकाल श्रम करने पर जिन्हें स्वेद (पसीना) नहीं निकलता और श्वास भी नहीं फूलता उस श्रम को अल्प श्रम (Light exercise) कहते हैं॥ ३४॥

**अर्धश्रम**—मल्लों को बगल, कण्ठ, गाल, ललाट और हाथ-पैर के जोड़ों में जब स्वेद

**कक्षाकण्ठकपोलेषु ललाटे करसन्धिषु। पादसन्धिषु प्रस्वेदो हृदि श्वासश्च जायते॥ ३९॥**
**पूर्णश्रमे कृते मल्लैर्जायन्ते लक्षणानि वै॥ ४६॥**
**तान्यहं कथयिष्यामि श्रूयतां च प्रयत्नतः। स्वेदः सर्वेषु चाङ्गेषु नेत्रयोश्चैव रक्तिमा॥ ४७॥**
**जरानाशः कफनाशो मेदो नाशस्तथा परः। प्रस्वेदं शोषयत्येव मुखे श्वासः प्रवर्तते॥ ४८॥**
**हृदयं शोषयत्याशु कण्ठे शोषश्च तत्क्षणात्। तथा मुखं च शोषयति कलां शोषयति क्रमात्॥ ४९॥**
**छर्दिभ्रमश्वासकासरक्तं पित्तभयानि च। तथा हृदयदाहं च ज्वरमुत्पादयेदलम्॥ ५०॥**
**भ्रमोऽत्यन्तमेव स्यात् मूर्च्छां प्रकुरुते परम्। पिपासा जायते सद्यो बलहानिर्विशेषतः॥ ५१॥**

*—मल्लपुराण अ० ८*

**श्रमाणां कालः—**

**मार्गशीर्षादि चैत्रान्तं पूर्णं कुर्यात् श्रमं बुधः॥ २०॥**
**हिमयोगो बलं तत्र भक्षणं कुरुते दृढम्। पूर्णश्रमस्य योगेन वर्धते जठरानलः॥ २१॥**
**वर्धिते जठरस्याग्नौ आहारः प्रबलो भवेत्। आहाराद् बलवृद्धिः स्याद् बलाच्छ्रमसहो भवेत्॥ २२॥**
**पञ्चमासाश्च मल्लानां श्लाध्याः पूर्णश्रमस्तदा। वैशाखे ज्येष्ठ मासे च तथाषाढेऽपि दुःसहाः॥ २३॥**
**अर्धश्रमं प्रकुर्वन्ति यथासौख्यं न लुप्यते। वर्षासु श्रावणे चैव तथा भाद्रपदेऽपि च॥ २४॥**

---

(पसीने की बूँदें) आ जायें और हृदय में श्वास भर जाय तब उसे अर्धश्रम कहते हैं॥ ३९॥

पूर्णश्रम (Heavy exercise) करने पर मल्लों के शरीर में जो लक्षण प्रकट होते हैं, उनको मैं कहता हूँ।

पूर्णश्रम से सारे शरीर में स्वेद (पसीना) निकल आता है। आँखें लाल हो जाती हैं। जरा (बुढ़ापा) कफ़ और मेद समाप्त हो जाते हैं। बहुत अधिक पसीना निकलने से मुख सूख जाता है। श्वास फूल जाता है, हृदय और कण्ठ सूख जाते हैं। इस प्रकार मुख एवं सारी धातुयें सूखने लगती हैं॥ ४६-४९॥

अधिक श्रम से वमन, भ्रम (चक्कर आना), श्वास, कास रक्तपित्तादि, घबराहट, हृदय में दाह और ज्वर उत्पन्न हो जाते हैं। अधिक भ्रम (चक्कर) आकर मूर्च्छा आ जाती हैं। अत्यधिक प्यास लगती है और बलक्षीण हो जाता है॥ ५०-५१॥

मार्गशीर्ष के प्रारम्भ से लेकर चैत्र के अन्त तक पाँच मास बुद्धिमान् व्यक्ति को पूर्णश्रम (भारी व्यायाम) करना चाहिये॥ २०॥

क्योंकि इन मासों में सर्दी का प्राधान्य होने से भोजन शीघ्र ही पच जाता है और पूर्णश्रम से भी भूख खूब लगती है॥ २१॥

जठराग्नि के प्रबल होने से भोजन भी बढ़ जाता है। पर्याप्त आहार के द्वारा बल की वृद्धि होती है और बल की वृद्धि से कठिन श्रम को भी सहनेवाला हो जाता है॥ २२॥

ये पाँच मास मल्लों के लिये पूर्णश्रमार्थ उपयुक्त हैं। वैशाख, ज्येष्ठ और आषाढ़ ये तीन मास ग्रीष्मप्रधान होने से कष्टदायक है, अतः इन मासों में अर्धश्रम ही करना उचित है, जिससे शरीर को कष्ट न हो॥ २३॥

श्रावण-भाद्रपद में वर्षा के कारण और आकाश मेघाच्छन्न रहने से वातावरण में गर्मी रहती

**ऊष्मा भवति मध्ये तु बहिर्मेघाडम्बरम्। अल्पश्रमो युक्त एव कर्तुं तत्रापि नान्यथा॥ २५॥**
**यतोधिक श्रमाभ्यासादन्तः स्वापः प्रजायते। आश्विने कार्तिके चैव पित्तं तत्र प्रकुप्यति॥ २६॥**
**पित्तेन जाठरो वह्निर्मन्दः स्याद् भवति ज्वरः। मन्दे च जाठरे वह्नौ कुत आहारसम्भवः॥ २७॥**
**अनाहारस्य न बलमबलस्य कुतः क्रिया। तस्मादभ्यासयोगेन श्रमः स्वल्पः प्रशस्यते।**
**एवं कुर्वन् सदा मल्लो नियुद्धविजयी भवेत्॥ २८॥** *—मल्लपुराणम् अ० ९*

**मानसोल्लासे—**

**एकान्तरे दिने कुर्युः श्रममश्रमहेतवे॥ ८९१॥**
**पृथक् पृथक् स्वगेहेषु निजैर्गोबलकैस्तथा। गोबालैः सह कुर्वीत नियुद्धं प्राणवर्धनम्॥ ८९२॥**
*—मान० भा० २, अ० ६, वि० ४*

**श्रमस्य विधयः—मल्लपुराणे दशमोऽध्यायः—**

**श्रमोऽयं मल्लविद्यायाः कथितः षोडशात्मकः। यस्य चाभ्यासतो लोके त्रैलोक्यविजयी भवेत्॥ १॥**
**रङ्गश्रमस्तम्भश्रमस्तथा भ्रमणिका श्रमः। श्वासप्रेरणिकाभ्यासस्तथायं स्थापितश्रमः॥ २॥**
**ऊहापोहश्रमोऽन्यो गुरुगोणितकश्रमः। श्रमो लघु गोणितके श्रेष्ठः स्यात् प्रगदाश्रमः॥ ३॥**

---

है, अतः इस ऋतु में अल्पश्रम करना ही उचित है॥ २५॥ क्योंकि अधिक श्रम से अन्तस्ताप (जलन, घबराहट, व्याकुलता) उत्पन्न होता है।

आश्विन-कार्तिक मास में पित्त का प्रकोप होता है॥ २६॥

इसलिये जठराग्नि मन्द हो जाती है और ज्वर का प्रकोप भी होता है। जठराग्नि के मन्द होने से भोजन में अरुचि हो जाती है। बिना समुचित भोजन के बलवृद्धि नहीं होती और बिना बल के व्यायाम नियुद्धादि नहीं किये जा सकते, इसलिए अभ्यास को बनाये रखने के लिए इन मासों में अल्पश्रम करना ही उपयुक्त रहता है। पूर्वोक्त विधियों का परिपालन करता हुआ मल्ल नियुद्ध में सदैव विजयी रहता है॥ २७-२८॥

**मानसोल्लास में**—मल्ल एक दिन छोड़कर श्रम (मल्लयुद्धादि) का अभ्यास करें, जिससे शरीर में श्रान्ति न हो। श्रम का अभ्यास पृथक्-पृथक्, अपने-अपने अखाड़ों में गोवलक मल्लों के साथ करें॥ ८९१-८९२॥

मल्लयुद्ध के लिए शरीर समर्थ बनाने के लिए १६ प्रकार के श्रम कहे हैं। जिनके अभ्यास से लोक में सर्वत्र विजय प्राप्त होती है॥ १॥

इसके नाम निम्नलिखित हैं—

१. **रङ्गश्रमः**—अखाड़े में मल्लयुद्ध का अभ्यास।
२. **स्तम्भश्रमः**—मल्लखम्भ का व्यायाम।
३. **भ्रमणिकाश्रमः**—भ्रमण, दौड़ना।
४. **श्वासप्रेरणिकाभ्यासः**—प्राणायाम।
५. **स्थापितश्रमः**—स्थैर्य देनेवाले दण्ड-बैठक, भारोत्तोलन इत्यादि।
६. **ऊहापोहश्रमः**—मल्लयुद्ध के दावपेचों का अभ्यास या चिन्तन करना।

**आमर्दकी श्रमः श्रेष्ठो याञ्चास्थादनकः श्रमः। कुण्डकर्षणकाभ्यासस्तथाऽन्यकृत् काराश्रमः॥४॥**
**जलश्रमो बहुगुणः परानारोहणश्रमः। भोजनोर्ध्वा भ्रमणिका षोडशैतच्छ्रमास्थिजाः[१]॥५॥**
**श्रमाणां चैव कथ्यन्ते त्रयो भेदाः पृथक् पृथक्। उत्तमा मध्यमाश्चैव भवन्ति च तथाधमाः॥६॥**
**रङ्गश्रमस्तु श्रेष्ठः स्याद् ज्येष्ठःसर्वश्रमेषु च। ये चाभ्यासेन सर्वेऽपि श्रमाः सिद्धा भवन्ति हि॥७॥**
**तत्रादौ मध्यमांश्चान्यानन्यांस्ते कथयाम्यहम्। स्तम्भश्रमणिकाबाहुबाहुश्रमणमेव च॥८॥**
**गुरुगोणितकश्चैव लघुगोणितकस्तथा। गदाश्रमेऽपि तत्रादौ ततश्च छोनकश्रमः॥९॥**
**अङ्गकावर्तनाभ्यासस्तथा च श्रमकाश्रमाः। जलश्रमस्तथा चैव सोपनरो गुरुश्रमः॥१०॥**
**भोजनोर्ध्वश्रमणिका कथिताः सप्त चाधमाः। दिनान्तरे यदाभ्यासे बलमोजः प्रवर्धते॥११॥**
**पञ्चदश समाख्याताः कथ्यन्ते विविधश्रमाः[२]।**

---

७. **गुरुगोणितकश्रमः**—रेत की भरी बोरी उठाना।

८. **लघुगोणितकश्रमः**—हल्की बोरी से अभ्यास करना।

९. **प्रगदाश्रम**—गदा, मुग्दर, मोगरी, करेलादि घुमाना।

१०. **आर्मदकी**—तैलमर्दन (मालिश) का व्यायाम।

११. **आस्थादनकश्रमः**—दण्डबैठक निकालना।

१२. **कुण्डकर्षणश्रमः**—लेजियम का अभ्यास।

१३. **अन्यकृत्कारश्रमः**—परस्पर एक-दूसरे की सहायता से किया जानेवाला व्यायाम।

१४. **जलश्रमः**—तैरना।

१५. **परानारोहणश्रमः**—स्तूप बनाना अथवा दूसरे को अपनी पीठपर बिठाकर सीढ़ी पर चढ़ना।

१६. **भोजनोर्ध्वभ्रमणिका**—सांयकाल भोजन के पश्चात् भ्रमण करना।

श्रमों के तीन भेदों का पृथक्-पृथक् कथन किया जाता है। उत्तम, मध्यम और अधम ये तीन भेद श्रमों के होते हैं॥६॥

इनमें रङ्गश्रम सभी श्रमों में ज्येष्ठ और श्रेष्ठ हैं। अभ्यास से जो श्रम साध्य हैं, उनका वर्णन करता हूँ, उनमें मध्यम श्रम के अन्तर्गत स्तम्भश्रम (मल्लखम्भ का व्यायाम) बाहुपेल्लण (हल्का ज़ोर आजमाना), बाहुश्रम (भुजाओं का व्यायाम—दण्डादि), भारी रेत की भरी बोरी उठाना, हल्की बोरी उठाने का व्यायाम—ये पाँच श्रम हैं। गदा घुमाना, कस्सी से अखाड़ादि खोदना, शरीर के अङ्गों को विभिन्न प्रकार से मोड़ना, हल्के व्यायाम, तैरना, सीढ़ियों पर चढ़ना और भोजन के पश्चात् भ्रमण करना (टहलना), जिसका सेवन सायंकाल करने से बल, ओज की वृद्धि होती है—ये सात अधम श्रम हैं[२]॥७-११॥

---

१. मानसोल्लास १।४ श्लोक ९४३-५२ में मल्लों के लिये पाँच व्यायाम—रेत की भरी बोरी उठाना, भ्रमण (दौड़ना), तैरना, बाहुपेल्लण और मल्लस्तम्भ कहे हैं।

२. यहाँ पन्द्रह श्रमों के स्थान पर १३ की ही गणना की है।

**स्तम्भश्रमः—**

**त्रिधा स्तम्भाधिरोहणं दण्डाघातस्तथैव च॥ १६॥**
**अङ्गवर्तनलागश्च तथा पादापकर्षणम्। विज्ञेयो दशधा चैव स्तम्भः श्रमसमुद्भवः॥ १७॥**
**अङ्गस्य सहजं प्राणं स्कन्धप्राणं तथैव च। करप्राणं सुविप्राणं दण्डप्राणमपि ध्रुवम्॥ १८॥**
**तलहस्तभवं प्राणं बाहुप्राणं तथैव च। जङ्घाप्राणं कटिप्राणं पादसन्धिभवं तथा॥ १९॥**
**जायते कठिनाङ्गत्वं अङ्गस्य च जयस्तथा। अग्निवृद्धिः श्रमो ज्ञेयो लघुत्वमपि दृश्यते॥ २०॥**
**इत्येवं पञ्चदशधा प्राणस्तम्भश्रमस्तथा। अभ्यस्तेन सदायुक्तो नियुद्धजयी भवेत्॥ २१॥**

*—मल्ल पु० अ० १०*

**मानसोल्लासे—**

**आश्लेषयोग्यं सुश्लक्ष्णमूर्ध्वबाहू तलोन्नतम्॥ ९४९॥**
**दृढं निखानितं स्तम्भं चर्चितं चन्दनादिना। उत्प्लुत्याक्रम्य सक्थिभ्यां बाहुभ्यां चैव वक्षसा॥ ९५०॥**
**दृढं सम्पीड्य तं स्तम्भं पद्भ्यामूर्ध्वां समाश्रयेत्। बाहूभ्यां ततोरूभ्यामावर्तनविवर्तनैः॥ ९५१॥**
**अधश्चोर्ध्वं च संश्लेष्य स्तम्भेन श्रममाचरेत्।** *—मान० भाग २, अ० ६, वि० ४*

**अथ मल्लपुराणे एकादशोऽध्यायः—**

**कथयाम्यन्यश्रमणं रमणीकमुत्तमम्। तथाक्रमं प्रकुर्वीत मल्लाः पञ्चविधा अपि॥ १॥**
**अस्थिसारो मांससारो मेदसारस्तथैव च। तत्रास्थिमांससारश्च चतुर्थकः प्रकीर्तितः॥ २॥**
**तथास्थिमेदसारोऽपि पञ्चमः प्रयुज्यते। पञ्चानां गुणभेदानां भिन्नभ्रमणिका स्मृता॥ ३॥**

---

स्तम्भ (मल्लखम्भ) पर तीन विधियों से चढ़ा जाता है, यथा हाथों से पकड़कर चढ़ना, उछलकर, अड़ी मारते हुए, दशरंग करते हुए और पैरों से पकड़कर चढ़ना॥ १६-१७॥

मल्लखम्भ से होनेवाले लाभ निम्नलिखित हैं—

समस्त अङ्गों में शक्ति का सञ्चार, स्कन्धप्रदेश की पुष्टि, हाथ, पहुँचा (दण्ड), हथेली, भुजा, जङ्घा, कमर, पैरों के जोड़ (घुटनादि) इन सबकी पुष्टि होती है॥ १७-१९॥

अङ्ग कठोर होते हैं। दूसरों पर विजय प्राप्त होती है। इस प्रकार मल्लखम्भ के अभ्यास से पन्द्रह लाभ होते हैं। इसका अभ्यास करने से मल्ल सदैव विजयी रहता है॥ २०-२१॥

**मानसोल्लास में**—पकड़ने योग्य, चिकना, अपना हाथ उठाने जितना ऊँचा, दृढ़भूमि में गड़ा हुआ, चन्दनादि से लिप्त मल्लखम्भ होना चाहिये। इसपर उछलकर जाङ्घों से पकड़ना और भुजा तथा वक्षस्थल पैरों से मल्लखम्भ को सुदृढ़ पकड़कर ऊपर चढ़े। इसी प्रकार हाथों और जाङ्घों से पकड़कर विविध आवर्तन-विवर्तन (दशरङ्गादि मल्लखम्भ की विधियों) से उपर चढ़ें और नीचे आकर मल्लखम्भ का व्यायाम करें॥ ९५१॥

**मल्लपुराण का ग्यारहवाँ अध्याय**—अब रमणीक और अद्वितीय भ्रमण श्रम का वर्णन कहता हूँ, जिसको पाँच प्रकृतियोंवाले मल्ल करें॥ १॥

अस्थिसारादि पाँच प्रकृतियोंवाले मल्ल होते हैं। इन पाँचों की पृथक्-पृथक् प्रकृतियाँ होने से प्रत्येक के भ्रमण की विधि पृथक् है॥ २-३॥

**कथयिष्यामि विधिवद्यो यथा तं करिष्यति। क्रमात् त्रयः समाख्याताः पूर्वसूरिभिरेव च॥ ४॥**
**प्रेयस्य[१] क्रमोऽतिक्रमो धारणा क्रमेति [२]स्मृतः। दोषचयस्तनोर्वातकफपित्तस्य संभवः॥ ५॥**
**तत्रास्थिसारमल्लेन पित्तसारेण तेन तु। प्रशस्तक्रमपूर्वं तु कर्तव्या भ्रमणिका सदा॥ ६॥**
**मांससारेण वातेन संयुक्तेन यथाक्रमः। इति क्रमभ्रमणिका कर्तव्या सुखमिच्छता॥ ७॥**
**तथैव मेदसारेण कफवातयुतेन ते। सदा गोणितककटिप्राणसंप्राणमेव च[३]॥ ८॥**
**पवनस्य जयश्चैव एतदष्टगुणं स्मृतम्। मल्लानां विजयकरं तस्मादेतत्समभ्यसेत्॥ ९॥**

**मानसोल्लासे—**

**भ्रमणार्थं ततो गच्छेत् क्रोशमेकं बहिः पुरात्॥ ९४५॥**
**निवर्तेत तथा तूर्णं श्रमोऽयं भ्रमणाभिधः।** *—मान० भा० २ अ० वि० ४*

**बाहुप्रेरणिकश्रम[४]—**

**अष्टधा भवति प्राणं बाहुप्रेरणिकश्रमात्। तलहस्तभवं प्राणं भुजप्राणं तथैव च॥ १०॥**
**स्कन्धप्राणमुरःप्राणं भुजशीर्षभवं तथा। जानुप्राणं कटिप्राणं रोपणं तलपादयोः॥ ११॥**

---

मल्ल जिस प्रकार भ्रमण (दौड़ना, तेजी से चलना) करे, उसको कहता हूँ। पहले के शरीरशास्त्र के जाननेवालों ने उसके तीन भेद कहे हैं॥ ४॥

प्रशस्तक्रम अतिक्रम और धारणाक्रम—ये तीन प्रकार की भ्रमणिका हैं। शरीर में वात, कफ़ और पित्त ये तीन दोष एकत्रित होते रहते हैं॥ ५॥

अतः अस्थिसार और पित्तप्रधान व्यक्ति को सदा प्रशस्तक्रम भ्रमणिका करनी चाहिये॥ ६॥

मांससार और वात प्रकृतिवाले पुरुष को क्रमभ्रमणिका (धीरे-धीरे भ्रमण या दौड़ना) उपयुक्त रहता है॥ ७॥

इसी प्रकार मेदसार और कफ़, वात प्रकृतिवाले मल्ल को गोणितक उठाने का व्यायाम करना चाहिये। इससे कटिप्रदेश बलिष्ठ बनता है और वायु का प्रशमन होता है। पूर्वोक्त गोणितक के अभ्यास से आठ लाभ होते हैं, अतः इसका अभ्यास मल्लों को विजयप्रद होने से सदा करना चाहिये॥ ८-९॥

**मानसोल्लास में**—प्रातःकाल नगर या ग्राम से एक कोश बाहर भ्रमण को जावे और आते समय शीघ्रतापूर्वक चलते हुए लौटे, इस श्रम को भ्रमणश्रम कहते हैं॥ ९४५½॥

बाहुप्रेरणिक श्रम से आठ अङ्ग-प्रत्यङ्ग सुदृढ़ बनते हैं, यथा—हाथों की हथेलियाँ, भुजा, स्कन्ध, वक्षस्थल, ग्रीवा, जङ्घा, कमर आदि। एवं पैरों के तलुवों में रोपणशक्ति (एक स्थान

---

१. यहाँ प्रेयस्य के स्थान पर 'प्रशस्त' पाठ होना चाहिये।
२. पहले पाँच प्रकार के मल्लों को निम्न पाँच भ्रमण करने चाहियें, यह कहकर केवल तीनों का ही उल्लेख किया है।
३. भ्रमणश्रम में गोणितकश्रम का समावेश असङ्गत है।
४. मल्लपुराण की भूमिका में इसके संपादक महोदय ने बाहुप्रेरणिकाश्रम का अर्थ दण्ड पेलना किया है। यह भी सम्भव है, परन्तु मानसोल्लास में इसी से मिलता बाहुपेल्लणक श्रम दिया है जिसमें दो मल्ल खड़े हुए आपस में हाथों से एक-दूसरे को धकेलते हुए ज़ोर आज़माइश करते हैं, यही अर्थ उचित प्रतीत होता है।

**ऊर्ध्वस्थायिकमैतत् प्राण एकादशात्मकः। अतः सर्वप्रकारेण श्रममेव सदाभ्यसेत्॥ १२॥**

**मानसोल्लासे—**

**स्थितौ तुदेतामन्योन्यं कराभ्यां बाहुयुग्मकम्॥ ९४८॥**

**सांयकाले विधातव्यो बाहुपेल्लणकः श्रमः।** *—मान० भाग-२ अ० १ वि० ४*

**४. ऊहापोहश्रमः—**

**ऊहापोहस्तु कर्त्तव्यः प्रतिमल्लसमागमे। यथातथ्यं व्यक्तं शृणु अनुष्ठेयं च सर्वदा॥ १३॥**

**ऊहापोहश्च कार्यस्तु प्राण अष्टविधस्तथा। कथं च धारयिष्यामि कथं स्थास्यामि वा पुनः॥ १४॥**

**कथं च धारयिष्यति गमिष्यामि च वा कथम्। गृह्यते वा कथं ह्येष रक्ष्यते वा कथं परः॥ १५॥**

**कथं प्रमाणं क्रियते कथं न क्रियतेऽपि वा।**

**५-६. गोणितकश्रमः—**

**गुरुगोणितका भेदाः श्रेष्ठाः सप्तदशापि वा॥ १६॥**

**तानहं कथयिष्यामि यथायोग्यं तथा बलम्। प्रथमं नमस्कृत्य कक्षायां जानुसम्भवम्॥ १७॥**

**ध्रियते वामपार्श्वे तु दक्षिणेन पुनस्तथा। तथैव कुक्षिजानुभ्यां तले कृत्वा विधारणम्॥ १८॥**

**धृतेनापि वशं तिष्टेत् ततो याति तथा पुनः। उरसा धारणं तस्मात् ततो दण्डविधारणम्॥ १९॥**

**पुनश्चैव तु जानुभ्यां तले हस्तविधारणम्। पुनरुतिष्ठविंशति यथाशक्त्या समभ्यसेत्॥ २०॥**

---

पर डटे रहना) आ जाती है। इस प्रकार ऊपर के ग्यारह अङ्ग-प्रत्यङ्ग बलवान् बनते हैं, अतः सर्वप्रकार से इन व्यायामों का अभ्यास करे॥ १०-१२॥

**मानसोल्लास में**—परस्पर दो मल्ल सामने खड़े होकर एक-दूसरों को बाहुओं द्वारा धकेलें (धक्का-मुक्की करें) यह बाहूपेल्लणकश्रम सायंकाल करना चाहिये॥ ९४८½॥

**ऊहापोहश्रमः**—दूसरे मल्ल के सामने आने पर ऊहापोहश्रम (तर्क-वितर्कसहित दूसरे मल्ल पर दाव लगाने का चिन्तन) करना चाहिये। इसमें आठ बातें सोचनी चाहिये। यथा मैं दूसरे मल्ल को कैसे पकडूँगा? किस पैंतरे से खड़ा होऊँगा? कौन-से दाव लगाऊँगा? कौन-से दाव से यह मेरे काबू में आ सकता है? कौन-से दाव से यह मेरे दाव को काट सकता है अथवा बचकर निकल सकता है? इसका कौन-सा दाव अच्छा है और कौन-सा अच्छा नहीं है इत्यादि॥ १३-१५॥

भारी रेत से भरी बोरी के व्यायाम सतरह प्रकार के हैं॥ १६॥

उनका वर्णन करता हूँ। इसका यथायोग्य और बलानुसार प्रयोग करना चाहिये। पहले झुककर घुटने से सहारा लेकर बायीं बगल में गोणितक को उठाया जाता है और इसी प्रकार दाहिनी बग़ल में।

इसी प्रकार कुक्षि (बग़ल) और जानु (घुटने) से हाथों पर रखना और इसी स्थिति में रहना। बार-बार करना। इसके पश्चात् लेटकर अपनी छाती पर गोणितक को रखना और पुनः हाथों से उठाना॥ १७-१९॥

फिर घुटनों से उठाना और हाथों द्वारा बीस बार ऊपर उठाना और नीचे शक्ति के अनुसार करना चाहिये।

ध्रियते वाङ्घ्रिजानुभ्यां लोलयेत् च पुनः पुनः। धारणं तलपादाभ्यां तथैव च पुनः क्रमात्॥ २१॥
अथ धारयकस्यैव स्थानानि परिपूरयेत्। शिरसा धारणं चैव शिरसो हननं ततः॥ २२॥
बाहुचालनमेवोक्तं चरणग्रहणमेव च। पदस्य सन्धिग्रहणं करसन्धिस्तथैव च॥ २३॥
सर्वाङ्गे चालनं चैव भेदाः सप्तदशः स्मृताः। गुरुगोणिताभ्यां चैव वर्धते प्राण उत्तमः॥ २४॥
एकोनविंशत्यधिकं कथ्यतेऽथ यथा शृणु। जङ्घाप्राणमुरः ( प्राणं ) कण्ठप्राणं च उत्तमम्॥ २५॥
सर्वाङ्गस्थानसंभूतं जायते प्राणमष्टधा। इति ज्ञात्वा च सततं सादरं च समभ्यसेत्॥ २६॥

**मानसोल्लासे—**

पालीदिवसेप्रातर्बालुका भृतगोणिका[१]॥ ४३॥
बाहुभ्यामुत्क्षिपेच्छक्त्या पादाभ्यां च मुहुर्मुहुः। भारं सोढुं स कर्त्तव्यो ज्येष्ठैर्मल्लैविशेषतः॥ ४४॥
भारश्रमोऽयमाख्यातो गात्रप्राणविवर्धनः। *—मान० भाग २ अ० १ वि० ४*

**७. [२]पीडनकश्रमः—**

मयात्वेवं समाख्याता सर्वे विजयहेतवः। जयः पीडनका भेदाः कथिता मल्लकर्मणि॥ २७॥
तलहस्तविधारणं कक्षाधारणमेव च। भुजसन्धिधारणं च त्रय पीडनकेऽधमाः॥ २८॥

---

इसी प्रकार जङ्घाओं और घुटनों पर उठाकर बार-बार ऊपर, नीचे करें। इसी प्रकार पैरों के तलुवों पर रखकर अभ्यास करें॥ २१॥

गोणितक को उठानें की जितनी विधियाँ हैं उन सबका अभ्यास करे। शिर से उठाकर शिर को घुमाये॥ २२॥

इसी प्रकार हाथ, पैर, पैरों के जोड़, हाथों के जोड़ और सभी अङ्गों से अभ्यास करने के सतरह भेद कहे गये हैं॥ २३½॥

गुरु और लघु गोणितक से उन्नीस से भी अधिक अङ्ग-प्रत्यङ्गों में शक्ति का सञ्चार होता है। जङ्घा, वक्षस्थल, ग्रीवादि बलिष्ठ होकर सभी अङ्गों में आठ प्रकार की शक्ति बढ़ती है। ऐसा जानकर श्रद्धा से इसका अभ्यास करना चाहिये॥ २४-२६॥

**मानसोल्लास में**—जिस दिन मल्लयुद्ध करना हो उस दिन प्रातः बालु (रेत) से भरी हुई बोरी हाथों और पैरों से बार-बार उठाये। ज्येष्ठी मल्लों को भार-वहन में समर्थ होने के लिए इसका विशेषरूप से अभ्यास करना चाहिये। यह भारश्रम शरीर में शक्ति का बढ़ानेवाला है॥ ४४½॥

मल्लयुद्ध में मेरे द्वारा कथित सर्वत्र विजय प्राप्त करवाने में सहायक पीडनकश्रम के तीन भेद होते हैं॥ २७॥

हाथों से धारण करना, कक्षाभाग से धारण करना और हाथों के जोड़ (कुहनियों) से धारण करना—ये तीन व्यायाम पीडनकश्रम के अधमश्रम (Light exercise) हैं॥ २८॥

---

१. गोणितक शब्द का अर्थ मल्लपुराण के सम्पादक ने गोलाकार मुद्‌गर (नाली) किया है, जो असङ्गत है। मानसोल्लास में बालू से भरी बोरी यह अर्थ स्पष्ट ही है।

२. पीडनकश्रम से क्या अभिप्राय है यह निश्चित नहीं कहा जा सकता। इनकी संख्या दो होने से सम्भवतः डम्बल-जैसे साधन हो सकते हैं, जिन्हें हाथ में पकड़कर घुमाते हैं।

**गुणा भवन्ति ये चान्ये शृणु तान्कथितान्मया। प्राणं चतुर्धा भवति व्यक्तं पीडनकश्रमात्॥ २९॥**
**कक्षाप्राणं च भवति प्राणं च करसन्धिजम्। तलहस्तभवं प्राणं पादप्राणं भवत्यपि॥ ३०॥**
**इति पीडनकाभ्यां च दृढप्राणं चतुष्टयम्।**

**८. गदाश्रमः—**

**प्राणपद्मं गदाभ्यासात् कर्तुर्भवति सर्वदा॥ ३१॥ तलहस्तप्राणं चात्र भुजप्राणं तथा पुनः।**

**९. छोटनश्रमः[१]—**

**यो वा छोटनकाभ्यासात् प्राणत्रयसमुद्भवः॥ ३२॥**
**तलहस्तभवं प्राणं पोवाप्राणं तथैव च। भुजप्राणं तथैवात्र सदा तेन समभ्यसेत्॥ ३३॥**

**१०. [२]कुण्डकावर्तनश्रमः—**

**चतुर्विधं भवेत् प्राणं कुण्डकावर्तनश्रमात्॥ ३४॥**
**जङ्घाप्राणं च प्रथमं कटिप्राणस्तथैव च। जितश्वासश्च भवति हृदयं दृढमेव च॥ ३५॥**
**कुण्डकावर्तनाभ्यासात् सदा तेन समाचरेत्।**

**११. [३]कर्करश्रमः—**

**कर्करश्रमकायोगात् प्राणं चैव चतुर्विधम्॥ ३६॥**

---

इनसे जो लाभ होते हैं उन्हें सुनो—

पीडनकश्रम से कक्षा, हाथों के जोड़ (कलाई, कुहनी) हथेलियाँ और पैर सुदृढ़ बनते हैं॥ २९-३०½॥

गदा (मोगरी, मुद्‌गर, करेलादि) घुमाने से हाथों की हथेलियाँ, कलाई और भुजा बलिष्ठ बनती हैं॥ ३१½॥

**छोटनश्रमः**—छोटन (कस्सी से अखाड़ा खोदना) से हाथ की हथेलियाँ, पहुँचा और भुजायें शक्तिशाली होती है, अतः इसका अभ्यास सदैव करना चाहिये॥ ३२-३३॥

योगचाप (लेजियम) को खेंचने के व्यायाम से जङ्घा और कटि में शक्ति का सञ्चार होता हैं। श्वास (Stamina) बढ़ता है और हृदय बलवान् होता है, अतः इसका अभ्यास सदैव करना चाहिये॥ ३४-३५½॥

कर्कर (भारी पत्थर का गोला) उठाने से चार अङ्ग जङ्घा, कटि बलवान् बनती है, शरीर

---

१. छोटनश्रम का अर्थ कुद्दाल या अन्य साधन से भूमि खोदना प्रतीत होता है। इसी ग्रन्थ के पन्द्रहवें अध्याय के १७वें श्लोक में '**न वा कच्छछोटनं कुर्यात्**' ऐसा पाठ आया है जिसका अर्थ कच्छा नहीं फाड़ना, किया है। मल्लयुद्ध के समय भूमि खोदना आवश्यक है। साथ ही इससे पर्याप्त व्यायाम भी हो जाता है। छुट् धातु से छोटन शब्द की सिद्धि होती है।

२. कुण्ड गोलाकार पदार्थ को कहते हैं। कुण्डकावर्तनश्रम से क्या अभिप्राय है यह निश्चितरूप से नहीं कहा जा सकता। मल्लपुराण के सम्पादक ने नियुद्ध के समय मल्ल दायें-बायें गोलाई में पैंतरे पर चलते हैं उसे कुण्डकावर्तन श्रम माना है। इसी अध्याय में कुण्डकर्षणश्रम का उल्लेख है। कुण्ड शब्द धनुष का वाचक है, अतः योगचाप (लेजियम) के व्यायाम को कुण्डकर्षणश्रम मान सकते हैं। इससे कटिप्रदेश का पर्याप्त व्यायाम हो जाता है।

३. कर्करश्रम से यहाँ भारी गोलाकार पत्थर उठाना और पीछे की ओर से फेंक देना अभिप्राय है। इसे लोक में मुग्दर उठाना भी कहते हैं। अधिक ज्ञानार्थ देखिये—भारतीय व्यायाम एण्ड फिजिकल कल्चर।

**जङ्घाप्राणं कटिप्राणं लघुत्वं च भवत्यपि। पवनस्य जयश्चैव अर्थश्च जायते सदा॥ ३७॥**
**तेन तत् सर्वदा कुर्यात् कर्करश्रममुत्तमम्।**

**१२. जलश्रमः—**

**प्राणद्वयं जलाभ्यासात् कर्तुर्भवति निश्चितम्॥ ३८॥**
**भुजप्राणमुरःप्राणं सर्वं तेन समाचरेत्।**

**मानसोल्लासेः—**

**पुष्करिण्यां तडागे वा नद्यां च प्रविशेज्जलम्॥ ९४६॥**
**कण्ठदघ्नं ततस्तोयं बाहुभ्यामवलोडयेत्। बाहुप्राणकरो ज्ञेयो द्वितीयः सलिलश्रमः॥ ९४७½॥**

*—मान० भाग २ अ० १ वि० ४*

**१३. सोपानरोहणश्रमः[1]—**

**सोपानरोहणे चैव प्राणत्रयमुदाहृतम्॥ ३९॥**

**१४. भ्रमणिकाश्रमः—**

**भोजनोर्ध्वं भ्रमात् पुंसां त्रिविधं प्राणमेव च। जायते सर्वसामान्यं तथैव च समाचरेत्॥ ४०॥**

**१५. रङ्गश्रमः—**

**पञ्चदशविधानोऽपि श्रमे प्राणसमुद्भवः। एवं रङ्गसमभ्यासात् प्रशमो जायते तनुः॥ ४१॥**
**तेन सर्वश्रमाणां तु ज्येष्ठी रङ्गश्रमोधिकः। इति ज्ञात्वा गुणान् सर्वानुत्तमा गुणहेतवः॥ ४२॥**

**१६. मर्दनाश्रमः—**

**मर्दना भीमसेनी च दातव्या शत्रुमर्दिनी। अष्टौ गुणा भवन्त्येते शृणु वा कथयाम्यहम्॥ ४३॥**

---

हल्का होता है और आपानवायु (अथवा पैट) व्यवस्थित (अथवा सुदृढ़) होता है और मल्ल सदैव समर्थ रहता है, अतः सदैव कर्करश्रम को करें॥ ३६-३७½॥

जलश्रम (तैरना) से भुजा और वक्षःस्थल सुदृढ़ बनते हैं, अतः इसका अभ्यास सभी को करना चाहिये॥ ३८½॥

**मानसोल्लास में**—बावड़ी, तालाब या नदी के जल में कण्ठ तक पानी आ जाय वहाँ स्थित हो भुजाओं से जल का विलोडन करे। यह द्वितीय सलिलश्रम भुजाओं में प्राणशक्ति का सञ्चार करनेवाला है॥ ९४६-९४७½॥

इसी प्रकार सीढ़ियों पर चढ़ने से तीन अङ्गों में प्राणशक्ति बढ़ती है॥ ३९॥

इसी प्रकार भोजन के पश्चात् (सायंकाल) भ्रमण करने से तीन प्रकार की शक्ति बढ़ती है। इसका सेवन सभी को करना चाहिये॥ ४०॥

पूर्वोक्त पन्द्रह प्रकार के श्रमों से जो शक्ति शरीर में आती है वह अकेले रङ्गश्रम का अभ्यास करने से मिल जाती है। शरीर सभी कष्टों को सहन करने योग्य हो जाता है॥ ४१॥

इसलिए ज्येष्ठी मल्ल को सभी श्रमों की विधियाँ एवं उनसे होनेवाले लाभों का ज्ञान तथा इन सबसे अधिक रङ्गश्रम है, ऐसा जानकर सभी उत्तम गुणों की वृद्धि करनी चाहिये॥ ४२॥

भीमसेनी मर्दना (तैल मालिश) जो शत्रुओं का मर्दन करनेवाली है (जिसके द्वारा शरीर प्रतिपक्षी को परास्त करने योग्य हो जाता है) अस्थिमांससार व्यक्ति को करनी चाहिये। इसके

---

१. सोपानरोहण (सीढ़ी चढ़ना) के लाभ नहीं कहे। हमारे मत में इससे पैर एवं जङ्घा के स्नायु सुदृढ़ बनते हैं।

श्वासहरा वृद्धिकरा तथा श्रमहरापि च। मेदोहरा प्राणकरा सुशरीरकरापि च॥ ४४॥
तथोत्करकरौ[१] चैव तथाप्यायनकरापि[२] ( च )। देयास्थिमांससारस्य भीमसेनी च मर्दनी॥ ४५॥
त्वक्रुधिरमांसमेदपर्यन्तेनाभिसंयुता:। गुणा: सप्त भवन्त्यत्र स्फुटं ते कथयाम्यहम्॥ ४६॥
निद्रां करोति प्रथमं तथा तेज: करोति च। शौर्यकरा दीपनी च अङ्गशुद्धिं करोति च॥ ४७॥
कुरुतेऽत्यन्तशोभां च मन: स्थिरकरा तथा। भीमसेनी च दातव्या मांससारस्य मर्दना॥ ४८॥
त्वग्रुधिरमांसपुष्टस्य लघुसारेण वर्द्धयेत्। करोति च गुणान् सप्त शृणु सर्वसुखावहान्॥ ४९॥
उत्साहं कुरुते चाशु तथाह्लादं करोति च। सुखं करोति परमं लाघवं कुरुते परम्॥ ५०॥
मेधां ददाति परमां तन्द्रां च हरयेत् सदा। एवं सा कुरुते भद्र श्वाससारस्य मर्दना॥ ५१॥
तेन सर्वैस्तथा सेव्या मल्लै: सर्वाङ्गसिद्धये। तथा मांसास्थिसारस्य लघ्वी देया च मर्दना॥ ५२॥
त्वग्रुधिरपुष्टिकरा प्रजाह्लादप्रदायिनी। चलकरा दीप्तिकरा चक्षुरारोग्यकारिणी॥ ५३॥
कायाशोधकरा चैव कायामार्दवकारिका। मर्दनाय परा नास्ति कार्या सौष्ठवकारका॥ ५४॥
अस्थिगता मांसगता तथा मलगतापि वा। श्रुता सा परमा गुह्या साम्या चैव पृथक् पृथक्॥ ५५॥

---

द्वारा आठ लाभ होते हैं, जिनको मैं कहता हूँ॥ ४३॥

भीमसेनी मर्दना श्वास का प्रशमन करती है, शरीर की वृद्धि करती है और थकान को दूर करती है, चर्बी को घटाती है, शक्ति का सञ्चार करती है, शरीर को पुष्ट बनाती है और मुटापे को दूर करके दुर्बल व्यक्ति को स्थूल बनाती है॥ ४४-४५॥

इस मालिश से त्वचा, रुधिर, मांस, मेदादि प्रभावित होते हैं। इसके सात गुणों को कहता हूँ॥ ४६॥

निद्रादायक, तेजकारक, शौर्यकारक, दीपक, अङ्गशुद्धिकारक, अत्यन्त शोभावर्द्धक और मन को स्थिर करनेवाली है। इसे मांससार मल्ल करें॥ ४७-४८॥

त्वचा, रक्त और मांस की पुष्टि के लिए लघुसार (हल्की मालिश) करनी उचित है। इससे सात लाभ होते हैं, यथा—उत्साह बढ़ता है, प्रसन्नताकारक है, सुखकारक है, शरीर हल्का हो जाता है, मेधाप्रद है, तन्द्रा (आलस्य) को दूर करती है और श्वाससार व्यक्ति के लिए कल्याणप्रद है। इसलिए मल्लों को सभी अङ्गों को सशक्त बनाने के लिए विशेषकर मांसास्थिसार मल्लों को हल्की मालिश करनी चाहिये॥ ४९-५२॥

यह लघुमर्दन (धीरे-धीरे मालिश करना) त्वचा रक्त की पोषक, पुरुषत्वप्रद और आनन्दवर्धक, कार्य में सामर्थ्यदायक दीप्तिकारक, नेत्रों की ज्योतिवर्धक, आरोग्यप्रद, शरीर की संशोधक और सुकोमल बनानेवाली हैं। शरीर की सुन्दरता बढ़ानेवाला मर्दन से बढ़कर अन्य साधन नहीं हैं॥ ५३-५४॥

इसका प्रभाव अस्थि, मांस और मल (वात, पित्त, कफ़) तक होता है। यह परम गुह्य और साम्य हैं॥ ५५॥

---

१. यहाँ 'उत्करकरा' ऐसा पाठ होना चाहिये।
२. यहाँ पाठ त्रुटित है।

**प्रथमा भीमसेनी च तथा नारायणी परा। तृतीया चित्रिणी प्रोक्ता मसृणी च तथा परा॥ ५६॥**
**चेतः प्रकरा चैवेयं कथिता कैटभारिणा। प्रथमा चरणे देया द्वितीया जानुनि न्यसेत्॥ ५७॥**
**तृतीया च करे देया मसृणी पट्टके तथा। पुनश्चतुर्विधा देया द्वात्रिंशद् गुणकारिका॥ ५८॥**
**तथा त्रयोदशगुणैर्हेतुभिर्नामदोहरा। श्रमहरा तथा वातहरा च कफहारिणी॥ ५९॥**
**अग्निकरा वृद्धिकरा तनुविस्तारकारिका। काठिन्यदा प्राणकरा तथा श्वासहरापि च॥ ६०॥**
**इत्यास्थिता त्रिदशधा कथिता मर्दना मया। कष्टं हरन्ति निःशेषजडत्वं यात्यसंशयम्॥ ६१॥**
**श्रमवानस्थिवानिति मांसस्य मर्दको भवेत्। भीमसेनी च मल्लानां देया नारायणीं शृणु॥ ६२॥**
**चित्रिणी बालवृद्धानां तैलाभ्यङ्गेषु मर्दनी। भीमसेनी च विज्ञेया मर्दना सुखकारिका॥ ६३॥**
**धातुपञ्चकपर्यन्तं जानुपादविमर्दनम्। सा ज्ञेया नारायणी चासौ मर्दना सुखहेतवे॥ ६४॥**
**करस्तु केवलं यत्र दद्यात्त्वङ्मांसमर्दना। सा मर्दना प्रयत्नेन चित्रिणी कथिता बुधैः॥ ६५॥**
**तैलाभ्यङ्गे पटेनैव मसृणी त्वग्विमर्दना। इति विशेषतो युक्ता मर्दना लोकसंमता॥ ६६॥**
**ज्ञात्वैतां च बहु शृणु चतुर्नाम समन्विताम्। या यस्य रोचतेऽन्त्यन्तं तां तस्य कारयेद् ध्रुवम्॥ ६७॥**
**व्यायामः कफनाशाय वातनाशाय मर्दनी। स्नानं च पित्तनाशाय तेन मल्ला महाबलाः॥ ६८॥**

---

भीमसेनी, नारायणी, चित्रिणी और मसृणी—ये मर्दन के चार भेद हैं। यह चित्त को प्रसन्नता देनेवाली श्रीकृष्णजी ने कही है॥ ५६½॥

पहली मर्दना (भीमसेनी) पैरों की करनी चाहिये। दूसरी घुटनों पर, तीसरी हाथों पर, चौथी पट्टक (शिर) में करनी चाहिये। पुनः चारों प्रकार की मर्दना को करे। जोकि बत्तीस गुणों को देनेवाली है॥ ५७-५८॥

इसके अतिरिक्त तेरह गुण अन्य होते हैं, यथा—मद (मूर्च्छा), वात, कफ़ को दूर करनेवाली, अग्निवर्धक—-वृद्धिकारक, शरीरवर्धक, सुदृढ़ताकारक, शक्तिसञ्चारक श्वास को दूर करनेवाली इत्यादि। इससे कष्ट दूर होते हैं और जड़त्वं (आलस्य या शरीर का जकड़ जाना) निस्सन्देह दूर होता है। मांससार मल्ल इससे श्रम करने में समर्थ हो जाता है॥ ५९-६१॥

यह भीमसेनी मर्दना मल्लों की करनी उचित हैं। अब नारायणी को सुनो॥ ६२॥

इनमें भीमसेनी मर्दना ही सुखकारक है॥ ६३॥

पाँच धातु (रस, रक्त, मांस, अस्थि, मेद) तक जिसका प्रभाव हो वह नारायणी मर्दना जाननी चाहिये। यह सुखकारक है तथा यह पैरों और घुटनों की की जाती है॥ ६४॥

जिसमें केवल रक्त का सञ्चार करने के लिए (जिसका प्रभाव मांसादि तक न हो) हल्के हाथ से मर्दन किया जाता है उसे ज्ञानी लोगों ने चित्रिणी मर्दना कहा है॥ ६५॥

तैलमर्दन में शिर, मुख, नेत्रादि पर मसृणी मर्दना करनी चाहिये, परन्तु इसमें त्वचा का अधिक घर्षण न होने पाये, इसका ध्यान रखा जाना चाहिये॥ ६६॥

इन चारों को जानकर जो मर्दना जिसे अधिक अनुकूल पड़े उसे ही करवावें॥ ६७॥

व्यायाम से कफ की निवृति होती है। मर्दन से वात की और स्नान से पित्त शान्त होता है। इन तीनों दोषों को शमन करके ही मल्ल बलवान् रह सकते हैं॥ ६८॥

# तृतीय अध्यायः

## नियुद्धस्य चत्वारो भेदाः

### ( मल्लपुराणे पञ्चदशोध्यायः )

चतुर्विधं नियुद्धन्तु शृणु मतिमतां वर। आद्यं धरणिपातं च आसुरं च द्वितीयकम्॥ १॥
तृतीयं [1]नारमित्युक्तं युद्धं पुनश्चतुर्थकम्। तेषां धरणिपातस्य भेदः पञ्चविधो भवेत्॥ २॥
तलप्रहारः प्रथमः करप्रहार एव च। निपत्य चात्मना भूमौ परं पातयति ध्रुवम्[2]॥ ३॥
पातितस्य स्फुटं हारं निरुद्धे विजयो भवेत्। ज्ञात्वैवं बलबुद्धिभ्यां युद्धमेतत् समाचरेत्॥ ४॥

**आसुरयुद्धम्—**

अथैतदासुरं युद्धं द्वात्रिंशद्भेदभीषणम्। केशाकर्षणपीडा च कर्णस्फोटनमेव च॥ ५॥
नासिका स्फोटनं चैव तथा चर्वणमेव च। दन्तपातनमेव स्यान्मुखे पांशुनिपातनम्॥ ६॥
अथ पांशौ परिक्षेपो नखैरेव विदारणम्। नासिकापीडनं चैव ग्रीवाग्रहणकं तथा॥ ७॥
एकाङ्गुलीमोडनं वा तथा द्व्यङ्गुलीमोडनम्। अङ्गुलीत्रितयस्यापि मोडनं कथितं क्वचित्॥ ८॥

---

**नियुद्ध के चार भेद**—बुद्धिमानों में श्रेष्ठ सोमेश्वर! चार प्रकार के नियुद्धों का वर्णन सुनिये—

**पहला धरणिपात**—भूमि पर दावपेंच द्वारा द्वितीय मल्ल को गिरा देना, दूसरा आसुर, तीसरा नार और चौथा युद्ध—ये चार भेद नियुद्ध के हैं।

उनमें धरणिपात युद्ध पाँच प्रकार का होता है॥ २॥

प्रथम तलप्रहार (थप्पड़ मारना) २. हाथ से प्रहार (पहुँचे से प्रहार करना या कुहनी से मारना) ३. और स्वयं भूमि पर गिरकर प्रतिपक्षी को भूमि पर गिराना॥ ३॥

(प्रतिपक्षी का सन्तुलन बिगाड़ने के लिये स्वयं भूमि पर बैठना, घुटना रखना, लेटनादि क्रियायें की जाती हैं)

भूमि पर गिरे हुए मल्ल को दावपेंच (Locks) द्वारा क्रियारहित करने पर ही द्वितीय मल्ल की विजय होती है। इस प्रकार बल और बुद्धि का प्रयोग करके इस युद्ध को करे॥ ४॥

**अब आसुरयुद्ध का वर्णन करते हैं**—इस आसुरयुद्ध के बत्तीस भेद हैं यथा—केशों को खींचना, पीड़ित करना, कान फाड़ना, नाक को तोड़ना, नाक को दाँतों से काटना, दाँतों को तोड़ना, मुख में धूल डालना, धूल में गिराना, नखों से विदारण करना, नाक को पकड़कर खींचना या पीड़ा देना, गले को दबाना (गला घोटना), एक अङ्गुली को पकड़कर मरोड़ना, दो अङ्गुलियों को मरोड़ना अथवा तीनों को मरोड़ना, हाथ का अंगूठा तोड़ना या पैर का अंगूठा तोड़ना, सारी

---

१. इस श्लोक में तीसरे युद्ध को नारयुद्ध बताया है, परन्तु आगे दशवें श्लोक में मारयुद्ध कहा है। यहाँ मारयुद्ध कहना ही उचित है। इसका उद्देश्य प्रतिपक्षी मल्ल को मारना ही होता है।

२. धरणिपात युद्ध के तीन प्रकार ही बतलाये हैं। इसके पश्चात् प्रतिपक्षी को बन्ध लगाकर क्रियारहित कर देना ही विजयकारक कहा है। सम्भवतः धरणिपात के पाँच भेदों में इसकी भी गणना की गई हो।

कराङ्गुष्ठमोडनं च पादाङ्गुष्ठमोडनम्। समग्राङ्गुलिभङ्गो वा फणग्रहणमेव च॥ ९॥
भारेण च प्रहारेण विज्ञानेन पुनस्तथा। [1]वालकेन प्रकारेण मारयुद्धमथापि च॥ १०॥
प्राणेन चौजसा चैव तथा वहणिनापि च। येन केन प्रकारेण मारयुद्धं समागताः॥ ११॥
स एव मर्मो मल्लानां पातनं च महीतले। भारं च भारभग्नं च वितरं समरे त्यजेत्॥ १२॥
येनाषाढकमध्ये तु जीवितं च विमुञ्चति। इदानीं धर्मयुद्धस्य द्वात्रिंशत् कथिता गुणाः॥ १३॥
तानहं कथयिष्यामि यथा विक्रमणागताः। केशानाकर्षयति च कर्णौ च त्रोटयत्यपि॥ १४॥
अक्षिणी न स्फोटयत्यपि मुखं च स्फोटयत्यपि। नासिकां च त्रोटयति नन्दाति सर्वयत्यति॥ १५॥
न दन्तान् पातयति च पांशुक्षेपो न वै मुखे। नाक्ष्णोः पांशुपातनं च विदारयति नो नखैः॥ १६॥
न नालिकां पीडयति ग्रीवां चैव न पीडयेत्। न कच्छछोटनं कुर्याद् दण्डं गृह्णाति नैव हि॥ १७॥
शिरसोघातनं नैव मर्मभङ्गं च वर्जयेत्। प्रकाशयन् धर्मयुद्धं यशो हर्षविवर्धनम्॥ १८॥
धरणिपातितस्याथ मत्सरं[2] परिवर्जयेत्। यः कश्चिद् दर्पसंयोगादासुरं युद्धमारभेत्॥ १९॥
भग्ने वापि मृते तस्मिन् राजा च दोषभाग्भवेत्। इत्यङ्गसङ्गरे मल्लं ज्ञात्वा यत्नेन भूपतिः॥ २०॥

---

अङ्गुलियों को तोड़ना या हाथ को कलाई से पकड़कर मरोड़ना, भार, प्रहार या दाव लगाकर अथवा बालक सदृश (अनाड़ी ढङ्ग से लड़ना)—ये सब आसुरयुद्ध कहलाता है॥ ५-१०॥

अब मारयुद्ध को कहते हैं—प्राण (शक्ति) ओज (निपुणता) एवं वहणि (दावपेंच) आदि किसी भी ढङ्ग से द्वितीय मल्ल को मारना (परास्त करना) मारयुद्ध कहलाता है॥ ११॥

मल्लों का यही कर्त्तव्य है कि दूसरे मल्ल को भूमि पर गिराकर ही छोड़ दे। भार अथवा भार से अङ्गभङ्ग करना और अन्य विधियाँ जिनसे प्रतिद्वन्द्वी का प्राणान्त हो जाय, उनका परित्याग कर दे अथवा संग्राम को छोड़कर अन्यत्र मारयुद्ध का प्रयोग न करे॥ १२½॥

**धर्मयुद्ध**—अब धर्मयुद्ध के बत्तीस गुण कहे जाते हैं॥ १३॥

धर्मयुद्ध में केशों को खींचना, कान पर प्रहार करना, मुख पर प्रहार करना और नासिका को पीड़ित करना वैध हैं और आँख फोड़ना, दाँत तोड़ना, मुख में धूल डालना, आँखों में धूल डालना, नखों से विदारण करना, नस-नाड़ियों को दबाना, ग्रीवा को मरोड़ना (गला घोटना) कच्छा (जाङ्घिया) फाड़ना, दण्ड (लिङ्ग) को पकड़ना, शिर पर प्रहार करना और मर्मस्थलों पर आघात करना ये अवैध (अनुचित) उपाय हैं। इनसे बचकर यश और हर्ष को बढ़ानेवाले धर्मयुद्ध को करे॥ १४-१८॥

प्रतिपक्षी मल्ल को भूमि पर गिराकर ही छोड़ दे। उससे द्वेष नहीं करे। यदि कोई मल्ल दर्प (घमण्ड) के वशीभूत होकर आसुर युद्ध को प्रारम्भ कर दे॥ १९॥ और द्वितीय मल्ल का अङ्गभङ्ग या प्राणान्त हो जाय तो इसमें राजा ही दोषी माना जाता है॥ २०॥

---

